डॉ. श्रीधर भास्कर वर्णेकर

# श्रीशिवराज्योदयम्

श्रीशिवराज्योदयम्
श्रीशिवराज्योदयम्

Scanned by CamScanner

# श्रीशिवराज्योदयं महाकाव्यम्

## लेखकस्य निवेदनम्

पुण्यश्लोकस्य श्रीमच्छत्रपतेः शिवराजस्य वीररसोज्ज्वलं परमोर्जस्वलं चरितम् अधिकृत्य महाकाव्यं लिखितुं प्रेरणा बाल्यादेव मदन्तःकरणे केनापि अतर्क्येण हेतुना प्रादुरासीत्। १९३१ तमे ख्रिस्ताब्दे स्ववयसः १३ तमे वर्षे स्वर्गीय-श्रीहनुमन्तशास्त्रि-केवलेमहाभागानाम् अनुग्रहेण संस्कृत-भाषया सह मम प्रथमः परिचयः संजातः। तैरेव गुरुचरणैः अमरकोशः लघुसिद्धान्तकौमुदी च पारंपरिकपद्धत्या पाठिते। तस्मिन्नेव वर्षे "बङ्गाल-संस्कृत-असोसिएशन" इत्याख्यया संस्थया संचालिता व्याकरण-प्रथमा-परीक्षा मया समुत्तीर्णा। ते हि मदीया गुरुचरणा वेदान्त-व्याकरणादि-शास्त्रातिनिरत-मतितया काव्याध्यापने उदासीना इव आसन्। अतः संस्कृत-काव्याध्ययनार्थं प्रा. दि. वि. वराडपाण्डे-महाशयैः संचालितं नागपुर-संस्कृत-महाविद्यालयं प्रति तैरहं प्रेषितः। तत्रैव महाविद्यालये रघुवंश-कुमार-संभवयोः प्रथमः परिचयो मया समासादितः।

बाल्यादेव रुचिरार्थ-सुभाषितानां कण्ठस्थीकरणे स्वाभाविकी मे प्रवृत्तिः आसीत्। अतो रघुवंश-कुमारसंभवयोः नितान्तमाधुर्येण मोहितेनेव मया तत्रत्याः कतिपय-सर्गाः स्वेच्छया कण्ठस्थीकृताः। कालिदासीय-श्लोकानां गायनावसरे तादृक्श्लोकविरचने काले काले प्रेरणा समुदेति स्म। परं सामर्थ्याभावात् उत्पत्त्यनन्तरं सा प्रेरणा दरिद्रमनोरथवत् स्वयमेव व्यलीयत।

तेषु दिवसेषु श्रीसमर्थ-रामदासस्य मराठी-भाषीयं कमपि चरित्र-ग्रन्थम् अहम् अपठम्। श्रीरामदासविरचितस्य दासबोधग्रन्थस्य पारायणं च प्रत्यहं स्नात्वा परमश्रद्धया अकरवम्। एवं श्रीरामदास-श्रद्धापर-वशतया रामदासस्तुति-विषयः कोऽपि संस्कृतश्लोकः मया एकस्मिन् दिने अनायासेनैव विरचितः। मालिनीवृत्तनिबद्धः स मे प्रथमः श्लोकः सांप्रतं नावतरति स्मरण-सरणीम्। एवं तदानीं माध्यमिक-विद्यालये सप्तम-कक्षायाः छात्रस्य मे संस्कृत-कवितारम्भः श्रीसमर्थ-रामदास-स्तुति-पद्येन समभवत्।

स्वातन्त्र्यप्राप्त्यर्थं राष्ट्रधुरन्धरैः प्रवर्तितः संघर्षः तेषु दिवसेषु शुष्केन्धनाग्निवत् यथाक्रमं प्रवर्धमान इव आसीत्। लोकोत्तेजनार्थं शिवराजस्य

वीरचरितं स्थाने स्थाने प्रगीयते स्म। पुण्यपत्तनवास्तव्यः खाडिलकर-नामधेयः कश्चन "शाहीरः" (कविरिति संस्कृतभाषायाम्) नागपुरम् आगत्य स्थाने स्थाने शिवचरित्र-विषयाणि वीरगीतानि (पोवाडे इति मराठी-भाषायाम्) महता आवेशेन उच्चैः गायति स्म। तेषां वीरगीतानां भूयः श्रवणेन उन्मनस्क इवाहमासम्। श्री. खाडिलकर-विरचितानि तानि सर्वाणि वीरगीतानि मया शीघ्रमेव कण्ठस्थीकृतानि। अफजलखानवधम् अधिकृत्य विरचितं तदीयं वीरगीतं नितान्तं खलु मे प्रियमासीत् यथावसरं च एतानि वीरगीतानि वयस्यमण्डले उच्चैर् अहम् अगायम्।

१९२७ तमे ख्रिस्ताब्दे राष्ट्रिय-स्वयंसेवक-संघेन समं प्रथमः परिचयो मेऽभवत्। संघधुरीणानां व्याख्यानेषु शिवाजिचरित्रविषया नानाविधा ऐतिहासिक्य आख्यायिका अनैतिहासिक्यश्च कथा मयाऽश्रूयन्त। संघकार्यकर्तृषु अण्णा सोहनी-नामधेयः व्यायामविद्याविशारदः परमोत्साह-बल-संपन्नः कश्चन तरुणः कार्यकर्ता तदानीं नागपुरे आसीत्। अनेन महानुभावेन सह दृढः खलु मे परिचयोऽभवत्। स हि ऐतिहासिक-कथा-निवेदन-कर्मणि बाढं प्रवीण आसीत्। बालकानां भावोद्दीपने असाधारणं तस्यासीत् कौशल्यम्। शिवचरित्रानुबद्धा नानाविधा वीराद्भुत-कथाः प्रत्यहम् अनुभूता इव स मह्यं बहुशो निवेदयति स्म।

अथैकदा मया पृष्टम् "कथं भवान् शिवाजिचरित्रविषयम् एतत् सर्वं जानाति? अपि भवान् तस्मिन् समये स्वयमासीत्।"

सोऽब्रवीत् "ओम्! आसमहं तदानींतने काले साक्षात् शिवच्छत्रपतेः अश्वभूतः।" एतद् हि वाक्यं तेन तथा खलु उच्चारितं यथा तत्र बालस्य मे द्रढीयानभवद् विश्वासो दीर्घकालपर्यन्तम्।

नागपुरे दादाशास्त्री कायरकर-नामधेयः कश्चन सुविश्रुतः कीर्तन-कला-कोविदः तेषु दिवसेषु स्वीयेन कथानिवेदन-कौशल्येन नितान्तं लोकप्रियतां प्राप। स हि महानुभावः कीर्तनावसरेषु महाराष्ट्रेतिहासगतानि 'आख्यानानि' अतीव रोचकतया वर्णयति स्म। तत्र च शिवचरित्र-संबन्धीनि विविधानि आख्यानानि भृशं खलु मह्यम् अरोचन्त। नैकवारं श्री. दादाशास्त्रि कायरकर-महाभागस्य कीर्तनानि श्रावं श्रावं मया शिवचरित्ररसपानं बाल्ये वयसि कृतमासीत्।

१९३० तमे ख्रिस्ताब्दे त्रिशततम-शिवजन्ममहोत्सव-निमित्तं महाराष्ट्रस्थ-बालकानां प्रियतमया 'आनन्द'-नाम-मासिक-पत्रिकया कश्चन सचित्रः शिवाजिविशेषाङ्कः प्रकाशितः। दृष्टमात्र एव स शिवाजि-विशेषाङ्कः नितान्ततृषितेनेव मया नैकवारम् समग्रतया नूनं निपीतः। अतः पूर्वं न मया सविस्तरं शिवचरित्रं क्वचिदपि पठितुम् अलभ्यत।

Scanned by CamScanner

वीरचरितं स्थाने स्थाने प्रगीयते स्म। पुण्यपत्तनवास्तव्यः खाडिलकर-नामधेयः कश्चन "शाहीरः" (कविरिति संस्कृतभाषायाम्) नागपुरम् आगत्य स्थाने स्थाने शिवचरित्र-विषयाणि वीरगीतानि (पोवाडे इति मराठी-भाषायाम्) महता आवेशेन उच्चैः गायति स्म। तेषां वीरगीतानां भूयः श्रवणेन उन्मनस्क इवाहमासम्। श्री. खाडिलकर-विरचितानि तानि सर्वाणि वीरगीतानि मया शीघ्रमेव कण्ठस्थीकृतानि। अफजलखानवधम् अधिकृत्य विरचितं तदीयं वीरगीतं नितान्तं खलु मे प्रियमासीत् यथा-वसरं च एतानि वीरगीतानि वयस्यमण्डले उच्चैर् अहम् अगायम्।

१९२७ तमे ख्रिस्ताब्दे राष्ट्रिय-स्वयंसेवक-संघेन समं प्रथमः परि-चयो मेऽभवत्। संघधुरीणानां व्याख्यानेषु शिवाजिचरित्रविषया नाना-विधा ऐतिहासिक्य आख्यायिका अनैतिहासिक्यश्च कथा मयाऽश्रूयन्त। संघकार्यकर्तृषु अण्णा सोहनी-नामधेयः व्यायामविद्याविशारदः परमोत्साह-बल-संपन्नः कश्चन तरुणः कार्यकर्ता तदानीं नागपुरे आसीत्। अनेन महानुभावेन सह दृढः खलु मे परिचयोऽभवत्। स हि ऐतिहासिक-कथा-निवेदन-कर्मणि बाढं प्रवीण आसीत्। बालकानां भावोद्दीपने असाधारणं तस्यासीत् कौशल्यम्। शिवचरित्रानुबद्धा नानाविधा वीराद्भुत-कथाः प्रत्यहम् अनुभूता इव स मह्यं बहुशो निवेदयति स्म।

अथैकदा मया पृष्टम् "कथं भवान् शिवाजिचरित्रविषयम् एतत् सर्वं जानाति? अपि भवान् तस्मिन् समये स्वयमासीत्।"

सोऽब्रवीत् "ओम्! आसमहं तदानींतने काले साक्षात् शिवच्छत्रपतेः अश्वभूतः।" एतद् हि वाक्यं तेन तथा खलु उच्चारितं यथा तत्र बालस्य मे द्रढीयानभवद् विश्वासो दीर्घकालपर्यन्तम्।

नागपुरे दादाशास्त्री कायरकर-नामधेयः कश्चन सुविश्रुतः कीर्तन-कला-कोविदः तेषु दिवसेषु स्वीयेन कथानिवेदन-कौशल्येन नितान्तं लोक-प्रियतां प्राप। स हि महानुभावः कीर्तनावसरेषु महाराष्ट्रेतिहासगतानि 'आख्यानानि' अतीव रोचकतया वर्णयति स्म। तत्र च शिवचरित्र-संबन्धीनि विविधानि आख्यानानि भृशं खलु मह्यम् अरोचन्त। नैकवारं श्री. दादाशास्त्रि कायरकर-महाभागस्य कीर्तनानि श्रावं श्रावं मया शिव-चरित्ररसपानं बाल्ये वयसि कृतमासीत्।

१९३० तमे ख्रिस्ताब्दे त्रिशततम-शिवजन्ममहोत्सव-निमित्तं महा-राष्ट्रस्थ-बालकानां प्रियतमया 'आनन्द'-नाम-मासिक-पत्रिकया कश्चन सचित्रः शिवाजिविशेषाङ्कः प्रकाशितः। दृष्टमात्र एव स शिवाजि-विशे-षाङ्कः नितान्ततृषितेनेव मया नैकवारम् समग्रतया नूनं निपीतः। अतः पूर्वं न मया सविस्तरं शिवचरित्रं क्वचिदपि पठितुम् अलभ्यत।

Scanned by CamScanner

वयसः १४ तमे वर्षे मया चित्रकलायाः किमपि प्राथमिकं ज्ञानं प्राप्तम् । चित्रकलाध्यापकेन हि आरम्भ एव शिवरायस्य रेखाचित्रम् अस्मत्पुरतः स्वाध्यायार्थम् आलिखितम् ।

तत्र शिवराजचित्रालेखने किमपि नैपुण्यं प्राप्तवता मया सर्वेषु पुस्तकेषु गृहभित्तिषु च इतस्ततः शिवराजस्य चित्राणि आलिखितानीति स्मर्यते ।

शिवचरित्र-संबद्धानि शिवनेरी-सिंहगड-रायगड-प्रतापगड-प्रमुख्यानि दुर्ग-स्थानानि समक्षं द्रष्टुं तीव्रप्रेरणा मनसि काले काले उदभवत् । परं स मे मनोरथः क्षुद्रतरङ्गवत् उदितमात्रोऽस्तमगच्छत् । चित्रपटगृहे शिवचरित्र-दर्शनावसरे तानि तीर्थीभूतानि स्थानानि कदाचनावलोक्य शुक्तिकादर्शनेन रजतदर्शनस्येव आनन्दो मयाऽधिगतः ।

श्री. दु. आ. तिवारी-नामधेयेन कविना विरचितानि महाराष्ट्र-संग्राम-गीतानि तदानीं महाराष्ट्रे सर्वत्र नितान्तं लोकप्रियाणि आसन् । चित्रकला-परीक्षायां लब्धप्रावीण्याय मे "मराठ्यांची संग्राम गीते" इत्याख्यं तदीयं काव्यपुस्तकं विद्यालयेन उपहारीकृतम् । अल्पीयसैव कालेन तत्रत्यानि प्रायः सर्वाणि संग्रामगीतानि मया आत्मसात् कृतानि । कवितागायने मम पितृचरणानामपि आसीत् काचिदभिरुचिः । ते हि सायंतनं सन्ध्यावन्दनं समाप्य दोलामधिष्ठाय तानि सङ्ग्रामगीतानि सस्वरं गायन्ति स्म । अहमपि दोलार्धासनमधिष्ठाय तैः साकं गानरसम् आस्वादयम् ।

स्वातन्त्र्यवीर-सावरकरस्य राष्ट्रीयगीतेषु

"हे हिन्दुशक्तिसंभूत दीप्ततम तेजा ।
हे हिन्दु नृसिंहा प्रभो शिवाजी राजा ।"

इत्येतत् शिवस्तवनं नितान्तम् प्रियतया विहार-शय्यासन-भोजनेषु नैकवारम् अहम् अगायम् ।

एवं भूयः श्रवणमनन-वाचनादिभिः मया बाल्ये एव वयसि काचन आध्यात्मिकी शिव-समीपता समासादिता । तथैव शिवचरित्र-कवनप्रेरणापि रूढमूलेव वल्लरी क्रमशोऽन्तःकरणे प्रावर्धत । १९३६ तमे खिस्ताब्दे शालान्तपरीक्षाम् उत्तीर्णस्य मे मनसि शिवकाव्य-लेखन-प्रेरणा कामपि तीव्रताम् आप । तदा संस्कृत-काव्यलेखनासमर्थतया मराठी-भाषयैव कानिचन शिवचरित्रविषयाणि पद्यानि मया व्यरच्यन्त । एतावता कालेन संस्कृतभाषाध्ययनेन साकं संस्कृतकाव्य-ग्रन्थ-नैपुण्यम् अपि क्रमशः प्रावर्धत । षोडश-वर्ष-देशीयस्य शालान्त-( मॅट्रिक )-परीक्षोत्तीर्णस्य

छात्रस्य मे प्रसंगविशेषोचित-संस्कृत-काव्य-ग्रथन-कौशलं चकिता इव ज्ञानवयोज्येष्ठा अपि केचन महानुभावाः भृशं प्राशंसन्। एतेषु प्रशंसकेषु गुरुवर्य-महामहोपाध्याय डॉ. वा. वि. मिराशी, आचार्य सरस्वतीप्रसाद-चतुर्वेदी, वैयाकरणधुरीण रा. ब. नारायण दाजीबा वाडेगावकर इत्यादीनां मत्पूजनीयानां विद्वद्वरेण्यानां परितोषवचनैः नितान्तं द्रढिमानं भजमानो मामकीनः संस्कृत-कवित्व-विश्वासः संस्कृत-काव्य-कलोपासनायाम् एव मदन्तःकरणम् अरमयत।

१९३६ तः १९३८ वर्षपर्यन्तम् उच्चाध्ययनार्थं धनादि-पर्याप्त-साधनाभावेन नागपुरस्थे अन्धविद्यालये अध्यापककर्मणि सर्वोऽपि मे कालो व्यतीतः। तत्र च विद्यालये रुग्णच्छात्र-परिचर्यादि-कार्यान्तर-बाहुल्येन संस्कृताध्ययनं सर्वथा स्थगितम् इवासीत्। १९३८ तमे वर्षे नागपुर-विश्वविद्यालयस्य माध्यमिकीं परीक्षां ( इण्टरमीजिएट ) कथमपि उत्तीर्य पुनश्च अग्रिमम् अध्ययनं मया प्रारभ्यत। अस्मिन् संवत्सरे संस्कृत-काव्यरचना-नैपुण्यं सहसैव मयि प्रावर्धत। मन्दोर्मिमालाख्ये मदीये काव्य-सङ्ग्रहे प्रकाशितानि प्रायः सर्वाणि सुभाषित-प्रायाणि काव्यानि मया अस्मिन्नेव वर्षे विरचितानि। तदानीम् एव शिवराजस्तवनं नाम शार्दूल-विक्रीडितच्छन्दोनिबद्धं स्वतत्रं स्तोत्र-काव्यं मया विरचितम् आसीत्। मन्दोर्मिमालायां तन्मुद्रितं वर्तते।

एतदनन्तरं अतिदीर्घकालपर्यन्तं नानाविध-कार्य-व्यापृत-मनस्कतया संस्कृत-काव्यलेखनोद्यमो मे सर्वथा खण्डितोऽभवत्। किंबहुना संस्कृता-ध्ययनेऽपि कुण्ठितत्वम् इवापतितम्। इच्छन्नपि काव्यग्रथनं कर्तुं तदानीं नापारयम्। संस्कृतकवित्वशक्तिर्मे केनापि आधिदैविकेन कारणेन सर्वथा अस्तंगतेति मम विश्वासोऽजायत।

१९५८ तमे ख्रिस्ताब्दे नागपुर-विश्वविद्यालयस्य तदानींतनेन कुलगुरुणा श्रीमङ्गलमूर्तिमहोदयेन जवाहरलाल-नेहरुमहाभागस्य जन्म-दिनोत्सवः समायोजितः। तस्मिन्नुत्सवावसरे तं महानुभावम् उद्दिश्य विरचितं किमपि संस्कृतकाव्यं प्रगेयम् इति संकल्पस्तन्मनसि समुच्छ-लितः। नागपुर-विश्वविद्यालयस्य प्रायः सर्वेऽपि संस्कृताध्यापकाः स्वीये कार्यालये निमन्त्र्य कुलगुरुणा विदितात्मसंकल्पाः कृताः। मदीयं संस्कृत-कवित्वं विजानद्भिः प्राध्यापक-सुहृद्भिः अयं संस्कृतकाव्य-रचनाभारो मदुपरि सहसैव विन्यस्तः।

अथात्मनः कवित्व-शक्ति-विलये दृढश्रद्धोऽहं कथम् इदं दायित्वं निभालयेयम् इति चिन्ताकुलचेता आसम्। अन्यदपि तत्र कारणम् आसीत्। श्री. जवाहरलाल-नेहरुमहाभागानाम् अनन्यसामान्यं श्रेष्ठत्वं जानन्नपि

Scanned by CamScanner

तदीयानि राजनैतिकमतानि नासन् मम संमतानि। कवित्वप्रवीणोऽपि कश्चिद् नाश्रद्धेयं विषयं अधिकृत्य सरस-काव्यलेखनं कर्तुं प्रभवतीति मम विश्वासः। एवं च नेहरुविषयकं संस्कृत-काव्यं कर्तुं नाहं शक्नुयाम् इति निश्चयेऽपि परमास्थया तदीयं जीवितं सौहार्देन हृदि निध्याय कतिपयैरेव अहोभिः जवाहरतरङ्गिणी नाम शतश्लोकी मया बत विरचिता। काव्य-नायकचरित्रं सम्यग् विजानद्भिः लोकनायक-बापूजी-अणेमहाभागैः खण्डकाव्यम् इदं पठित्वा परम-सन्तोषोल्लसित-चेतस्कतया द्राघीयसी आङ्ग्लभाषीया प्रस्तावना विलिखिता। मत्काव्यनायक-भूतेन राष्ट्र-नायकेन श्री. जवाहरलाल-महाशयेनापि आत्मविषयकं संस्कृतकाव्यम् आङ्ग्लभाषानुवादसहायेन पठित्वा पत्रप्रेषणेन सन्तोषः प्रकटीकृतः।

एवं चिरायास्तंगता संस्कृत-कवित्व-शक्तिः अनेन निमित्तेन पुनरपि मां प्रत्यागतेति अनुभूय महान् मे सन्तोषः समजायत। अस्याम् एव मनोवस्थायां विनायक-वैजयन्ती, रामकृष्ण-परमहंसीयम्, कालिदास-रहस्यम्, वात्सल्य-रसायनम् इत्यादीनि प्रत्येकं शतश्लोकानि, कतिपय-खण्डकाव्यानि शीघ्रकविनेव मया नचिराद् विरचितानि। जगद्गुरु शंकराचार्य-श्रीभारतीकृष्णतीर्थ-प्रमुखैः विद्वद्रसिकवरेण्यैः मदीयानि एतानि खण्डकाव्यानि नितरां प्रशंसितानि। तदेवं विदुषां परितोषेण विजृम्भितात्म-कवित्व-विश्वासस्य मे बाल्यादेवाङ्कुरितः शिवराज-चरित्रविषयक-महाकाव्य-लेखन-संकल्पः प्रवर्षणोद्वृत्त-सरित्-प्रवाहवत् सहसैव प्रबलोऽभवत्। तदानीं मद्विरचितस्य स्वातन्त्र्यवीर-शतककाव्यस्य प्रकाशनोत्सवः नागपुरस्थ-विदर्भ-साहित्य-संघ-सभालये सुहृज्जनैः समा-योजितः। तत्र भाषणावसरे गुरुवर्य-महामहोपाध्याय डॉ. मिराशीमहो-दयैः तथा म. म. बाळशास्त्रि-हरदास-महोदयैश्च स्वीये भाषणे "वर्णेकर-महाशयैः अतःपरं शिवाजि-चरित्रविषयकं महाकाव्यं लिखितव्यम्" इति समादिष्टम्। चिराय हृदय-निहितम् आत्म-संकल्पम् एवम् अन्यमुखाद् आकर्णयन् साश्चर्यम् अहम् आनन्दितः। तत्रैव सभायां महाकाव्य-लेखनम् अद्यैव समारप्स्ये इति मनसि मया निश्चितम्। रात्रौ गृहं प्रत्यागत-मात्रेण मया सह्याद्रि-वर्णनपरः प्रथमः सर्गः लिखितुम् आरब्धः। स हि सर्गः पूर्वं हृद्गत इव सहसैव मम लेखनीतः बहिर्निःसृतः। अत्यल्पीयसैव कालेन विरचितं तं सर्गं पठित्वा स्वयम् अहम् अपि किमप्याश्चर्यम् हृदयेऽन्वभवम्। सोऽयं प्रथमः सर्गः संस्कृत-साहित्य-रसिकेभ्यः केभ्य-श्चित् सुहृद्वरेभ्यो मया श्रावितः। तेषां परितोषेण प्रोत्साहितेन मया अग्रिमा द्वित्राः सर्गाः तथैव शीघ्रतया संपूर्णतां नीताः।

अस्मिन्नेव समये धम्मपदस्य पद्यानुवादकरणे तीव्रा प्रेरणा सहसैव हृदये समुदभवत् । अर्वाचीन-संस्कृत-साहित्य-विषयक-प्रबन्धलेखनम् अपि संपूर्णतां नेयमासीत् । तदर्थं भूयसां विविधग्रन्थानां पर्यालोचने दत्तचित्ततया तथैव विविध-सार्वजनीन-कार्यकलाप-व्यापृततया महाकाव्यविषय-चिन्तनार्थं चित्तैकाग्रतां संपादयितुं समय एव नालभ्यत । यथावसरं च कदाचित् प्रबन्धलेखनं, कदाचिद् धम्मपद-पद्यानुवाद-लेखनं कदाचिच्च साप्ताहिक-मासिक-पत्रिकार्थं निबन्धादि-लेखनं कृत्वा अवशिष्टावसरेषु महाकाव्यस्यापि लेखनम् अक्रियत । शिवचरित्रविषयाणि कानिचित् पुस्तकानि एषु दिवसेषु पठितुम् आसादितानि । तदानीम् एव पुण्यपत्तन-वासिना श्री. ब. मो. पुरन्दरेमहाशयेन लिखिता "राजा शिवच्छत्रपति-" नाम्नी मराठी-पुस्तक-माला प्रकाशम् आगतेति ज्ञातम् । श्री. पुरन्दरेमहाशयस्य शिवचरित्रविशेषज्ञता पूर्वमेव मे विदितासीत् । "राजाशिवच्छत्रपति"-सदृशं परमहृदयङ्गमं शिवचरित्रं न मया क्वापि विलोकितम् । तच्चरित्रविषयकः स्वाभिप्रायः मया श्री. पुरन्दरेमहाशयाय पत्रेण निवेदितः । अतःपरं तमेव चरित्रग्रन्थं प्रमाणीकृत्य स्वीयं महाकाव्यं लिखिष्यामीति मया निश्चितम् ।

महाकाव्यम् इदं दशभिः पञ्चदशभिर्वा सर्गैः समाप्तिं यास्यतीति आरम्भावसरे मम तर्क आसीत् । परं यथा यथा श्रीशिवचरित्रावगाहनं कृतं तथा तथा स मे तर्कः प्रामादिक इति मयाऽनुभूतम् । शिवराजस्य स्वातन्त्र्यप्रतिज्ञान्तं चरित्रं नवमे सर्गे समाप्तम् । तदानीं नागपुरीये श्रीदक्षिणामूर्ति-मन्दिरे केषाञ्चित् शिवचरित्र-विशेषविदां संस्कृतानुरागिणां महानुभावानां सभायां रचितमात्रं महाकाव्यं मया पठितम् । तेषां श्रवणरसिकानां परितोषेण सर्वथा समुचितोयं ममोद्यम इति मतिः स्थिराऽभवत् ।

१९५९ खिस्ताब्दस्य सप्टेम्बरमासारम्भे १७ तमः सर्गः समाप्तिम् अगच्छत् । ततःपरम् अफझलखान-वध-प्रकरण-वर्णनार्थं प्रतापदुर्ग-दर्शनस्य मया आवश्यकतानुभूता । अदृष्ट्वैव तं दुर्गम् अग्रिमा काव्यरचना न संभवतीति मयाऽनुभूतम् । एवं प्रतापदुर्गदर्शनाभावेन काव्यलेखनं स्थगितमिव सर्वथा । भाग्यवशात् तस्मिन् वर्षे श्रीशिवपुण्यतिथिनिमित्तं रायगडं प्रति निमन्त्रितोऽहम् रायगडात् प्रत्यागमनावसरे प्रतापदुर्गावलोकनं सम्यक् कृतम् । तत्रत्या ऐतिहासिकी घटना च मनश्चक्षुषा साक्षात्कृता । नागपुरं प्रत्यागत्य प्रदीर्घकालं खण्डितप्रायं महाकाव्यलेखनं पुनरपि समारब्धम् । अतःपरं काव्यलेखनं निर्विघ्नतया आन्तम् अखण्डितं प्रवर्तताम् इति भावनया अष्टादश-सर्गारम्भे द्वितीयं मङ्गलाचरणं विलिखितम् ।

२९ तमे सर्गे अफझलखान-वधकथा समाप्तिं गता। अतःपरं चत्वारिंशन्मात्रैः सर्गैः समग्रं महाकाव्यं समाप्तिं यास्यतीति मे तर्क आसीत्।

"आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्" इतीयं कालिदासोक्तिः नूनं तस्यात्मानुभूतिं द्योतयति। अपूर्णमपि आत्मनो महाकाव्यं कस्यचिद् संस्कृतकाव्यमर्मज्ञस्य पुरस्तात् पठितुं सदैवाहं प्रयत्नशील आसम्। डॉ. ग. त्र्यं. देशपाण्डे, डॉ. वि. वा. करंबळेकर, डॉ. ग. बा. पळसुले, प्राचार्य अ. दा. आठवले, म. म. दत्तोवामन पोतदार, म. म. डॉ. वा. वि. मिराशी, म. म. बाळशास्त्री हरदास, पू. मा. स. गोळवलकर-गुरुजी, प्राचार्य वा. बा. भागवत, आचार्य द्विजेन्द्रनाथशास्त्री, डॉ. वा. शि. बालिङ्गे, श्री. स. ना. कुलकर्णी, पं. वसन्तराव गाडगीळ, डॉ. नी. र. वऱ्हाडपाण्डे, श्री. वि. वि. इनामदार प्रभृतीनां संस्कृतकाव्यरसिकानां श्रीशिवराज-चरित्र-मर्मविदां मत्परिचितानां महानुभावानां पुरस्ताद् यथावसरं यावच्छक्यं महाकाव्यम् इदं मया परिशीलितम्। सर्वैरप्येभिः महानुभावैः सौहार्देन महाकाव्यरचनाप्रयासो मे प्रशंसितः। तेन प्रोत्साहितोऽहं नियतलेखने सोत्साहोऽभवम्।

महाराष्ट्रशासनस्य साहित्यसंस्कृतिमण्डलस्य अनुदानादिसाहाय्येन महाकाव्यस्यास्य प्रकाशनं भवतु इत्येतदर्थम् अस्मद्-गुरुवर्यैः म. म. डॉ. मिराशीमहाभागैः कश्चित् प्रयत्नः कृतः। परं संस्कृतभाषीयत्वादस्य ग्रन्थस्य, मराठीभाषैकनिष्ठं महाराष्ट्रशासनस्य साहित्य-संस्कृति-मण्डलम् प्रकाशनार्थं किमपि साहाय्यं दातुम् असमर्थम् आसीत्।

पं. वसन्तराव गाडगीळमहाशयेन अकिंचनेन असहायेनापि प्रकाशन-दायित्व-भारः परमात्मीयतया उररीकृतः। शारदाख्य-पाक्षिक-पत्रिकायाम् अनियतरूपेण तेन शिवराज्योदयस्य मुद्रणं समारब्धम्। तदैव जयपुरतः प्रकाश्यमानायां भारती-पत्रिकायामपि प्रतिमासं प्रकाशनम् अस्मत्-सुहृद्वर्येण श्री. गिरिराजशर्मणा समारभ्यत। एवं शारदा-भारती-पत्रिकयोः क्रमशोऽस्य महाकाव्यस्य प्रकाशनं समकालं चतुष्पञ्चवर्षाणि प्रावर्तत।

आरम्भत एव राज्याभिषेकान्तं शिवचरित्रं वर्णयिष्यामीति मे संकल्प आसीत्। चिरादस्तमितः विक्रमार्जित-स्वायत्त-राज्याभिषेक एव महापुरुषस्यास्य अद्भुत-रमणीये वीर-चरिते परमोत्कर्षास्पदम्। अतः राज्याभिषेकान्तमेव चरित्रं काव्येऽस्मिन् वर्णितम्। तदग्रिमश्चरित्रवृत्तान्तो हि तच्चरित्रपरेषु ग्रन्थान्तरेषु वर्णितः रमणीयोऽपि न महाकाव्यग्रथनोचित इति मे मतिरासीत्। एवं राज्याभिषेकान्तं चरित्रं शिवराज्योदयेऽस्मिन् वर्णितम्।

शिवराज्याभिषेकस्य इत्थंभूतं वर्णनं श्रीगागाभट्ट-काशीकर-विरचिते तदानींतने श्रीशिवराज्याभिषेक-प्रयोगविधिनाम्नि संस्कृतग्रन्थे समुपलभ्यते। तद्वर्णनस्यैव काव्यमयतया यथास्थितम् एव तद् उपमोत्प्रेक्षादिभिरनलङ्कृत्य मया केवलम् अन्ते स्वशब्दैर्निवेदितम्। ६८ तमे सर्गे राज्याभिषेकविधिवर्णनेन साकमेव महाकाव्यमिदं मया समाप्तिं नीतम्।

न यस्य करुणां विना स्फुरति दिव्यधाम्नां निधिः
न वक्ति स गिरांपतिर्न च सदागतिर्गच्छति।
प्रबन्धपरिपूरणे विकलशेमुषीकस्य मे
स एव करुणाघनः सकलकारणं कारणम्॥

इत्येव मे द्रढीयसी श्रद्धा। एवं भगवत्कृपया अविघ्नं संपूर्णतां गतमिदं शिवराज्योदयं महाकाव्यं सर्वेषां संस्कृत-साहित्य-रसिकानां प्रीतये कल्पताम् इति साञ्जलिबन्धं प्रार्थये।

चरितं शिवराजस्य विजयश्रीविराजितम्।
वीराद्भुतरसं पुण्यं रामायणमिवापरम्॥ १॥
सर्वमङ्गलमाङ्गल्यं शिवं सर्वार्थसाधनम्।
सर्वाश्चर्यमयं दिव्यमगाधं विश्वतोमुखम्॥ २॥
सद्धर्मनिष्ठकामार्थं दुर्दास्योन्मोक्षसाधनम्।
निधानं पुरुषार्थानां निदानं शक्तिसंपदाम्॥ ३॥
राष्ट्रस्वातन्त्र्यनिष्ठानां देशभक्तिमयात्मनाम्।
दुर्दास्यहतसत्त्वानां संजीवनरसायनम्॥ ४॥
शत्रुमित्रायुक्तायुक्तकार्याकार्यविवेचने।
स्वादुकाव्यरसोन्मिश्रं नीतिशास्त्रमिवोत्तमम्॥ ५॥
रामकृष्णार्जुनादीनां विभूतीनां महौजसाम्।
यद्यदूर्जस्वलं किञ्चित् तत् सर्वमिह पिण्डितम्॥ ६॥
वीरता साधुतोपेता साधुता चातुरीयुता।
चातुरी लोकमाङ्गल्या चरितेऽस्मिन् विराजते॥ ७॥
तन्मया परया भक्त्या कविताविषयीकृतम्।
संप्रीतयेऽस्तु सर्वेषां सज्जनानां निरन्तरम्॥ ८॥

जन्माष्टमी
शके १८९१
(४ सप्टेम्बर १९६९)

डॉ. श्रीधर भास्कर वर्णेकर
अभ्यंकरनगर, नागपुर – ३

Scanned by CamScanner

शारदा-गौरव-ग्रन्थमाला ... ८

# श्रीशिवराज्योदयम्

महाकविः
डॉ. श्रीधर भास्कर वर्णेकर
M.A.,D.Lit.

★

मूल्यं १४० रूप्यकाः

Scanned by CamScanner

प्रकाशकः
पं. वसन्त अनन्त गाडगीळ
शारदा-गौरव-ग्रन्थमाला
४२५ सदाशिवपेठ, पुण्यपत्तनम् ३०

* * *

प्रथमावृत्तिः
श्रीशिवजयन्त्युत्सवः
शिवशकः २९८, ख्रि. १९७२

* * *

सर्वाधिकाराः प्रकाशकायत्ताः

* * *

मुद्रकः
पं. वसन्त अनन्त गाडगीळ
श्रीशारदा-मुद्रण-सिद्धि-मन्दिरम्
४२५ सदाशिवपेठ, पुण्यपत्तनम् ३०
यशवन्त-मुद्रणालयः
१८३५, सदाशिवपेठ, पुण्यपत्तनम् ३०

Scanned by CamScanner

शिवराजेन वीरेण
मनोवाक्कायकर्मभिः ।
अर्चितायार्प्यते भक्त्या
देवाय जनतात्मने ॥

Scanned by CamScanner

## कृती भविष्यति वर्णेकरसूरिः ।

प्रतिबिम्बित-मनुज-सुलभ-गुणदोषजाते पञ्चषसहस्रवर्षावधिमात्र-स्पष्टरूपरेखे मनुष्यजातीतिहासक्रमे विरलानुपाता एवाविर्भावा महापुरुषाणाम्। तत्र केचन धर्मानुशासन-शोधित-स्वान्ताः केचिद् विज्ञानसिद्ध्युद्भासित-दिगन्ताः केस्विच्च स्वपराक्रमनिरस्त-पारतन्त्र्यध्वान्ताः समवृतन्। चरमकोटिसमाविष्टास्तत्र कराङ्गुलिमेयसंख्या एव ते येषु समन्वय उपलभ्यो गुणविशेषाणां वीरता-साधुता-चातुरी-सर्वजनक्षेमपरता-प्रभृतीनाम्। एतेषु धुरीणाग्रेसर-नर-केसरिषु निःसन्देहम् अग्रगण्यः पुण्यश्लोकः श्रीमत्-शिवच्छत्रपतिः। किमत्र चित्रं यत्तद्गुणैः कर्णमागत्य डॉ. श्री. भा. वर्णेकरः कविर्न चापलाय–किन्तु दशहायनाधिकायत-महाकाव्य-प्रणयन-व्यवसायाय प्रचोदितः। दिष्टया फलेग्रहिरभूदयं द्राघीयान् व्यायासः प्रकाशनोन्मुखश्च सहृदयानां समक्षम्। तस्येदं प्राक्कथनं मत्तोऽभिजग्मिवान् कविर्माम् अतितरां समभावयत्।

पुरः स्थापितं सहृदयानाम् इदं श्रीशिवराज्योदयं महाकाव्यं वर्णेकरस्य द्विपञ्चाशदधिकाष्टशताधिक-त्रिसहस्रपदमितम् ( ३८५२ ) अष्टषष्टिसर्गायामवन्न केवलं काव्यस्य परन्तु महाकाव्यस्यापि तांस्तान् विदग्धवर्णितान् गुणान् सम्यक् पुष्णाति। संस्फूर्तिर्भावानाम् उत्कट उन्मेषः प्रतिभाविष्कारश्चारुपद-विन्यासः सदुपमार्थान्तरन्यासाद्यलङ्कार-प्राचुर्यं सर्वम् इदम् उपलभेत सहृदयः पठितास्यां कृतौ। तत्रापि कविनाश्रिता वैदर्भीरीतिरतीव साम्प्रता समुल्लसति पदे पदे। यथाह कविरेकः —

> " अनभ्रवृष्टिः श्रवणामृतस्य सरस्वतीविभ्रमजन्मभूमिः ।
> वैदर्भरीतिः कविनामुदेति सौभाग्यलाभप्रतिभूर्जनानाम् ॥ "

यथाह भवभूतिः–" कालो ह्ययं निरवधिर्विपुला च पृथ्वी । " शनैः शनैरस्तङ्गामिनि सुरभारतीप्रणये भारतेऽद्यतने महाकाव्यस्यास्यानवद्य-पद्यस्य न विद्येरन् आस्वादयितारो रसिकाः पर्याप्तसंख्याः कामम्। द्रढीयान् पुनर्मम विश्वासो यदचिरादेवोक्षितकालस्थलसीमां कृतिमात्मनः सर्वतोविसारि-रसिक-मण्डलं रञ्जयित्वा संस्कृत-साहित्य-प्राङ्गणे लब्धवर्णाम् आलोक्य कृती भविष्यति वर्णेकरसूरिः।

हैदराबाद दि. ९।१।७२ **चि. द्वा. देशमुख**

Scanned by CamScanner

## महाकवि:

श्री भा वर्णेकर

Scanned by CamScanner

# साऽऽवधानम् ! साऽऽवधानम् !!

आदिष्टोऽस्मि शारदाकारैः डॉ. वर्णेकराणाम् इदं महाकाव्यं प्रस्तोतुम् । कस्य केन संबन्धः? न वर्णेकराणां परिचयस्य आवश्यकता, न ममात्र अधिकारः । प्रसिद्धा हि सिद्धवाचो वर्णेकराः । कोऽहं तेषां प्रस्तावनस्य ? तथापि मन्ये, अनेकप्रकारका: प्रस्तावका: । प्रायः कश्चित् ज्येष्ठः कनीयांसं पुरस्करोति । क्वचित् तु हीनोऽपि उत्तमं परिचाययति, यथा 'एष प्रविशति प्रौढप्रताप-गोब्राह्मणप्रतिपालक-महाराजाधिराज-अशेष-वसुंधरास्वयंवरपति...' इत्यादिना राजागमनम् उद्घोषयन् कश्चित् राजसेवकः । यथा वा 'एष प्रविशति परमहंसपरिव्राजकाचार्य-सर्वतन्त्रस्वतन्त्र-अद्वैतवेदान्तस्थापनाचार्य...' इत्यादिना पीठाधिष्ठितस्य आचार्यस्य आगमनम् उद्घोषयन् कश्चित् तच्छिष्यः । तावतैव अधिकारेण संतुष्यन् अहमपि उद्घोषयामि 'इदम् आविर्भवति नः पुरस्तात् महाकवीनां नैककाव्यप्रणयनलब्धवर्णानां वर्णेकराणाम् ऊर्जस्वलम्, स्फूर्तिस्फारम्, विक्रमैकरसम्, संस्कृतसंजीवनम्, शिवप्रभोश्च पावनजीवनगायनं श्रीशिवराज्योदयं नाम नवावतारं महाकाव्यम् । तदस्य समुचितस्वागतार्थं साऽऽवधानम् ! साऽऽवधानम् !!'

* * *

**'शिवराज्य'कविः स्थाने देवीं वाचम् अवीवृतत् ।**

राम-कृष्णयोः पुण्यपावनस्य चरितस्य गुणगानेनापि अचरितार्थेव आसीत् भगवती गैर्वाणी । द्वि-त्रिवारं शिवच्छत्रपतिचरितं संकीर्त्यापि अतृप्तेव आसीत् दैवी वागियम् । हिन्दुसमाजदैवतस्य अस्य महापुरुषस्य गुणसंकीर्तनेन पुनरपि आत्मानं पावयितुकामयेव तया प्रचोदिताः श्री. वर्णेकराः 'तत्पावनं शिवचरित्रमनन्यतुल्यम्' उद्गातुं प्रावर्तन्त ।

कीदृशः सः शिवाजिः ?

एकमपि स्वोपज्ञं पदम् अप्रयुज्य वर्णेकराणामेव तत्र तत्र विकीर्णैः शब्दैः पूरयितुं शक्या इयमाकाङ्क्षा । कथानायकस्य पित्रोः विवाहमङ्गलावसरे प्रयुक्ताभिः आशीभिः स्फुटं भवति यत् शिवप्रभोः भावि जन्म—

'माद्यन्म्लेच्छगणान् निहन्तुमखिलांस् त्रातुं सतीसज्जनान्
धर्मं स्थापयितुं श्रुतिस्मृतिगतं पातुं च गोब्राह्मणान् ।'( ३.७८ )
आसीद् इति ।

इदमेव तस्य जीवितकार्यम् —

'( शिवं ) स्वधर्मसाम्राज्यसंस्थापनदृढव्रतम् ।' ( १६.३८ )

‘(यतः प्रभृत्येव) नवस्वराज्यसंस्थापनैकोग्रमहाव्रतस् त्वम् ।’
(२०.३१)

इत्यादिभिः शब्दैः तत्र तत्र वर्णयति कविः ।
कथम् आसीत् बालशिवाजिः ?
‘अबालसत्त्वः’ (५.६)
‘आ बाल्यतो वीररसैकसक्तः’ (५.१९)। तथा च –
‘गोरक्षणार्थं धृतबालरूपः कृष्णः स्वयं भूमितलेऽवतीर्णः।’
(७.५२)

कथम् अदृश्यत युव-शिवाजिः ?
एवं हि अफझुल्लखानः तम् अपश्यत् —
‘आजानुबाहुं ककुदुन्नतांसं प्रसन्नशार्दूलविशालनेत्रम् ।’ (२९.३)
कीदृशी तस्य गुणसंपत् ?
शिवाजिर् हि —
‘मेरुस्थिरान्तःकरणः’ ( १३.२ )
‘निसर्गधीरः’ (१३.३०, २२.४१), ‘प्रकृतिधीर’(२२.४०),
‘धीरधुरंधरः’ (२२.४८)
‘निश्चलधैर्यशाली’ (१९.४३)
पुनश्च कीदृशः ?
‘कर्तव्यनैष्ठिकः’ (२२.४९)
‘अन्यायनिराकरिष्णुः’ (७.३०)
‘स्वजनैक्यप्रियः’ (१६.२६)
‘वदान्यशिरोमणिः’ (१४.२७)
‘सुदविष्ठदृक्’ (१४.४०; न केवलं दूरदर्शी)
‘गूढरन्ध्रो रिपुरन्ध्रदर्शी (१५.४)
अस्मात् स्फुटमेव यत् सः —
‘नीतिमर्मज्ञः’ (२२.२)
अथ वा इदमेव तस्य शत्रुदत्तं प्रमाणपत्रम् अलम् –
‘अधिराजो हि धूर्तानाम्’ (२५.२८)
तथा च तस्य आत्मसंयमः यत् –
रिपुदौरात्म्यसंतप्तोऽप्यात्मन्यात्मानमाकुलम् ।
विकर्मणः स संयेमे धर्ममेकं प्रमाणयन् ॥ (१६.२१)
अत एव —
‘प्रभूतकोपोऽपि विमृश्यकारी’ (१९.३९)
‘शृण्वन् अप्रकटीकृतात्मविकृतिर् भ्रूमात्रभङ्गैरपि।’ (२३.५२)

Scanned by CamScanner

तावांश्चास्य आत्मविश्वासः यत् स निःशङ्कम् अभिधत्ते —
‘स्वप्नेऽपि मम नोदेति पराभवविकल्पना।’ (२२.६)

यस्य च अनन्यादृशीं प्रतिभाशालितां तस्य गुरुः दादोजिः एवं समर्थयते —

‘मनुष्याणां सहस्रेषु क्वचिदेवावलोक्यते।
कार्याकार्यविवेकार्थं प्रतिभा विश्वतोमुखी॥
परमेशप्रसादेन जन्मसिद्धैव सा त्वयि।’ (११.२४, २५ अब)

कस्मात् स बिभेति, शिरो वा कुत्र नमयति स्म?

स एव आह (अफझुल्लं प्रति)—

‘आ जन्मतो नूनमहं बिभेमि श्रीरामचन्द्रादतिपूजनीयात्।
तथैव पापाचरणादधर्म्यान्नैवान्यतो जातु कुतोऽपि मर्त्यात्॥
(२९.१४)

यतः इत्थम्, अतः सः

‘निजशिरो मणिकुण्डलमण्डितम्।
यवनराजपुरः स्थितमुच्चकैरनमयद् गुरुराजपदाम्बुजे॥’ (१४.२७)

काव्यकलायाः विनियोगार्थं किं वा इतोऽन्यत् सुपात्रतरं गुणनिधानम् आसाद्येत? अथ वा, इदमेव उक्तं पर्याप्तं स्यात् —

‘शिवराज्य’कविः स्थाने देवीं वाचम् अवीवृतत्।’

* * *

**भारतीय-संस्कृतेः नेत्रदीपकः आविष्कारः।**

न तु गुणसंपत्तिमात्रनिमित्तकः शिवचरितमहिमा। स्युरपि विपुलायाम् अस्यां पृथिव्याम् एकैकस्मिन् गुणविषये शिवातिशायिनः पुरुषाः। विनियोगस्तु प्रधानम्। ध्येयार्पितजीवितस्य शिवाजेः सर्वे गुणाः स्वराज्यसंपादनैकफला आसन् इति हि विशेषः। यत्सत्यम्, साध्यसाधनविषयेऽस्मिन् शिवचरितं नाम भारतीयसंस्कृतेः उत्कृष्टं प्रतीकम्।

काऽसौ भारतीया संस्कृतिः, कथं वा सा शिवचरिते प्रतिबिम्बिताऽस्ति इत्यत्र विषये विस्तरे अप्रसज्य संक्षेपतः इदं वक्तुं शक्यम् — ‘स्वधर्मे निधनं श्रेयः परधर्मो भयावहः।’ स्वधर्मार्थं स्वराज्यम्। स्वराज्यस्थापनार्थं प्रयतमानेन पुरुषेण ऐश्वरं कार्यमिदम्, अहं निमित्तमात्रम् इति न विस्मर्तव्यम्। साधनानां च अनेकता, या न वर्जयति शत्रुविशेषसापेक्षां कुटिलनीतिं, दण्डनीतिं वा। वैयक्तिकी च चारित्र्यशुद्धिः, या कस्यामपि परिस्थितौ न हापनीया। इयं हि स्थूलतः भारतीया संस्कृतिः।

Scanned by CamScanner

भारतीय-जीवनसरणेः योऽयम् आदर्शः, यश्चायं व्यवहारः तस्य सुस्पष्टा अभिव्यक्तिर् नाम शिवाजिचरितम् । न हि शिवाजिः अकस्मात् अभवत् । यो धर्मः श्रुतिस्मृतिपुराणैर् आम्नातः, रामकृष्णादिभिः अनुष्ठितः, यश्च गच्छता कालेन मलिनीभूतः सन् काले काले उत्पन्नैः साधु-'सन्तैः' आचरितः देशभाषाभिश्च पुनरुपदिष्टः, यस्य च संस्काराः पुरुषानुपुरुषं सहस्रसहस्रसंवत्सराणि संक्रान्ताः आसन् तस्य भारतीयधर्मस्य परंपरायाश्च नेत्रदीपक आविष्कारो नाम शिवावतारः ।

मातृस्तन्येन सहैव कथमियं भारतीया जीवनपद्धतिः शिवाजिना निपीता आसीद् इत्येतत् सम्यक् प्रदर्शयन्ति वर्णकराः । प्रथितं हीदं यत् मातुरङ्कशायिना बालशिवाजिना रामायणभारतादि-कथाश्रवणं नाम । एतादृश्येव अन्यतमे प्रसङ्गे जिजामाता गोब्राह्मणरक्षणं, क्षात्रधर्मानुष्ठानं, परस्त्रीषु मातृत्वबुद्धिः, सर्वधर्मसमानत्वम् इत्यादि कर्तव्यजातम् उपदिश्य सत्याहिंसयोर् महत्त्वम् अङ्गीकृत्यापि

'मान्यः स मे यः परमो हि धर्मः परं स सापेक्षतयैव सेव्यः ।
देवद्रुहां पापकृतां खलानां जानीहि हिंसामपि तामहिंसाम् ॥'
( ५.३८ )

इति तयोः सापेक्षतां प्रतिपादयति । पुनश्च

'जहीहि भोगान् सुलभानपि त्वं भोगा हि भोगा इव पन्नगानाम् ।'
( ५.४७ )

इति भोगलम्पटतां प्रतिषिध्य

'विना जगन्नाथकृपाकटाक्षं न दिव्यकार्ये प्रभवन्ति मर्त्याः ।'
( ५.५० )

इति हेतोः भगवद्भक्तिम् उपदिश्य अन्ते एवं भव्यदिव्याम् आदर्शमालां शिवपुरतः स्थापयति —

"आपत्सु रामः, समरेषु भीमः, दानेषु कर्णश्च नयेषु कृष्णः ।
भीष्मः प्रतिज्ञापरिपालनेषु, विक्रान्तकार्येषु भवाञ्जनेयः ॥" ( ५.५६ )

इति । किमत्र चित्रम् यत् श्रुतिसूक्तायमानैः मातृवचनैर् एवं संस्कृतमतिः शिवाजिः बाल्य एव जनताया आदरस्य भाजनम् अभवत् । यतः

'ऊर्जस्वलं सुविमलं निजधर्मनिष्ठं चारित्र्यमेव जनभक्तिनिदानमेकम् ।'
( ५.५६ )

**जयत मायिनमुत्कटमायया...**

सर्वजनविदितम् इदं यत् निजायुषि अनेकेभ्यः प्राणहरेभ्यः प्रसङ्गेभ्यः शिवाजिः आत्मानं मोचयितुम् अपारयत् । तस्य कारणम् आ बाल्यात

Scanned by CamScanner

तेन आत्मसात्कृता 'शठेषु शाठ्यम्-'नीतिः। अस्याः नीतेः प्रवक्ता सुप्रसिद्धो महाराष्ट्रीयः साधुपुरुषः रामदासः शिवाजि 'कपटमेव हि कापटिकैर् वरम्', 'जयत मायिनमुत्कटमायया', 'अधमैर् अधमत्वमिहोचितम्' इत्युपदिश्य 'कुटिलनीतिमहत्त्वमतिस्फुटम्' करोति। अन्ये व्यक्तिधर्माः, अन्ये च सामाजिकधर्माः। अन्ये राजधर्माः, अन्ये च संन्यासिधर्माः। उभयोः संकरः न भारतीयसंस्कृतिलक्षणम् न वा प्राज्ञलक्षणम्।

शिवप्रभुणा यः स्वातन्त्र्यसंगरः प्रारब्धः, स पारमेश्वरीम् इच्छाम् अनुसृत्यैव। आ पारतन्त्र्यदिवसात् देवताः अपि तदेकप्रतीक्षापरा आसन्। महाराष्ट्रस्य साधु-'सन्ताः' अपि तदेकोन्मुखाः आसन्। अत एव कविर् वर्णयति– रोहिडेश्वरमन्दिरे प्रतिज्ञोत्तरम्

'आलोकयामासुरतिप्रसन्ना नभोनिलीनास्त्रिदशाः समस्ताः।
तं दिव्यभावं शिवमित्रसंघं नक्षत्रचक्षुर्भिरिवानिमेषैः॥' (१०.५)

शिवाजिना च तोरण-दुर्ग-ग्रहणेन स्वातन्त्र्यतोरणे समुच्छ्रिते, वीतरागाणां साधु-'सन्ता'नामपि मनसि काऽपि आनन्दलहरी समुल्ललास, साक्षाद् ईश्वरस्यापि च मनसि न ममुर् मुदः—

श्रीरामदासप्रमुखैश्च सद्भिः ध्यानावलग्नाक्षिभिरीक्षितान्तः।
हृत्पुण्डरीके सहसैव काचिन्नवोदिता दीपकतोरणाभा॥
जगौ तुकाराममुनिर्नवीनम् अभङ्गबद्धं जयगीतमुच्चैः।
तदा तदाकर्ण्य जहर्ष चेतः पाषाणमूर्तेरपि विठ्ठलस्य॥ (१०.२६)

एवम् आगच्छत् स 'आ पारतन्त्र्यदिवसात् प्रतिपाल्यमानः स्वातन्त्र्यभाग्यदिवसः खलु भारतस्य' (१०.४३)

यो हि
आहूतो ह्यगणितसाधुवृन्दपुण्यैः आकृष्टः समरमखार्पितस्वदेहैः।
(१०.४४)

* * *

नायकस्य औन्नत्यं, तच्चरितस्य च भव्यता इत्येतद् आवश्यकं सदपि न तदेव एकं महाकाव्य-यशसे अलम्। अन्यः इतिहासः, अन्यच्च काव्यम्। न हि निर्विकारं घटनानां पत्रार्पणं रसाय कल्पते। अपेक्ष्यते तत्र नैकविधं काव्यकौशलम्। दिष्टचा अस्यां रञ्जकतायां न मनागपि हीयते वर्णकराणाम् इदं महाकाव्यम्। न हीदं शिवचरितम् इत्येव भक्त्या पुराणवत् श्रोतव्यम्, न वा संस्कृतम् इत्येव श्रद्धया पठितव्यम्। अस्ति अस्मिन् एतद्द्वयनिरपेक्षमपि महाकाव्यत्वम्।

व्यास-समासौ तावत् निवेदकस्य निकषः। जानन्ति वर्णकराः, कुत्र

Scanned by CamScanner

संक्षेप्तव्यम्, कुत्र च विस्तरितव्यम्। बालकयोः जिजा-शहाज्योः रङ्गकेलिः जिजामात्रा बालशिवाजेः संस्कारकरणम्, तस्य विजापुरगमनं, तत्र च तेन गोघातकस्य हस्तच्छेदः, रोहिडेश्वरमन्दिरे प्रतिज्ञाकरणम्, शहाजेः कारावासः तस्य च मुक्तता, अफझुल्लखानवधः इत्यादीनां प्रधानघटनानां विस्तरेण वर्णनं गौणघटनानां दिङ्मात्रसूचनात् शक्यम् अभूत्।

**शब्दचित्र-प्रभुता**

एकस्वरं कथामात्रकथनं वैरस्याय भवति। तदर्थम् आवश्यकं वैविध्यं प्रासङ्गिकैः वर्णनादिभिः अत्र संपादितमस्ति। अत्रागतानां वर्णनानाम् अयं विशेषः, यन् न तानि संकेतपरिपालनमात्राणि। कथावस्तुना एकजीवताम् आपन्नानि सन्ति तानि। शिवप्रभोर् जीवित-महानाटकं महाराष्ट्राख्य-रङ्गमञ्चे संपन्नम्। सह्यश्च महाराष्ट्रस्य पृष्ठास्थिदण्डः। अतो युक्त एव एतत्परिचायकः 'सह्यमहाराष्ट्रीयं' नाम प्रथमः सर्गः। न हि कालिदासेन नगाधिराजो वर्णितः इत्येव अत्र सह्यो वर्णितः। न वा बाणभट्टेन विन्ध्याटवी वर्णिता इत्येव अत्र जयावली-अटवी वर्णिता। शिवाजि-अफझुल्लयोर् मिलनस्थानत्वात् आवश्यकमेव तत्। महाराष्ट्रपरिचये च यथा पण्ढरपुरस्थ-विठ्ठलादीनि दैवतानि, तुकारामादयो वा सत्पुरुषाः, शिवलिङ्गशतायमाना गिरिशिखरावली, पावनजीवनाढ्याः सरित्प्रवाहाः, तथैव गह्वरेष्ठं व्याघ्रवृन्दं, रक्तमूर्धं वा मल्लमण्डलं निर्देष्टुं कथमिव विस्मरेत् कविः? यत्सत्यम् अटवीवर्णनं वाऽस्तु, स्कन्धावारवर्णनं वाऽस्तु, उपकार्यावर्णनं वाऽस्तु, युद्धवर्णनं वाऽस्तु सर्वत्रैव कामपि सूक्ष्मेक्षिकां प्रदर्शयति कविः।

प्रभुः अयं कविः शब्दचित्रकर्मणि। दृश्यताम् अयं तुकारामवर्णने अन्यतमः श्लोकः —

> 'मध्ये वैष्णववीराणां वीणादण्डधरः सदा।
> तर्जयन्निव नास्तिक्यं ददृशे स तदग्रणीः॥' (२.१५)

अयं वा रामदासपरः —

> 'पदस्थपादुकायुग्मोत्थितैश्चटचटायितैः।
> निर्दिशंस्तीर्थसंचारे धर्मस्य त्वरितां गतिम्॥' (२.४०)

अनुपमोऽयं श्लोकः! असमर्था वयम् अस्य बहुमुखं सौन्दर्यम् उद्घाटयितुम्। सहृदयैस् तत् स्वयमेव अनुभाव्यम्। शान्तोग्रयोः एतयोः साधुपुरुषयोः प्रकृतिवैचित्र्यपरौ एतौ अपि श्लोकौ अवधारणीयौ। तुकारामविषयस् तावत्—

Scanned by CamScanner

'विठ्ठलस्मृतिमात्रेण निर्यन्नीरं यदक्षिजम् ।
हृदये नीरसस्यापि भक्तिवल्लीमवर्धयत् ॥' ( २.१३ )

अयं च रामदासविषयः —

'धगद्धगद्-विनिर्गच्छत्-प्रलयंकरदाहभृत् ।
ज्वालेव सर्पसत्रस्य यद्वाणी रणकर्कशा ॥' ( २.४६ )

अहो अङ्गारवर्षि वचनम् ! स्पर्धते इव वर्णकरवाणी रामदासवाग्या !

शिवजन्मानन्तरं कतिपयैरेव दिनैः तस्य नाम विश्वजिह्वाग्रनर्तकम् अभूद् इत्येतत् कविः एवम् आवेशेन आत्मीयतया च वर्णयति —

'कुटीरे कुटीरे प्रसन्नान्तराणां शिशूनां च यूनां च सीमन्तिनीनाम् ।
ननर्तेव जिह्वाग्रमञ्चेऽभिधानं शिवाजिः शिवाजिः शिवाजिः शिवाजिः ॥'
( ३.५७ )

स्फुटमेव अत्र श्लोके 'वक्तृत्वम्'।

शिवाजि-अफझुल्लयोः समागमं कविः एवं प्राचीनां विदग्धशैलीम् अनुकुर्वन् वर्णयति —

'अहो महामोहविवेकयोर्वा तमार्कयोः कालियकृष्णयोर्वा ।
तथा तयोर्मण्डपमध्यभागे संघट्टनं संजघटे तदानीम् ॥
धर्मो ह्यधर्मेण नयोऽनयेन सुसंयमः क्रोधभरेण किं वा ।
नराकृती राक्षसमूर्तिनेव शिवोऽफझुल्लेन तदावलग्नः ॥'
( २९. २०–२१ )

तत्तदनेकप्रकारैः शिवसैनिकान् कति-कति-नु वर्णयामि इतीव कवेर् अवस्था दृश्यते। दृश्यताम् इदं श्लोकद्वयम् —

'पराक्रमे महासिंहा हरिणास्तु पलायने ।
मूषका गूढसंचारे वीरास्ते शिवसैनिकाः ॥
वायसा रन्ध्रविच्छेदे कोकिलाः कलभाषणे ।
भ्रमराः संततोद्योगे कुशलाः शिवसैनिकाः ॥' ( ९. १२–१३ )

महाकाव्येषु उपमादृष्टान्तादीनां किंचिद् विशेषं स्थानमस्ति। होमरस्य उपमाः दीर्घदीर्घतया प्रथिताः सन्ति। उपमानां परम्परा तु संस्कृत-महाकाव्यानां विशेषः, यथा उपरि उदाहृतयोः श्लोकयोः। आस्माकीनानाम् उपमादीनाम् अन्यो विशेषो नाम मूर्तस्य उपमेयस्य अमूर्तेन उपमानेन उपमितिः। अस्य मूर्धाभिषिक्तम् उदाहरणं नाम वाल्मीकेर् अयं प्रयोगः 'अकर्दममिदं तीर्थं भरद्वाज निशामय। रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा ॥' कालिदासेनापि तत्र तत्र अनुकृतोऽयं प्रकारः वर्णकरेभ्यः बहु रोचते इति अनेकेभ्यः उदाहरणेभ्यः स्पष्टं भवेत्।

यथा– ( शिवः प्रतस्थे जनकेन सार्धं ) जयो नयेनेव महोदयेन ( ७.१ ),
चित्तवृत्तिरिवाजय्या गङ्गारेष्ठा जयावली ( ११.४४ ),

हितोपदेशविमुखांस्तानाप्तानपि दुर्धरान् ॥
निजग्राह स राजर्षिर् विकारानिव संयमी ( १६.२८ ) इत्यादि ॥

' किं च ' प्रभुतां प्रभूताम् ' ( ९.४३ ), ' जराजीर्णविग्रहो विग्रहोत्सुकः ' ( ११.२१ ), ' हृद्गतस्य तव नाथ हृद्गतं ' ( ६.३० ) ' कुलप्रदीप कुलपर्वतस्तम् ' ( ७.९ ), ' स्फुरन्ती ध्वजमालासावरुणा वरुणालये, ( १६.७० ) इत्यादि शब्दतश् चमत्कुर्वता कविना ' न वयम् अत्रापि हीयामहे ' इतीव प्रदर्शितम् ।

* * *

**घनीभूत आवेशः**

वीररसप्रधानम् इदं काव्यम् । ' विक्रमैकरसां वाचम् ' ( ११.२० ) न केवलं शिवाजिरेव आह, इदं काव्यमपि । ओजश्चात्र प्रधानो गुणः । ' हर हर महादेव ' इत्याख्यम् एतदन्तर्गतं काव्यम् अस्य ओजोगुणस्य एकं मांसलम् उदाहरणम् । वरीवृध्यमानायामपि अस्यां प्रस्तावनायां यद्यहम् एतन् न निर्दिशेयम्, अक्षम्यः स्यात् सोऽपराधः । अस्मिन् काव्ये शिवाजिस् तत्सहकारिणश्च स्वातन्त्र्यसंगरम् उद्घोषयन्तः भगवन्तं रोहिडेश्वरं श्रद्धाधैर्यादिकाम् अविचलां गुणसंपदं, तस्य गङ्गा-हलाहलादि-विभूतीनाम् अनुग्रहं च प्रार्थयन्ते । केवलं चत्वार एव प्रारम्भिकाः श्लोकाः अत्र उदाह्रियन्ते—

स्वातन्त्र्यसंगरदीक्षितास् त्वच्चरणशरणागताः ।
वयमविचलनिश्चया हर हर हर महादेव ॥
उद्दामवेगपुरःसरा एते वयं गिरिनिर्झराः ।
ध्येयार्णवं समुपेयुषो हर हर हर महादेव ॥
श्रद्धा हिमाद्रिसमाचला शक्तिर् नृसिंहनिभाऽतुला ।
आविर्भवत्वस्मासु सा हर हर हर महादेव ॥
वज्रः शिरसि यदि निष्पतेद् वह्निर्वपुषि यदि संविशेत् ।
न हि निश्चयो नः प्रस्खलेद् हर हर हर महादेव ॥ ( ९.२८–३१ )

घनीभूत इवात्र आवेशः । मूर्तमिव चैतन्यम् । देहबद्धमिव ओजः । अन्यत् किमपि अपठतापि वाचकेन इदम् अवश्यं पठनीयम् इति प्रशंसामः ।

गम्भीरतमस्यापि पुरुषस्य ओष्ठौ क्वचिद् वियुज्येते । तथैव साहित्यकृतेरपि । गम्भीरप्रकृतिके अस्मिन् काव्येऽपि क्वचित् स्मितरेखा उत्तिष्ठति । तस्यापि मृदूभवति मुखविन्यासः । यथा जिजा-शहाज्योः

Scanned by CamScanner

जिह्वाग्रदर्शनादिका बाललीलाः। अङ्गुलिनद्धकर्णैरपि ('नमाजं' पठद्भिः ?) अरिभिः शिवसैनिकानां गर्जनायाः श्रवणम्। यथा वा अफझुल्ल-वधोत्तरं संजाता यवनानां धावतपलायता (यत्र छिन्नपादत्वात् धरण्यां लुठन् कश्चित् शत्रुसैनिकः निकृत्तबाहोः सतोऽपि पलायनसमर्थस्य कस्यचित् स्वपक्षीयस्य भाग्यम् असूयते!)। स्वमुखनिरभिलाषस्य कर्तव्य-कठोरस्य च शिवप्रभोरपि मानव्यसूचकः वर्णेकरवर्णितः एकः प्रसङ्गः अत्र निर्देशम् अर्हति। अफझुल्लयोधनार्थं सुविधाकरत्वात् प्रतापगडाय प्रस्थितः शिवाजिः 'को नु वेद, कदाचिद् अन्तिम एव अयं सहवासः स्यात्' इति चिन्तयन्निव मातुश् चरणयुगलं वन्दित्वा, पत्न्याश्च प्रणाम-नतायाः मस्तकं संस्पृश्य, तस्याश्च हस्तात् 'पुत्रं स्तनन्धयममुं शरदिन्दु-वक्त्रम् ईषत्समुल्लसित-नीलसरोरुहाक्षम्' आदाय तं मुहुर्मुहुः चुम्बति। क्षणमात्रं-क्षणमात्रमेव-इष्टजनसहवासः तं निरुणद्धि। उत्तरक्षणे तु—

प्रियतमजनसंनिकर्षसक्तं क्षणमेनं शिवमुग्रकर्मनिष्ठा।
रणमखविधये प्रतापदुर्गं प्रति गन्तुं त्वरयांचकार सद्यः॥

(२१.५१)

धन्यः स शिवाजिः! धन्यश्च स कविः यः शिवप्रभोः मानवत्वं शिवप्रभोश्च अतिमानवत्वम् एवं युगपद् एकस्मिन् श्लोके साकारम् अकरोत्।

भावी इतिहासकारः असंशयम् इत्थं निर्णेष्यति—शिवराज्योदयं विनिर्माय वर्णेकरैः संस्कृत-महाकाव्ये क्रान्तिः कृता, आशये भाषायां च।

**सरससरसः देशभक्तिरसः**

'शृङ्गारो रसराजः' 'शृङ्गारो रसराजः' इति कृत्वा दुर्लालित आसीत् शृङ्गारः। वर्णेकरैः राष्ट्रभक्तिरसं तत्स्थाने आरोप्य एका कालो-चिता आवश्यकता पूरिता (भक्तिरेव रसो वा न वा इति कामं कलहा-यन्तां शास्त्रकाराः)। अन्यथासंपन्नस्य सतोऽपि संस्कृतसाहित्यस्य एत-द्विषया न्यूनता सचेतसां खेदकरी आसीद् इत्येतत् नापलपितव्यम्। वर्णेकरैस्तु—

'युद्धमुक्तं भगवता स्वर्गद्वारमपावृतम्।
तत्स्वराष्ट्रहितार्थं चेत् मुक्तिद्वारं मतं मम॥ (११.२७)
'योगिभिश्चापि कालेऽस्मिन् युद्धयोगेन साध्यताम्।
आत्ममुक्तिं तिरस्कृत्य राष्ट्रमुक्तिर्महीयसी' (११.२९)

इति दादोजिमुखेन

'न संमानकामो न वा वित्तलोभो
न च स्वार्थमोहो न शक्त्युन्मदो वा ।
मनस्यस्तु वो राष्ट्रसेवाव्रतानां
सखायः ! कदाचित् कुतश्चित् कथंचित् ॥ (२७.२९)

इति शिवाजिमुखेन वा राष्ट्रभक्तेः यः सरससरसः आविष्कारः संस्कृतसाहित्ये कृतः सः आनंदपूर्वं एव । तत्कृते संस्कृतजगत् तेषाम अधमर्णं स्यात् ।

जानन्ति वर्णकराः यत् नायं कालः व्याख्यागम्यस्य, 'विद्वदौषधस्य' वा काव्यस्य । कालातीताः सन्ति अधुना अखण्डदण्डायमानाः शब्दाः । यातयामाः दुरूहाः प्रयोगाः । गतरसा, निरर्थिकाः शब्दचमत्कृतयः । अद्य अपेक्ष्यते जीवत्संस्कृतम्, यत् सरलं सदपि सुन्दरं स्यात्, सुबोधं सदपि समर्थं स्यात् । तादृशमेव संस्कृतम् अत्र वर्णकरैः प्रयुक्तम् (उदाहृतं च वैपुल्येन इतः पूर्वं तद् अस्माभिः)। न ते 'अल्ला' 'येदिलस्य' 'काफिराणाम' इत्यादिभिः शब्दैः आत्मानं दूषितं मन्यन्ते। अङ्गीकुर्वन्ति 'लत्ता'-सदृशान् असंस्कृतान् शब्दान् । प्रयुञ्जते 'समस्या'दि शब्दान् आधुनिकेन अर्थेन। 'सारदृश्वा' 'रिपुंदमः' 'कर्णतुदः' 'मनुष्याखुः' 'रात्निकः' इत्यादीनां नूतनशब्दानां ('सेनानीम्' 'दर्शिवान्' 'जयाकाङ्क्षुः' 'बम्भ्रमति' 'आयात्' (आयायात्) इत्यादीनाम् आर्षप्रयोगाणां च) निर्मित्या समृद्धतां नयन्ति संस्कृतशब्दभाण्डारम् । न बिभ्यति 'शहाजेः' इत्यादिभ्यः शुद्धेभ्योऽपि लोकविरुद्धेभ्यः प्रयोगेभ्यः । सर्वमिदं स्वगतार्हम् ।

**अकादमी-पारितोषिकार्हा कृतिः**

'जगन्नाथपण्डितान्तं संस्कृतवाङ्मयम्' इति विद्वद्भ्रमः महता प्रबन्धेन निरस्तः वर्णकरैः। तावता अपरितुष्यद्भिः पुनरपि तस्य खण्डनार्थम् एतत्काव्यविरचनमेव समर्थमुत्तरमिव प्रत्यपद्यत तैः । संस्कृतकाव्येतिहासे सुवर्णाक्षरैः उट्टङ्कनार्हस्य अ‍ॅकॅडमी-पारितोषिकार्हस्य च ( नाद्यापि काचित् मौलिकी संस्कृतकृतिः एतत्पारितोषिकेण संमानिता श्रूयते ) अस्य अद्वितीयस्य महाकाव्यस्य अध्ययनाध्यापनं कुटीरे कुटीरे, गृहे गृहे, प्रासादे प्रासादे, शालायां शालायां, महाशालायां महाशालायां भवतु इत्याशास्य विरम्यते अस्मात् प्रस्तावनापल्लवितात् । साऽऽवधानम् ! साऽऽवधानम् !!

६-११-१९६७
संस्कृतप्रगताभ्यासकेन्द्रम्
पुण्यपत्तन-विश्वविद्यालयः
पुण्यपत्तनम् ७

डॉ. ग. बा. पळसुले

Scanned by CamScanner

# महाकाव्य-सर्ग-श्लोकानुक्रमणिका

**प्रथमः सर्गः — सह्यमहाराष्ट्रीयम्।** (श्लोकसंख्या ५९, पृष्ठानि –१-१०)

मङ्गलाचरणम्––१. ऋतुषु सह्याद्रिसौन्दर्यम्––२-९, सह्यगिरेः निसर्गरमणीयता—१०-१३, महाराष्ट्रस्य आधिदैविकता–१४-२१, प्रतिष्ठानपण्ढरपुरवर्णनम्–२२-२३, महाराष्ट्रमण्डले पाण्डुरङ्ग-भक्तिः–२४, ज्ञानेश्वरः– २५, योगशक्तिः––२६, वीरता–२७-३४, कलासौन्दर्यम्–३५-३६, वेदाभ्यासः–३७, धर्मराज्यम् – ३८, म्लेच्छशासनापत्तिः–३९–५२, परित्राणार्थं भगवत्प्रार्थना–५३-५९.

**द्वितीयः सर्गः–साधुवर्यद्वयम्** - (श्लोकसंख्या-५०, पृष्ठानि ११-१४)

साधुद्वयोदयः–१-५, करुणा पारमेश्वरी–६-८, तुकारामवर्णनम्–९-२५, रामदासवर्णनम्—२६-४८, शिवसूर्योदयापेक्षा–४९–५०.

**तृतीयः सर्गः– वसन्तमाङ्गल्यम्** (श्लोकसंख्या ७९, पृष्ठानि १५-२०)

वसन्तर्तुसुषमा-वर्णनम्–१–११, जाधवरावगृहे वसन्तोत्सवः–१२-१३, मण्डपवर्णनम्–१४-२०. सुहृद्गणागमनम्–२१-२५. पितृ-पुत्रयोः संवादः –२६-३२. समुत्सुका किशोरी–३३-३४. किशोरपरिहासः –३५-३७. किशोरयोः प्रमोदः–३८. शिवशैलूष-वर्णनम्–३९-४८. किशोरयोः कुङ्कुमरागकेलिः ४९-६३. जाधवरावस्य सभ्येषु प्रार्थना ६४-६७, सभ्यानुमोदनम् ६८, मङ्गलाष्टकगायनम् ६९-७९,

**चतुर्थः सर्गः– शिवजन्म** ( श्लोकसंख्या ५८, पृष्ठानि २१-२४)

जिजादेव्याः पतिगृहगमनम् १-११, गर्भवती जिजादेवी १२-१३, दोहदवर्णनम् १४-२६, निदाघवर्णनम् २७-४९, जन्मसमयः ५०-५१, जन्म ५१-५२, शिशुप्रभा ५३, नामकरणम् ५४, शिवाजिनामधेयार्थः–५५ शिवाजिनाम्नो लोकप्रियता ५६-५८,

**पञ्चमः सर्गः– शिवशिक्षणम्** ( श्लोकसंख्या-५६, पृष्ठानि २५-२८)

शिशु-शिवाजिवर्णनम् १-५, शिवबालस्य वीरलीलाः ६-१८, गुरुः

Scanned by CamScanner

दादोजिः १९-२२, क्षात्रविद्याकौशलम् २३-२५, जिजादेव्याः संस्काराः
२६-२९, जिजाकृतो हितप्रबोधः ३०-५६.

**षष्ठः सर्गः– दम्पतीमतभेदः** (श्लोकसंख्या-५३, पृष्ठानि २९-३२)

पुत्रवीरतया पितृसन्तोषः १-६, जिजाभाषणे शिवचारित्र्यवर्णनम्
१०-१९, शहाजिकृतं–जिजाभाषणस्तवनम् २०-२२, राजसेवामाहात्म्य-
वर्णनम् २३-२८, जिजाकृतं शहाजिमतखण्डनम् २९-३७, शहाजेः सचि-
न्तता ३८-४०, शिवागमनेन पित्रोः सम्मोदः ४१-४५, शहाजिकृतं राज-
धानीवर्णनम् ४६-५१, विजापुरगमने बालशिवस्य उत्सुकता ५२-५३,

**सप्तमः सर्गः– राजधानीप्रवासः**–(श्लोकसंख्या ५५, पृष्ठानि ३३-३६)

प्रवासमार्गे निसर्गकृतं शिवाजिसभाजनम् १-७, सह्याद्रिदर्शनम्-
८-१०, सह्य-वनेचर-दर्शनम् ११-१४, वनेचरीकृतं शिवरूपवर्णनम्
१५-१९, वनफलाद्यास्वादः २०-२२, पितृकृतो राजसेवोपदेशः २३-३२,
सभायां म्लेच्छराजप्रवेशः ३३-३५, अनवनतमस्तकः शिवाजिः ३६-३७,
राजसभायां शिवाजिपरिचयः ३८-४३, राजमार्गे शिवाजिकृतं गोघातक-
दण्डनम् ४४-५१, जनतायाः परमानन्दः ५२-५४, धेनोः वात्सल्यम् ५५.

**अष्टमः सर्गः– पारतन्त्र्यजुगुप्सा** (श्लोकसंख्या ३८, पृष्ठानि ३७-३९)

राजधान्याः प्रत्यागतस्य शिवराजस्य पारतन्त्र्यग्रस्त-जनजीवन-
दर्शनेन अन्तर्व्यथा रोषोद्रेकश्च १-१५, पुत्रावस्थया जिजादेव्याः व्याकुल-
त्वम् १६-१८, शिवाजिकृतं–हृदयव्यथाविष्करणम् १९-२८, निश्चयोद्-
घोषणम् २९-३०, जिजादेव्याः आशिःप्रदानम् ३१-३८.

**नवमः सर्गः– स्वातन्त्र्यप्रतिज्ञा** (श्लोकसंख्या ४९, पृष्ठानि ४०-४३)

शिवसैनिकगणवर्णनम् १-१९, श्रीरोहिडेश्वरमन्दिरप्रवेशः २०-२७,
श्रीरोहिडेश्वर प्रार्थना-"हर हर हर महादेव"-२८-४४, प्रार्थनायाः प्रभावः
४५-४९.

**दशमः सर्गः– स्वातन्त्र्यदिनोदयः** (श्लोकसंख्या ४४, पृष्ठानि ४४-४६)

श्रीरोहिडेश्वरमन्दिरात् प्रत्यागतानां शिवसैनिकानां सर्वत्र
सञ्चारः १-८, चरकृतं रहस्यनिवेदनम् ९-१०, मातृचरणे जयाशिर्याचना

१०-१३, अभूतपूर्वजयाय निश्चयोद्घोषणा १४-१८, तोरणदुर्गजय-वार्तया सार्वत्रिकः प्रहर्षः १९-३०, म्लेच्छाधिपसद्मसु अशुभदर्शनानि ३१-३६, तोरणदुर्गसंस्कारः ३७-३८, सुवर्णलक्ष्मीलाभः ३९-४०, नूतनराज-मुद्राप्रवर्तनम् ४१-४२, स्वातन्त्र्यदिनोदयः ४३-४४.

**एकादशः सर्गः– विजययात्रा** ( श्लोकसंख्या ४८, पृष्ठानि ४७–४९ ).

शिवराजस्य वीरोद्दीपकं भाषणम् १-१५, गुरुदादोजिवर्णनम् १६-२१, दादोजिकृतं-शिवगुणवर्णनम् २२-२६. स्वातंत्र्ययुद्धोत्तेजनम् २७-३३, शिवानुयायिनां प्रहर्षः विजयसञ्चारश्च ३४-४८.

**द्वादशः सर्गः– शत्रुव्यथा** ( श्लोकसंख्या ५२, पृष्ठानि ५०-५३).

**विजापुरेन्द्रस्य**-हृदयव्यथा १-८, मन्त्रिसभायां भाषणम् ९-२०, मन्त्रिगणस्य आत्मविश्वासः शिवाक्रमणप्रशमननिश्चयश्च २१-३०, विजा-पुरेशस्य शहाजिदमनार्थं सूचना ३१-४०, अमात्यवर्यस्य मुस्तफाखानस्य भाषणे द्विधाक्रमणसूचना ४१-५१, मुस्तफाखानस्य प्रयाणम् ५२.

**त्रयोदशः सर्गः– विपत्तिव्याघातः** (श्लोकसंख्या ६१, पृष्ठानि ५४-५७)

चारप्रवेशः १-३, चारभाषणे शहाजिबन्धनवृत्तान्तः ४-१२, जिजा-देव्या दूनावस्था १३-१५, शिवाजिसुहृद्गणस्य दूनावस्था १६-१९, द्वितीय चारागमनम् २०-२३, फतेहखानाक्रमणवृत्तान्तनिवेदनम् २४-२९, शिवराजभाषणे शत्रुसंहारसंदेशः ३०-४०, शिवसैनिकानां वीरोद्दीपनम् ४१-४३, शिवराजस्य पुरन्दरदुर्गाश्रयः ४४-४६, कावजिवीरस्य सुभान-मङ्गलदुर्गे आक्रमणम् ४७-५०, फतेहखानस्य पराभवः ५१-५९, बाजि-पासलकरस्य रणे निधनम् ६०-६१,

**चतुर्दशः सर्गः– पितृमोचनम्** (श्लोकसंख्या ४४, पृष्ठानि ५८-६०)

जिजायाः दुःखमयी अवस्था १-६, समर्थरामदासस्य राजनीति–मार्गोपदेशः ७-२१, हितोपदेशेन शिवस्य आनन्दः २२-२५, गुरुदक्षिणार्थं सर्वस्वार्पणम् २६-२८, शिवराजस्य देहलीपति-सख्यसंपादने निर्णयः २९-३९, रामदासस्य संतोषः ४०, दूतप्रयाणम् ४१, सावित्रीव्रतस्था जिजादेवी ४२-४४, जिजादेवीप्रगीतं सावित्रीस्तोत्रम् ४५-५२, शहाजि-विमोचनवृत्तम् ५३-५५,

Scanned by CamScanner

**पञ्चदशः सर्गः– यवनराजकौटिल्यम्** (श्लोकसंख्या ५२, पृष्ठानि ६३-६६)

शहाजिं प्रति चरेणोक्तं विमोचनकारणम् १-५, दिल्लीपतिं प्रति शिवराजेन प्रेषितं पत्रम् ६-१८, विजापुरराजसभायां शहाजिराजस्य सम्मानः १९-३०, विजापुरेशस्य शहाजिम् उद्दिश्य कृत्रिमहार्दगर्भं भाषणम् ३१-४८, पित्राज्ञया कोण्डाणदुर्ग-प्रत्यर्पणम् ४९-५२.

**षोडशः सर्गः– स्वराज्य-सुधारणा** (श्लोकसंख्या ८०, पृष्ठानि ६७-७१)

शहाजिराजस्य पुत्रदर्शनेच्छा १-७, शिवराजस्य प्रजापालने भीमसेनसाधर्म्यम् ८-२२, महादाजि-पुत्राणां दण्डनम् २३-२९, पुरन्दरे नेताजि-नियुक्तिः ३०-३१, चन्द्ररावस्य दौरात्म्यम् ३२-४१, शिवसेनायाः (जावळी) जयावलीवनाक्रमणं चन्द्ररावस्य पलायनं च ४२-४४, चन्द्रराव-मर्दनम् ४५-५०, सम्भाजि मोहिते इत्याख्य-विमातृभ्रातुः दमनम् ५१-५७, सह्याद्रिदुर्गेषु भगवद्ध्वजाः ५८-५९, दिल्लीपतिकोशापहरणम् ६०-६५, सागरतीरस्थ-दुर्गविजयः ६६-६७, महासागरे नौकादण्डाग्रेषु काषाय-ध्वजानां शोभा ६८-७३, पाश्चात्त्यानां रत्नकोशदानम् ७३-७५, शिव-राजदर्शनेन सागरस्य प्रहर्षः ७६-८०

**सप्तदशः सर्गः–विजापुरेश-विमातृ-प्रकोपः**

(श्लोकसंख्या ५१, पृष्ठानि ७२-७५)

विजापुरेशविमातुः प्रकोपवेदनाः १-१०, शहाजिमुद्दिश्य विजापुरेश विमातुः साहंकारक्रोधं भाषणम् ११-३४, शहाजिकृता तद्भाषणप्रशंसा ३५-३८, शहाजिभाषणे शिवराजस्य राजविरुद्धाचरणहेतुनिवेदनम् ३९-५०, भाविविपत्तिनिवेदनाय दूतप्रेषणम् ५१.

**अष्टादशः सर्गः – अफझुल्लप्रतिज्ञा** (श्लोकसंख्या ५६, पृष्ठानि ७६-७९)

विजापुरराजसभा १-६, राजविमातुः सभाप्रवेशः ७-११, राज-विमातृभाषणे सभ्यजनधिक्कारः १२-१९, शिवाजिनामश्रवणेन भीतः सभालयः २०-२५, अफझुल्लोत्थानम् २६-३०, अफझुल्लखानस्य साहंकारम् आत्मवीर्यप्रशंसामयं भाषणम् ३१-५२, ताम्बूलादानम् ५३-५४, राजविमातुः हर्षः ५५, नरपतेः हर्षः ५६.

**एकोनविंशः सर्गः – अफझुल्लसेनाक्रमणम्**
(श्लोकसंख्या ५३, पृष्ठानि ८०-८३)

सेनाया कोलाहलः १-९, अफझुल्लवीरवर्णनम् १०-१३, दुःशकुनोपहासः १४-१७, तुलजापुरीय-मन्दिरे भवानीमूर्तिध्वंसः गोहत्या च१८-२८, पण्ढरपुरध्वंसः २९-३४, शिवराजसम्बन्धिनो पीडा ३५-३६, शिवराजस्य स्थिरवृत्तित्वम् ३७-४०, भवानी-साक्षात्कारः ४१-५३.

**विंशः सर्गः– कान्होजिवीरस्य निश्चयः** (श्लोकसंख्या ५४, पृष्ठानि ८४-८७)

कान्होजिवीरस्य शिवाजि प्रत्यागमनम् १-८, अफझुल्लखानस्य तर्जनागर्भं पत्रम् ९-१५, कान्होजिमुद्दिश्य शिवराजस्य भाषणम् १६-२३, शिवाजिभक्तिमयं कान्होजिभाषणम् २४-३३, शिवादेशेन कान्होजिः स्वग्रामं प्रत्येति ३४-३७, सम्मीलितान् सुहृज्जनान् उद्दिश्य कान्होजिवीरस्य भाषणम् ३८-४४, सुहृज्जनजिज्ञासा ४५-४७, कान्होजिः शिवानुसरणे स्वनिश्चयं कथयति ४८-५१, अफझुल्लपत्रदहनम् ५२-५४.

**एकविंशः सर्गः –संग्रामप्रोत्साहनम्** ( श्लोकसंख्या५१, पृष्ठानि ८८-९१)

प्रतापदुर्गवर्णनम् १-१३, जिजादेवी-दर्शनम् १४-१७, प्रतापदुर्गं प्रति गन्तुं शिवाजिः स्वनिश्चयं जनन्यै कथयति १८-२३, अफझुल्लवधार्थं जिजादेवी शिवाजिम् आदिशति २४-३३, शिवधर्मपत्नी भर्तारं प्रोत्साहयति ३४-३८, विनिष्कोषितायां भवान्यां शिवाजिः स्वाननमीक्षते ३९-४५, शिवराजस्य रणमखार्थं प्रयाणम् ४६-५१.

**द्वाविंशतितमः सर्गः–आपदाघाताः** ( श्लोकसंख्या ५१, पृष्ठानि ९२-९५,)

प्रतापदुर्गे स्वबान्धवानुद्दिश्य शिवराजस्य भाषणम् १-९, शिवराजकृतं वर्षाकालवर्णनम् १०-२०, निमन्त्रितागतसुहृज्जनानां प्रतापदुर्गे सम्मेलनम् २३-३३, चरगणाः आङ्ग्ल-वलन्देजादीनां प्रतिकूलचेष्टितानि शिवं निवेदयन्ति ३४-३९, शिवराजस्य चिन्ताकुलता ४०-४३, पत्नीनिधनवृत्तान्तश्रवणेऽपि शिवराजस्य गम्भीरता ४४-५१.

**त्रयोविंशतितमः सर्गः–रिपुदूतागमनम्** (श्लोकसंख्या ५२, पृष्ठानि ९६-९९)

शरदृतुवर्णनम् १-६, कृष्णाजिभास्कराख्यस्य अनाहूतस्य रिपुदूतस्य

Scanned by CamScanner

कानां निरुत्साहः ३४-४१, आक्रमणवृत्तान्तं श्रुत्वा शिवराजस्य सिद्धता ४२-४६, संगरे यवनसेनाध्वंसः ४७-६१, दीनेषु द्विषत्सु शिवस्य सदयता ६२-६४, शिवराजः स्ववीरान् सम्मानयति ६५-६६.

**त्रयस्त्रिंशत्तमः सर्गः – जौहराक्रमणम्**
(श्लोकसंख्या ५०, पृष्ठानि १३८-१४०)

विजापुरे शिवविक्रमप्रभावः १-१०, जौहरखानस्य प्रार्थनापत्रम् ११-२२, जौहरखानवर्णनम् २३-२७, जौहरस्य सम्मानः २८-३०, विजापुरेशभाषणम् ३१-३४, पर्णालदुर्गे शिवराजः स्वसंरक्षणम् आयोजयति ३५-५०.

**चतुस्त्रिंशत्तमः सर्गः – शृङ्गापत्तिः**
(श्लोकसंख्या ५८, पृष्ठानि १४१-१४४)

विजापुरीयसेनायाः पर्णालदुर्गं प्रत्यागमनम् १-९, शास्ताखानाक्रमणवृत्तान्तं चरो निवेदयति १०-४०, विजापुरीया सेना पर्णालदुर्गम् अवरुणद्धि ४१-४९, शिवराजस्य संरक्षणार्थं सन्देशाः ५०-५८.

**पञ्चत्रिंशत्तमः सर्गः–कूटप्रयोगः** (श्लोकसंख्या ६१, पृष्ठानि १४५-१४८)

चिन्ताकुला जिजादेवी १-७, जिजादेवी नेताजिं निर्भर्त्सयति ८-१४, नेताजिभाषणम् १५-२१, नेताजिपराभववृत्तान्तः २२-२८, विमुक्त्यर्थं शिवराजस्य प्रयत्नः २९-३४, दूतप्रेषणम् ३५-४२, जौहरं प्रति शिवराजस्य पत्रम् ४३-५२, शिवदूतस्य भाषणम् ५३-५९, शरणागतिवार्तया जौहरसैन्ये संभ्रमः ६०-६१,

**षट्त्रिंशत्तमः सर्गः–महासाहसम्** (श्लोकसंख्या ५२, पृष्ठानि १४९-१५२)

शिवराजः बाजिप्रभुं स्वमनीषितं निवेदयति १-१२, निर्गमनोत्सुकं शिवराजं प्रति बाजिप्रभुः स्वसहकार्यं याचते १३-२६, शिवराजोऽनुमन्यते २७-३१, शिवराजः सम्भाव्यापदो निवेदयति ३२-५१, निष्क्रमणम् ५२.

**सप्तत्रिंशत्तमः सर्गः–शत्रुवञ्चना** (श्लोकसंख्या ५२, पृष्ठानि १५३-१५६)

रात्रौ संचरन्तो जौहरचराः १-४, नरयूथदर्शनम् ५-९, शिवराज-

Scanned by CamScanner

गमनवार्ताशनम् १०-१६, जौहरसैनिकाः शिवाजिसहितं नरयूथं निगृह्णन्ति १७-२३, चरमुखात् जौहरः वृत्तान्तम् आकर्णयति २४-३०, जौहरस्य प्रहर्षः ३१-३७, जौहरजामाता शिवाजिम् श्वशुरसमीपमानयति ३८-४५, नापितदर्शनेन स्ववञ्चनां जौहरो जानाति ४७-५२.

**अष्टात्रिंशत्तमः सर्गः– बाजिहौतात्म्यम्**

(श्लोकसंख्या ८३, पृष्ठानि १५७-१६१)

जौहरानीकस्य शिवराजानुसरणम् १-१०, बाजिप्रभुः शिवराजं प्रार्थयते ११-१९, शिवराजस्य व्याकुलता २०-२५, मृत्युञ्जय-प्रार्थना-२६-३४, शिवराजनिर्गमनम् ३५, बाजिप्रभोः युद्धसिद्धता प्रोत्साहनपरं भाषणं च ३६-५२, सग्रामवर्णनम् ५३-७४, शस्त्राहतस्य बाजिप्रभोः भाषणम् ७५-८२, बाजिहौतात्म्यम् ८३.

**ऊनचत्वारिंशत्तमः सर्गः–जीवदानम्**(श्लोकसंख्या ७१, पृष्ठानि१६२-१६६)

चरोदितां बाजिनिधनवार्तां शिवाजिः श्रुणोति १-४, दिवंगतस्य सुहृदः दैवीं वाणीं शिवराज आकर्णयति ५-१०, मातृदर्शनम् ११-१७, पर्णालदुर्गो जौहराय प्रत्यर्पितः १८-२४, चरः कार्तलवखानस्य तुङ्गारण्य-प्रवेशं निवेदयति २५-३१, तुङ्गारण्ये संग्रामः ३२-४०, राजव्याघ्री कार्तलवाय शरणप्रपत्तिम् उपदिशति ४१-५०, कार्तलवसैन्यस्य दैन्यम् ५१-५४, दूतमुखेन दयायाचना ५५-६३, शिवराजस्य दयार्द्रता६४-६९, जलपानतृप्ता यवनसैनिकाः शिवं स्तुवन्ति ७०-७१,

**चत्वारिंशत्तमः सर्गः– सूर्यरावमर्दनम्**(श्लोकसंख्या५५, पृष्ठानि१६७-१७०)

शिवराज्यस्य कोङ्कणप्रवेशः १-९, परशुरामपूजनम् १०-१३, सूर्यरावस्यानुकूलता १४-१७, गोरुण्डदण्डनम् १८-२८, बिजापुरेशस्य सूर्यरावं प्रत्यादेशः २९-३६, सूर्यरावस्य यवनवश्यता ३७-४०, तानाजिपराक्रमः ४१-४३, सूर्यरावः शृङ्गारपुरमाश्रयति ४४-४७, शृङ्गारपुरध्वंसः ४८-५५,

**एकचत्वारिंशत्तमः सर्गः– शास्ताखानविमर्दनम्**

(श्लोकसंख्या ८०, पृष्ठानि १७१-१७५)

शिवराजभाषणे लोकापत्तिवर्णनम् ११-१७,सुहृद्वरभाषणे कर्तव्य-

दुर्घटतावर्णनम् १८-३५, सुहृज्जनानां शिवराजकर्तृत्वे विश्वासः ३६-४७, चरसंचारः ४८-५०, शास्ताखानस्य सदने आक्रमणम् ५१-६१, शास्ताखानस्य प्रबोधके प्रकोपः ६२-६५, शिवराजप्रवेशेन संभ्रमः ६६-७६, शास्ताखानस्य पलायनम् ७७-८०.

**द्विचत्वारिंशत्तमः सर्गः– सूरतदहनम्** (श्लोकसंख्या ९५, पृष्ठानि १७६-१८२)

सूरतनगरीवर्णनम् १-१५, शिवराजनिश्चयः १६-१८, शिवराजचरस्य सूरते संचारः १९-२७, सेना-प्रयाणम् २८-३१, त्र्यम्बकेश्वरपूजनम् ३२-३६, सेनासंचारः ३७-४०, सूरते संभ्रमाकुलता ४१-४३, सूरताधिकारिणो व्यामूढता ४४-४६, नगरवासिनां भयाकुलता ४७-४९, शिवराजदूतः इनायतखानस्य सभायां पत्रं पठति ५०-५८ नगरलुण्ठने शिवराजाज्ञा ५९-६०, सूरतदहनम् ६१-६८, यवनदूतस्य शिवराजसभायां प्रवेशः ६९-७८, शिवराजस्य रिपूपहासः ७९-८०, यवनदूतस्य वधः ८१-८४, संहारसत्रम् ८५-९२, दग्धनगरीवर्णनम् ९३-९४, शिवराजप्रयाणम् ९५.

**त्रिचत्वारिंशत्तमः सर्गः– शहाजिनिधनम्**
(श्लोकसंख्या ५४, पृष्ठानि १८३-१८६)

धनंजयं शिवराजं प्रजाभिनन्दति १-६, दूतः पितृनिधनवृत्तान्तं श्रावयति ७-१२, जिजादेवी वह्निप्रवेशं निश्चिनोति १३-१६, शिवराजस्य शोकविह्वलता १७-२५, जिजादेवीवर्णनम् २६-३०, मातरम् उद्दिश्य सशोकस्य शिवराजस्य भाषणम् ३१-३७, जिजादेवी वह्निप्रवेशनिश्चयं जहाति ३८-४३, शिवराजः पितुर्गुणान् सशोकं स्मरति ४४-५४.

**चतुश्चत्वारिंशत्तमः सर्गः– खवासखानमर्दनम्**
(श्लोकसंख्या ७६, पृष्ठानि १८६-१९१)

शोकान्ते विजयारम्भः १-६, इख्लासाजीझखानयोः पराभवः ७-११ विजापुरराजसभायां खवासखानस्य ताम्बूलोद्ग्रहणम् १२-२४, शिवराजदमनार्थं यवनराजस्य आज्ञापत्राणि २५-३०, शिवराजस्य मुधोळनगरे प्रवेशः ३१-३६, संग्रामे घोरपडेवंशसंहारः ३७-५२, खवासखानं प्रति शिवस्यादेशः ५३-६३, खवासखानस्योत्तरम् ६४-६७, यवनसैन्योन्मथनम् ६८-७६.

Scanned by CamScanner

**पञ्चचत्वारिंशत्तमः सर्गः– सिन्धुदुर्गनिर्माणम्**

(श्लोकसंख्या ३९, पृष्ठानि १९१-१९४)

शिवराजस्य विजयः १-४, सागरान्तर् द्वीपदर्शनम् ५-१०, ब्राह्मणानां भयाकुलता ११-१७, सिन्धुदुर्गार्थं भूमिपूजनम् १८-२३, विजययात्रा २४-२७, सुवर्णतुलोत्सवः २८-३९.

**षट्चत्वारिंशत्तमः सर्गः –जयसिंहाभियानम्**

(श्लोकसंख्या ३७, पृष्ठानि १९५-१९६)

चिन्ताक्रान्तो दिल्लीपतिः १-५, औरङ्गजेबः जयसिंहविक्रमं स्तौति ६-१४, जयसिंहस्य स्वामिनिष्ठामयं भाषणम् १५-१७, जयसिंहसेनाया अभियानम् १८-३०.

**सप्तचत्वारिंशत्तमः सर्गः – धनसञ्चयः**

(श्लोकसंख्या५१, पृष्ठानि १९७-२०१)

स्पशो जयसिंहाभियानवार्तां कथयति १-८, शिवराजसुहृदाम् उत्साहः ९-१३, शिवराजस्य भाषणे कोषमाहात्म्यवर्णनम् १४-२४, जलसंगरार्थं शिवराजस्य प्रयाणम् २५-३६, गोकर्णक्षेत्रे ज्योतिर्लिङ्गपूजनम् ३७-४२, श्रीगणेशार्तिक्यम्-श्रीशिवार्तिक्यम्-शिवभक्तिमग्नः शिवराजः ४३-४६, विजययात्रायां धनलाभः ४७-५१.

**अष्टचत्वारिंशत्तमः सर्गः – पुरन्दरयुद्धम्**

(श्लोकसंख्या ४२, पृष्ठानि २०२-२०४)

चरः दिलेरखानाक्रमणवार्तां निवेदयति १-१५, मुरारबाजिपराक्रमवर्णनम् १६-२९, शिवराजस्य संग्रामनीतिः ३०-४२.

**नवचत्वारिंशत्तमः सर्गः – जयसिंहप्रबोधनम्**

(श्लोकसंख्या ७४, पृष्ठानि २०५-२०९)

सुहृन्मण्डले जयसिंहस्य भाषणम् १-२२, शिवराजदूतस्य प्रवेशः २३-२७, राजदूतभाषणम् २८-३१, जयसिंहस्य भाषणम् ३२-३५, जयसिंहं प्रति शिवराज्यस्य सन्देशः ३६-६०, जयसिंहहृदये स्वाभिमानोद्दीपनम् ६१-६४, जयसिंहस्य शिवराजदर्शने वाञ्छा ६५-७४.

Scanned by CamScanner

पञ्चाशत्तमः सर्गः – जयसिंहाभिप्रायः
(श्लोकसंख्या ५१, पृष्ठानि २१०-२१३)

जयसिंहस्य शिबिरे शिवराजप्रवेशः १-८, जयसिंहः शिवराजं संमानयति ९-१३, पुरन्दरदुर्गप्रदानम् १४-१६, जयसिंहस्य भाषणम् १७-३२, शिवराजः सन्धिम् अनुमनुते ३३-३६, शिवराजं दिल्लीं प्रेषयितुं जयसिंहः प्रार्थयते ३७-५१.

एकपञ्चाशत्तमः सर्गः – राष्ट्रहितोपदेशः
(श्लोकसंख्या ५२, पृष्ठानि २१४-२१७)

दिलेरखानस्य चिकीर्षितम् १-५, शिवराज्यस्य सूचना ६-११, पर्णालदुर्गे अपयशः १२-१५, नेताजिः स्वाधिकारात् दूरीकृतः १६-२०, दिल्लीप्रयाणनिश्चयः २१-२३, शिवराजः स्वबान्धवान् हितमुपदिशति २४-५२.

द्विपञ्चाशत्तमः सर्गः – शिवप्रकोपः
(श्लोकसंख्या ५०, पृष्ठानि २१८-२२१)

शिवराज आगरानगरीं गच्छति १-१७, दिल्लीपतिसमीपे गमनम् १८-२९, शिवप्रकोपः ३०-३२, रामसिंहमुद्दिश्य शिवराजस्य सक्रोधं भाषणम् ३३-३८, सभ्येषु संभ्रमः ३९-४३, औरंगजेबस्य भाषणम् ४४-४५, रामसिंहः शिवराजं क्षमां याचते ४६-४९, राजसभात्यागः ५०.

त्रिपञ्चाशत्तमः सर्गः – निर्बन्धपाशः
(श्लोकसंख्या ६६, पृष्ठानि २२२-२२६)

औरंगजेबस्य सुहृदः शिवापराधान् वर्णयन्ति-१-१५, निर्बन्धपाशः १६-२०, रामसिंहस्य प्रतिज्ञा २१-२७, शिवराजस्य भाषणम् २८-३३, औरंगजेबं प्रति शिवराज्यस्य पत्रम् ३४-४६, रामसिंहस्य जागरूकता ४७-५०, पुत्रबन्धनवार्तया जिजादेव्या व्याकुलता ५१-५२, समर्थरामदासस्य आगमनम् ५४-५७, रामदासस्य भाषणम् ५८-६६.

चतुष्पञ्चाशत्तमः सर्गः – बन्धविमोचनम्
(श्लोकसंख्या ६६, पृष्ठानि २२६-२३१)

विमुक्त्यर्थं शिवराजः परमेश्वरं प्रार्थयते १-१४, अन्तःप्रेरणा

Scanned by CamScanner

१५-१७, शिवराजः फौलादखानं वशीकरोति १८-२४, मिष्टान्न-वितरणम् २५-२७, शिवराजस्य अस्वास्थ्यम् २८-३१, गूढं प्रयाणम् ३२-३७, फौलादखानस्य वञ्चना ३८-४७, औरंगजेबस्य व्यथा ४८-५१ डिण्डिमघोषणासु शिवराजवर्णनम् ५२-५९, शिवानुयायिनां पीडनम् ६०-६६.

**पञ्चपञ्चाशत्तमः सर्गः – मातृपुत्रसमागमः**

(श्लोकसंख्या ६४, पृष्ठानि २३२-२३५)

जिजादेव्या अवस्था १-४, पुत्रविमुक्त्यर्थं भगवत्प्रार्थना ५-२०, तपस्विनाम् आगमनम् २१-२९, तपस्विनो जिजादेवीं प्रणमन्ति ३०-३२ मातृपुत्रसमागमः ३३-३६, शम्भुराजविषयं रहस्यम् ३७-४०, प्रजासु परमानन्दः ४१-५४.

**षट्पञ्चाशत्तमः सर्गः– पुनरुत्थानम्**

(श्लोकसंख्या ६४, पृष्ठानि २३६-२३९)

जयसिंह-निधनम् १-४, शिवराजस्य दिल्लीपतिं प्रति पत्रम् ५-१२, दिल्लीपतेः विध्वंसाज्ञाः १३-२९, सप्तकोटीश्वर-मन्दिरस्य निर्माणम् ३०-३६, विजयार्थं शिवराजः युद्धवीरान् प्रोत्साहयति ३७-६४.

**सप्तपञ्चाशत्तमः सर्गः – सिंहगडविजयः**

(श्लोकसंख्या ७४, पृष्ठानि २४०-२४४)

तान्हाजिम् उद्दिश्य शिवराजस्य भाषणम् १-१०, विवाहार्थं निमन्त्रणम् ११-१४, जिजादेवीम् उद्दिश्य तान्हाजिभाषणम् १५-२३, सुहृत्सम्मुखं शिवराजस्य भाषणम् २४-३४, सिंहगडयुद्धवृत्तान्तः ३५-६४, सूर्याजिभाषणम् ६५-६९, शिवराजस्य मित्रशोकः ७०-७४.

**अष्टपञ्चाशत्तमः सर्गः – स्वराज्यविमोचनम्**

(श्लोकसंख्या ५५, पृष्ठानि २४५-२४८)

सार्वत्रिकी विजययात्रा १-१८, यवनसेनापति-पराभवः १९-३३, औरंगजेबस्य बहादुरखानं प्रति पत्रम् ३४-४०, बहादुरखानस्य प्रत्युत्तरम् ४१-४८, करदीकृतभूपालः शिवराजः ४९-५५.

Scanned by CamScanner

Scanned by CamScanner



**नवपञ्चाशत्तमः सर्गः – छत्रसालप्रबोधनम्**

(श्लोकसंख्या ५१, पृष्ठानि २४९-२५२)

शिवराजयशःप्रभावः १-६, छत्रसालः स्ववृत्तान्तं शिवराजाय कथयति ७-२१, छत्रसालस्य प्रार्थना २२-३४, मुक्तियुद्धार्थं शिवराजस्य सन्देशः ३५-५१.

**षष्टितमः सर्गः –पर्णालविजयः** (श्लोकसंख्या ६०, पृष्ठानि २५३-२५७)

पर्णालदुर्गे शिवसैन्यप्रवेशः १-९, विजयवार्ता १०-१२, वीरसन्मानः १३-१६, विजापुरराजसभायां खवासखानस्य भाषणम् १७-३०, बहलोलखानो शिवाक्रमणार्थं नियुक्तः ३१-३८, बहलोलस्य भाषणम् ३९-४६, बहलोल प्रस्थानम् ४७-४८, शिवराजः प्रतापरावं नियुनक्ति ४९-५३, पिपासाकुला शत्रुसेना ५४-६०, बहलोलदूतः प्रतापरावं प्रार्थयते ६१-६९ प्रतापरावस्य रिपुसैन्ये सदयता ७०-७१.

**एकषष्टितमः सर्गः – प्रतापरावहौतात्म्यम्**

(श्लोकसंख्या ३५, पृष्ठानि २५८-२६०)

प्रतापरावं प्रति शिवराजस्य पत्रम् १-८, प्रतापरावस्य निश्चयः ९-१२, बहलोलस्य उपद्रवः १३-१६, सप्तवीरैः सह प्रतापरावस्य हौतात्म्यम् १७-२३, आनन्दरावस्य विक्रमः २४-२७, प्रतापरावनिधनवार्तया शिवराजस्य शोकः २८-२७, भार्यानिधनम् ३३-३५.

**द्विषष्टितमः सर्गः – गागाभट्टसंकल्पः**

(श्लोकसंख्या ६२, पृष्ठानि २६१-२६४)

वाराणसी-वर्णनम् १-२०, गागाभट्टवंशवर्णनम् २१-२५, गागाभट्टः २६-२९, गागाभट्टस्य शिवराजं प्रति आगमनम् ३०-४०, गागाभट्टकृतं शिवराजस्तवनम् ४१-५४, राज्याभिषेकसूचना ५५-६२.

**त्रिषष्टितमः सर्गः – भवानी प्रार्थना**

( श्लोकसंख्या १२२, पृष्ठानि २६५-२७३ )

राज्याभिषेकवार्तया लोकानाम् आनन्दोत्साहः १-९, राजधानी-

स्थापना १०-२५, राज्याभिषेक-मुहूर्तः २६-२७, प्रतापदुर्गे गमनम् २८-३२, भवानी-स्तोत्रम् ३३-१२२.

**चतुष्षष्टितमः सर्गः – राज्याभिषेकारम्भः**

( श्लोकसंख्या ४९, पृष्ठानि २७४-२८३ )

शिवराजस्य व्रतबन्धो विवाहश्च। गणपत्यावाहनम्। वरुणपूजनम्। विप्राणामाशीर्वचनम्। मन्त्रपाठः। पुण्याहवाचनम्। मातृकावाहनम्। पुरोहितवरणम्। ऋत्विग्वरणम्। विष्टरप्रदानम्। मधुपर्कः। कङ्कणबन्धनम्। बन्दिमोचनम्। वैनायिकी शान्तिः। कलशस्थापनम्। अम्बिकाविनायकपूजनम्। नवग्रहप्रतिष्ठापना। यजमानाभिषेकः। बलिप्रदानम्। अम्बिकाविनायकप्रार्थना। दक्षिणादानम्।

**पञ्चषष्टितमः सर्गः – शान्तिप्रयोगः**

(श्लोकसंख्या १४, पृष्ठानि २८४-२८६)

मण्डपप्रोक्षणम्। वह्निस्थापनम्। इन्द्राणीविनायकार्चनम्। स्वस्तिवाचनम्। चालन्या अभिषेकः। अभिषेकमन्त्राः। यजमानमूर्धनि गौरसर्षपतैल-गोघृतहवनम्। इन्द्राणीप्रार्थना। मत्स्यबलिः। विनायकप्रार्थना। सूर्योपस्थानम्। दक्षिणार्पणम्। ईशानीपूजनम्।

**षट्षष्टितमः सर्गः – ग्रहयागः** (श्लोकसंख्या ३०, पृष्ठानि २८७-२९२)

अग्निस्थापनम्। ग्रहावाहनम्। अधिदेवता-प्रत्यधिदेवतावाहनम्। नक्षत्रदेवतावाहनम्। लोकपालाद्यावाहनम्। ग्रहनक्षत्र-दिक्-पालादिहवनम्। लोकपालाद्यावाहनम्। ग्रह-नक्षत्रादिहवनम्। चतुर्थदिवसे विरामः। पञ्चमे दिने नक्षत्रयागः। षष्ठे दिने नैर्ऋतियागः। सप्तमे दिने इन्द्रपूजनम्। हवनानि। कलशोदकेन यजमानाभिषेकः। मणिबन्धनम्। सहस्रभोजनम्।

**सप्तषष्टितमः सर्गः – राज्याभिषेकारम्भः**

( श्लोकसंख्या ७२, पृष्ठानि २९३-२९७ )

सप्तमेऽह्नि संध्यासमयविधयः। अष्टमेऽह्नि प्रातः शिवराजस्य मण्डपप्रवेशः। मण्डपपूजनम्। ध्वजपूजनम्। चतुर्घटस्थापनम्। अभिषेकशालायां घटस्थापनम्। महावेद्यां अग्निनवग्रहस्थापनम्। हेमकलश-

Scanned by CamScanner

वेदसूक्तघोषः । बलिदानम् । पूर्णाहुतिः ।
स्थापनम् । गायत्रीमन्त्रैः हवनम् । आसन्दीसमारोहणम् । अभिषेकार्थं
अभिषेकवर्णनम् । मण्डपप्रवेशः । गणेशपूजनादयो विधयः । भूमि-
प्रार्थना । अभिषेकः । सप्तमेऽहनि सायं. मण्डपपूजनम् । ध्वजस्थापनम् । चतु-
शयनम् । शिवराजस्य मण्डपप्रवेशः । औदुम्बरीयासन्दीस्थापनम् । अभि-
र्दिक्षु-चतुर्विध-घटस्थापनम् । वेद्याम् अष्टदिक्षु जलकुम्भस्थापनम् । महावेद्यां
षेकशालायां भद्रासनस्थापनम् । हैमकलशस्थापनम् । कुण्डेष्वग्निस्थापनम् ।
सनवग्रहहुताशनस्थापनम् । वेदमन्त्रघोषः । मन्त्रजपः । द्वारजपः ।
द्रव्यत्यागः । होमः । (१-२०)।। सकलकुण्डेषु पूर्णाहुतयः । अभि-
सामसूक्तगायनम् । सर्वदिक्षु वेदघोषः । गोमूत्रगोमयादिभिरभ्यञ्जनम् ।
षेकशालायाम् अभ्यञ्जनं मृत्संस्कारः राज्याभिषेक-प्रार्थना । शाखाभि-
(२१-४०) मण्डपप्रवेशः । वेद्यारोहणम् । शिवराजस्य विविधा-
षेचनम् । महाभिषेकशालायां सिंहासनाधिष्ठितस्य मुखावलोकनम् ४१-६० ॥
भिषेकाः । स्तोत्रवाद्यादिध्वनयः । कांस्यपात्रे शिवराजस्य औदार्यम् ७२.
सार्वत्रिकदानानि । ६१-७१ ॥

**अष्टषष्टितमः सर्गः – राज्याभिषेकः**

(श्लोकसंख्या ३५, पृष्ठानि २९८-३००)

शिवराजस्य मण्डपप्रवेशः । रथारोहणम् । शरक्षेपणम् । मण्डप-
प्रदक्षिणा । सप्तदशेषुभिः बैल्वलक्ष्यवेधनम् । रथदानम् । अक्षक्रीडनम् ।
स्वर्णासनारोहणम् । विश्रान्तिः । उषःकाले पुनर्मण्डपप्रवेशः । मण्डपवर्ण-
नम् । शिवराजवर्णनम् । स्वर्णसिंहासनाधिरोहणम् । पट्टबन्धनान्ते गागा-
भट्टस्य घोषणा । उपायन-प्रत्युपायनानि । मण्डपप्रदक्षिणा । नगरप्रदक्षिणा
देवदर्शनम् । ब्रह्मार्पणम् ।

**समाप्तम्**

# श्रीशिवराज्योदयम् महाकाव्यम्

## "सह्यमहाराष्ट्रीयम्" नाम प्रथमः सर्गः ।

श्रीमदूर्जितमुदग्रमैश्वरं सर्वदुःखविपदोघसंहरम् ।
धाम शैवमथवाऽस्तु वैष्णवं मन्महे मनसि तन्निरन्तरम् ॥१॥
अस्ति दक्षिणदिगेकमण्डनं नातितुङ्गशिखरावलीमयम् ।
भारतस्य परमप्रियं महाराष्ट्रमित्युचितनाम मण्डलम् ॥२॥
भाति यत्र शिखरावली मधौ पुष्पितव्रततिजालकावृता ।
पुष्पबिल्वदलपुञ्जपूजिता स्थाणुलिङ्गशतमालिकेव सा ॥३॥
यत्र पर्वततटीस्खलन्नदी-नीरगद्गदनदन्महाध्वनिः ।
मेघगर्जितधियाऽभिनन्द्यते ताण्डवेन समदैः शिखावलैः ॥४॥
वार्षकालिकसहस्रनिर्झरैः भास्करोज्ज्वलमयूखभास्वरैः ।
भाति हीरकरसावगुण्ठितो रत्नसानुरिव यो द्रवीभवन् ॥५॥
दुर्गसानुजलकुण्डदर्पणोद्बिम्बिता शरदि तारकावली ।
यत्र सम्परिविसर्पिरोचिषा विन्दते द्विगुणितोज्ज्वलप्रभाम् ॥६॥
मेघपुञ्जवृततुङ्गशृङ्गवान् शारदीं च दधदैन्दवीं कलाम् ।
ध्यानसुस्थिरविशालविग्रहो व्योमकेश इव चन्द्रशेखरः ॥७॥
यस्य दुःसहनिसर्गतेजसा कुण्ठितै रिपुकुलैर्विनिर्ममे ।
रोषनिःश्वसितसोष्ममारुतैः हैमनेऽपि पवने कवोष्णता ॥८॥
ज्योतिषा परिविकीर्णरोचिषा यत्र दाहसमयेषु संहृतम् ।
विप्रतापभयलज्जया ध्रुवं दाहताधिकमधित्यकास्वपि ॥९॥
ब्रह्मशैलजनिता सरिद्वरा येन भाति हि निजाङ्कलालिता ।
पूर्वसागरसमागमोत्सुका स्वर्णदीव गिरिचक्रवर्तिना ॥१०॥
देवतात्महिमशैलसञ्चितं सिन्धुतोऽम्बु परिगृह्य पावनम् ।
सिन्धुसागर उदूर्मिपाणिभिर्यं निषिञ्चति चिराय भक्तितः॥११॥
उन्नतावनतसानुराजिभिः यः पिताऽपि सरितां सहस्रशः ।
पार्थिवः पतिरिव प्रभासते सुस्थिरायितमहोर्मिभीषणः ॥१२॥
सप्तदिव्यकुलपर्वतान्तरे सप्तवाहवदतिप्रतापवान् ।
सह्यनामभृदपीह यः सदाऽऽविश्चकार हि निजामसह्यताम् ॥१३॥

Scanned by CamScanner

## ज्ञाननिष्ठ-जनचित्त-विष्टरः—चञ्चल-श्रुतिविशिष्ट—विग्रहः ।

श्रीचिन्तामणेश्वरः (थेऊर)

श्रीमहागणपतिः (रांजणगांव)

श्रीविनायकः (मढ)



श्रीबल्लाळेश्वरः (पाली)

यत्र चाष्टविषयेषु राजते सोऽष्टसिद्धिविभवो विनायकः ।

श्रीविघ्नेश्वरः (ओझर)

श्रीसिद्धिविनायकः (सिद्धटेक)

श्रीगिरिजावरदः (जुन्नर)

श्रीमयूरेश्वरः (मोरगांव)

सागरः परशुरामयाचितो याचकस्य समवेक्ष्य वीरताम् ।
यस्य पश्चिमतटाश्रयां ददौ वासभूमिरिति तामुपत्यकाम् ॥१४॥
द्वादशात्मशुभलिङ्गतोधिकान्यत्र भूरि रुचितोऽवधाप्य च ।
शम्भुना तदितराणि भारते सर्वतो निदधिरे कथञ्चन ॥१५॥
ज्ञाननिष्ठजनचित्तविष्टरश्चञ्चलश्रुतिविशिष्टविग्रहः ।
यत्र चाष्टविषयेषु राजते सोऽष्टसिद्धिविभवो विनायकः ॥१६॥

* * * * * *



**पञ्चवटी**

तच्चिरन्तनमहर्षिसेवितं प्राप्य पूतवटपञ्चकं पदम् ।
यत्र दाशरथिनाऽपि विस्मृतं मातृसन्निधिमहासुखं चिरम् ॥१७॥

* * * * * *

रामचन्द्रपदपङ्कजाङ्कितां जानकीविरहदुःखसाक्षिणीम् ।
यत्र पावनतमां वनस्थलीं वन्दते परमभक्तितो जनः ॥१८॥
रावणापहृतजानकीशुचा व्याकुलस्य रघुनन्दनस्य च ।
येन वानरबलेन सर्वथा घोरसंगरसहायता ददे ॥१९॥



वीरमारुति: ।

ग्रामसीमसु सरित्तटेषु वा यत्र पिप्पलतलेषु दृश्यते ।
लोहितो ह्यसुरशोणितैरिव दक्षिणाभिमुखवीरमारुति: ।।२०।।

* * * * * *

ब्रह्मविष्णुशिवनामतस्त्रिधा संविभक्तवपुष: परात्मन: ।
यत्र चात्रिमुनिपुत्रविग्रहे भावुकैश्चिरमुपासितैकता ।।२१।।
अप्रतिष्ठमिव काशिकापुरं साङ्गवेदविदुषां द्विजन्मनाम् ।
गर्जनाभिरकरोच्च तत् प्रतिष्ठानमस्य हृदयैकभूषणम् ।।२२।।
कीर्तनाहतमृदङ्गमर्दलकांस्यतालशततालनादिनी ।
धर्ममन्दिरमनोज्ञघण्टिका यत्र पण्ढरपुरी प्रकाशते ।।२३।।
पाण्डुरङ्गदृढभक्तिविह्वला: पण्डिताश्च वणिज: कृषीवला: ।
यत्र सत्कविपवित्रगीतिभि: नादयन्ति गिरिकाननान्यपि ।।२४।।
ईश्वरोपनिषदर्थबोधिनीं ज्ञानभक्तिकवितासुधामयीम् ।
प्राकृतामपि गिरं चकार यो ज्ञानराज इह सोऽधितिष्ठति ।।२५।।
योगिभिश्चिरसमाधिधारिभिर्भूमिगर्भनिहितात्ममूर्तिभि: ।
देश एष सकलोऽपि संस्फुरद्-योगशक्तिरिव भाति सर्वथा ।।२६।।

पण्ढरपुरी

कीर्तनाहतमृदङ्गमर्दलकांस्यतालशततालनादिनी ।
धर्ममन्दिरमनोज्ञघण्टिका यत्र पण्ढरपुरी प्रकाशते ॥२३॥

* * *

भूमिगर्भगतशास्त्रविज्जनः प्रज्वलन्मुखममुं महागिरिम् ।
शङ्कते, परमनेन तत्सदाऽऽविष्कृतं निजजनोग्रतेजसा ॥२७॥

व्याघ्रवृन्दविततोच्चगर्जनैः गह्वरप्रतिनिनादमेदुरैः ।
व्यञ्जयत्यतिभयंकरार्यतिं वीरवृत्तिमिव यः स्वभावजाम् ॥२८॥

यः स्वधर्मपरिरक्षणोद्यतैः खड्गशूलधनुरादिकोविदैः
शस्त्रकोश इव संबभौ जनैः हिन्दुभूकटितरावलम्बितः ॥२९॥

आहिमालयमुदीर्णसद्यशाः वीरवर्यविनताङ्घ्रिपङ्कजः ।
येन मेकलसुतातटे कृतो हर्षहीन इव हर्षवर्धनः ॥३०॥

सर्ववर्णकुलसम्भवाङ्गना जन्मसिद्धरणरागतः सदा ।
यत्र शस्त्रमयकेलिशालिनी चण्डिकेव ददृशेऽद्रिसम्भवा ॥३१॥

मल्लकेलिषु विशेषरागतः शोणमृत्कणविलिम्पनैर्नराः ।
यत्र वार्धकसितान् स्वमूर्धजान् चक्रिरेऽम्बुजपरागसुन्दरान् ॥३२॥

पाण्डुरङ्गः ।

पाण्डुरङ्गदृढभक्तिविह्वलाः पण्डिताश्च वणिजः कृषीवलाः ।
यत्र सत्कविपवित्रगीतिभिः नादयन्ति गिरिकाननान्यपि ॥ २४॥

* * * * * *

पारतन्त्र्यहृतशक्तिभिर्जनैर्यत्रवीरचरितेऽवलोकितः ।
दुष्प्रधर्षतमवीर्यभासुरः क्षात्रधर्म इव मूर्ति-सञ्चरः ॥ ३३॥
राक्षसप्रतिमघोरशात्रवे प्रेरयन् मरणभीतिवेपथुम् ।
चापचक्रधर–रामकृष्णयोर् योऽभवत् प्रतिनिधिः स्वकर्मणा ।
यत्र वेरुलशिलोच्चये दृढं बुद्धविष्णुशिवसेवकैः कृतम् ।
शिल्पकर्म तदनल्पमूर्तिकं विस्मयास्पदमशेषभूतले ॥३५॥
यद् विलोक्य सकलाः कलाविदः विस्मयस्तिमितलोचना इव ।
स्वानुभूतिमपि तर्कयन्ति ते स्वप्नवच्च विततेन्द्रजालवत् ॥३६॥
वेदनादरहितेऽपि भूतले वैदिकद्विजकुलोत्थितैः स्वरैः ।
मार्जितप्रणववर्णमूर्धगश्चन्द्रबिन्दुरिव यो ह्यभासत ॥३७॥

Scanned by CamScanner



ज्ञानराजः ।

ईश्वरोपनिषदर्थबोधिनीं ज्ञानभक्तिकवितासुधामयीम् ।
प्राकृतामपि गिरं चकार यो ज्ञानराज इह सोऽधितिष्ठति ॥ २५ ॥

* * * * * *

धर्मराज्यजनितं सुदुर्लभं पुण्यकर्मनिरतैश्च मानवैः ।
यत्र भूमितल एव पावने स्वर्गलोकसुखमन्वभूयत ॥३८॥

तत्र चन्दनवने यथोरगाः नन्दनोपवन उन्मदासुराः ।
म्लेच्छशासनधुरन्धराः खरा हन्त सौख्यमपहन्तुमुद्यताः ॥३९॥

यत्र सौख्यमसुखं हि तत्र च यत्र सम्पदथ तत्र वा विपत् ।
तद्विरुद्धमपि तन्वती क्वचित् कालचक्रगतिरिद् गरीयसी ॥४०॥

वेदमन्त्रमयपावनध्वनिः यत्र कर्णपथमागतः पुरा ।
हन्त तत्र हतविप्रयोषितां क्रन्दनार्तनिनदोऽपि शुश्रुवे ॥४१॥

यत्र भक्तजनवृन्दनर्तनं तन्तुवाद्यसहितं मनोहरम् ।
तत्र बर्बरविलासिताण्डवं मद्यपानसहितं भयंकरम् ॥४२॥

श्रीक्षेत्रनृसिंहवाडी

ब्रह्मविष्णुशिवनामतस्त्रिधा संविभक्तवपुषः परात्मनः ।
यत्र चात्रिमुनिपुत्रविग्रहे भावुकैश्चिरमुपासितैकता ॥२१॥

* * * * * *

स्त्रीजनातिशयपूज्यभावतो यत्र ताः समरमन्त देवताः ।
तत्र मङ्गलविवाहमण्डपाद् वह्निसाक्षिकमपाहृताः स्त्रियः ॥४३॥

दुःखदग्धहृदयाङ्गनाजन-श्वासमारुतविशेषदाहतः ।
म्लानता बत लतास्वभासत सोष्मता च मलयानिलेष्वपि ॥४४॥
फुल्लपद्मरुचिगैरिकध्वजान् सन्निपात्य सकलान् सनातनान् ।
शैवलातिहरिता ध्वजाः पुनः सर्वतो हि यवनैः प्ररोपिताः ॥४५॥
हन्त देवगिरिणापहारितं तच्च पूर्वपदमात्मनामतः ।
म्लेच्छकर्मभिरभूदचिन्तितैः सोऽपि दैत्यगिरिरेव तत्त्वतः ॥४६॥
ग्रामपत्तनसरित्सरोवराः म्लेच्छवाक्कलुषितात्मसंज्ञकाः ।
नष्ट-पूर्व-विभवा नृपा इव तेऽभवन् परिचयेऽपि दुर्विदाः ॥४७॥
रामदेवनृपतेर्विखण्डितं मुण्डमुद्धृतवसाशिरास्थिकम् ।
हन्त कच्चरजलप्रणालिकावक्त्रमित्युपहितं नराधमैः ॥ ४८ ॥
शालिवाहननिवासमन्दिरं सन्निपात्य तदतीवसुन्दरम् ।
तत्र चन्दिरकलाधरं स्वकं मन्दिरं यवनशासकैः कृतम् ॥ ४९॥
अग्निचन्द्ररविवंशजैरपि क्षत्रियैर्हतबलैरिवाहतैः ।
हा श्ववृत्तिरुररीकृताऽधमम्लेच्छशासकपदेषु निस्त्रपम् ॥ ५० ॥
काश्यपात्रिभृगुमुख्यगोत्रजाः ब्राह्मणाः श्रुतिपथात् परिच्युताः ।
देववाचमपहाय मङ्गलां म्लेच्छवाचि धनलोभतो रताः ॥ ५१ ॥
उद्यदर्कदरपाटलप्रभां ये प्रभातसमये ह्युपासिरे ।
ते तदाङ्गुलिपिनद्धकर्णकाः वारुणीमभिमुखा ववन्दिरे ॥ ५२ ॥
पाहि पाहि भगवन् जनानिमान् म्लेच्छराज्यपरिपीडितानिति ।
प्रार्थयंश्चिरमुदश्रुलोचनाः साधवः क्वचन भग्नमन्दिरे ॥ ५३ ॥
ग्लानिरत्र घटते यदा यदा धर्मसाधुजनयोस्तदा तदा ।
सम्भवामि तदिदं वचः स्वकं विस्मृतं किमधुना जनार्दन ॥ ५४॥
धर्मसंस्कृतिविनाशकारिणी चित्तवित्तबलबुद्धिशोषिणी ।
म्लेच्छराज्यघटिता हि दासता ऐहिकी प्रकटनिर्ऋतिर्नृणाम् ॥५५॥
गौरियं हि जननीव ते मता नस्तथैव, परमत्र साऽधुना ।
हन्त हन्त पथिलोकसङ्कुले हन्यते चिरमनाथवत् प्रभो ! ॥ ५६॥
किं करोमि बत कुत्र यानि वा प्रार्थयाम्यथ कमत्र राघव ।
दृश्यते तव तपोवनस्थली ध्वस्तनन्दनवनस्थलीव सा ॥५७॥
घोरसंकटतमोविदारिणी निर्मलान्तरनभोविहारिणी ।
चन्द्रिकेव जगदीशतोषिणी भवितरेव हि सतां बलीयसी ॥५८॥
भक्त्याकुलार्तवचनैः सततं जनानां चेतोऽद्रवद् द्रुतमहो जगदीश्वरस्य।
भक्तान्तरङ्गभवविह्वलवाच एव देवान्तरद्रवविधावुचितोऽभ्युपायः॥

॥इति श्रीशिवराज्योदये महाकाव्ये प्रथमः सर्गः समाप्तः॥

---

# श्रीशिवराज्योदयम् महाकाव्यम् ।

## "साधुवर्यद्वयम्" नाम द्वितीयः सर्गः

तुकारामः रामदासः

रामदासतुकारामौ ह्यध्यात्मज्ञानदीपकौ ।
असङ्गशस्त्रसन्नद्धौ भिन्नावप्येककेन्द्रगौ ॥ २ ॥

* * * * * *

अथ भाविनमुत्कर्षमावेदयितुमुत्थितौ ।
उग्रशान्तौ महासाधू सूर्याचन्द्रमसाविव ॥१॥

रामदासतुकारामौ ह्यध्यात्मज्ञानदीपकौ ।
असङ्गशस्त्रसन्नध्दौ भिन्नावप्येककेन्द्रगौ ॥२॥

महाराष्ट्रमहाम्भोधौ तयोरुज्वलतेजसोः ।
सहसोत्थानमभवत् चन्द्रकौस्तुभयोरिव ॥३॥

तयोः सम्पर्कतः सद्यो जनता-हृदयाम्बरे ।
आत्मतेजः समुत्स्फूर्तं मैत्रावरुणसप्रभम् ॥४॥

Scanned by CamScanner

दिव्यतेजस्विनोरासीत् तयोः समसमागमः ।
मुक्तिप्रदो महाराष्ट्रे भक्तिकर्मध्वनोरिव ॥५॥
लोकार्थकामसिद्ध्यर्थं प्रायेण करुणैश्वरी ।
आविर्भवति लोकेस्मिन् मूर्तिमाधाय धार्मिकीम् ॥ ६॥
सत्सुधासिन्धुलहरी चित्कल्पतरुमञ्जरी
सुखेन्दुमृगकस्तूरी करुणा पारमेश्वरी ॥ ७॥
सामर्थ्यैश्वर्ययशसां कीर्तिसम्पत्तितेजसाम् ।
जननी जन्मभूमिश्च करुणा पारमेश्वरी ॥८॥

**तुकारामः –**

अभङ्गवाणी यस्याभूद् आर्षवाणीव पूजिता
स्वानुभूत्येकसारत्वात् कविता सारवत्तया ॥ ९॥
य "स्तुकाराम"यं कायं स्वर्गं नीत्वा सलोकताम् ।
द्यावापृथिव्योरकरोत् पुण्यैः परमहंसवत् ॥ १०॥
अब्राह्मणोऽपि ब्रह्मज्ञः निर्द्वन्द्वो द्वन्द्ववानपि ।
यो मोहकोऽपि निर्मोही विग्रही चाप्यविग्रहः ॥ ११॥
क्षणशः कणशश्चैव तनुक्षेत्रे विहङ्गमैः ।
क्षीयमाणेऽपि भजनैः योऽकरोत् पुण्यसञ्चयम् ॥ १२॥
विठ्ठलस्मृतिमात्रेण निर्यन्नीरं यदक्षिजम् ।
हृदये नीरसस्यापि भक्तिवल्लीमवर्धयत् ॥१३॥
मञ्जुलोन्नादिनीं श्रुत्वा यद् वीणामैकतान्तवीम् ।
चातुर्मास्येऽपि वैकुण्ठे निद्राभङ्गोऽभवद्धरेः ॥ १४॥
मध्ये वैष्णववीराणां वीणादण्डधरः सदा ।
तर्जयन्निव नास्तिक्यं ददृशे स तदग्रणीः ॥१५॥
यं प्राकृतकविश्रेष्ठम् अप्राकृतगुणान्वितम् ।
अनूत्सिक्तमनूचाना वन्द्या अपि ववन्दिरे ॥ १६॥
प्रसाद इव सच्चित्ते यद् भालफलके बभौ ।
धवलस्तिलको हृद्यो गोपीचन्दनकल्पितः ॥१७॥
शश्वदन्तःप्रवृत्तस्य जपयज्ञस्य साक्षिणी ।
तुलसीकाष्ठमालाऽसौ यदीयहृदये बभौ ॥ १८ ॥
प्राक्तनानां सुतपसां परिपाक इवाबभौ ।
धौतवासोमयो वेशो यस्य काये तपोमये ॥१९॥

सर्वत्रेश्वरभावेन सर्वथाऽवनतं शिरः ।
यस्योष्णीशसितं रेजे यशः स्वमिव पिण्डितम् ॥२०॥
हृदयंगमभावार्द्रं दिव्यभक्तिरसप्लुतम् ।
वचो-ब्रह्म ननर्तेव यदीयहरिकीर्तने ॥ २१॥
वैदेहीमिव यद् वाणीं गङ्गेवेन्द्रायणी नदी ।
चिररात्राय निर्मग्नां संररक्षोद्दधार च ॥ २२॥
प्राकृतामपि यद्वाणीं सेवमानोऽत्र विन्दते ।
सुसंस्कृतत्वं दुष्प्रापं सर्वलोकशुभङ्करम् ॥२३॥
सीताया इव यद्वाचःस्पर्शतो रघुनाथवत्
विमूढोऽपि समाजोऽयं प्रकृतिं स्वामपद्यत ॥२४॥
यदीयैः कांस्यतालानां तालमन्वाहतैः पदैः ।
संक्षुण्णो भक्तिमार्गोऽभूत् स महाराष्ट्रमण्डले ॥२५॥

**रामदासः**––

यद्रूपेण महौजस्कः क्षात्रभावः परन्तपः ।
प्राप्तुं भूयस्तपःशक्तिं ब्राह्मीं मूर्तिमिवाश्रितः ॥ २६॥
भक्तिप्रियोऽनिकेतश्च वसुधककुटुम्बकः ।
लोकप्रपञ्चनिरतस्तथाप्येकान्तमास्थितः ॥ २७ ॥
जाग्रद्दिवानिशं बाह्यान्तरारिदमनोद्यतः ।
रात्रिबुद्धं दिवासुप्तं नूनं संयमिनं हसन् ॥२८॥
कालेन महता नष्टः यः कृष्णेनापि बोधितः ।
स समुज्जीवितो येन कर्मयोगः स्वकर्मणा ॥ २९॥
गोदावरीसरिन्नीरे यो निमग्नार्धविग्रहः ।
जपमग्नो जनैर्मेने जपयज्ञः सविग्रहः ॥३०॥
तिष्ठन्नेकेन पादेन ह्यामध्यन्दिनमोदयात् ।
सहस्रपादमुद्यन्तं कुर्वँल्लज्जारुणप्रभम् ॥ ३१॥
गोदावरीसरित्कुण्डे तिष्ठन् तिष्ठद्गु यो बभौ ।
जटालः श्मश्रुलो मूर्तस्तिष्ठद्धोम इवोज्ज्वलः ॥ ३२॥
उर्ध्वचन्दनरेखाभ्यां भालस्थाभ्यां विरोधिनोः ।
तुल्यत्वमादिशन्नूनं प्रपञ्चपरमार्थयोः ॥ ३३ ॥
तीर्थाभिषेकपूतं स्वं वपुर्भूयोऽपि भूतिमत् ।
कृत्वा दिशन् सहावस्थां पावित्र्यैश्वर्ययोरिह ॥ ३४॥
रघुवीरगुणग्रामं क्रमशः संस्मरन्निव ।
चलदोष्ठपुटं नित्यं भ्रामयञ्जपमालिकाम् ॥ ३५॥

ब्रह्मचर्यव्रतप्राप्तं दण्डमुद्यम्य पैप्पलम् ।
तर्जयन्निव निर्भीकः सर्वान् धर्मरिपून् सदा ।। ३६ ।।
अष्टमूर्तेरपावित्र्याद् रक्षन्नापोमयीं तनुम् ।
वज्रसारे दधन् मुष्टौ तीर्थोदककमण्डलुम् ।। ३७।।
पाञ्चभौतिकपिण्डस्य धारणार्थमयाचत ।
पञ्चमुष्टिमितं धान्यं योऽन्वहं गृहपञ्चके ।। ३८ ।।
रघुवीरजयोद्घोषं गर्जन्नुच्चैर्गृहे गृहे ।
रामदासशुभोपाधिं प्रापोपाधिक्षयेऽपि यः ।। ३९ ।।
पदस्थपादुकायुग्मोत्थितैश्चटचटायितैः ।
निर्दिशंस्तोर्थसञ्चारे धर्मस्य त्वरितां गतिम् ।।४०।।
आशीर्वचनसंयुक्तां यदीयां सहसोदिताम् ।
ब्रह्मवर्चस्विनीं पुण्यां वाचमर्थोऽनुधावितः ।। ४१।।
कञ्चित् पञ्चत्वमापन्नं नरमुज्जीव्य लीलया ।
योऽव्यञ्जयत् स्वसामर्थ्यं राष्ट्रसंजीवनक्षमम् ।। ४२।।
येनाप्रपादमाधाय कौपीनं गैरिकारुणम् ।
अरुणेनेव निर्दिष्टः स्वातन्त्र्याहर्नवोदयः ।। ४३ ।।
श्मश्रुलेन जटालेन स्वाननेन च यो बभौ ।
धूमावृतो महातेजा यज्ञाग्निरिव जङ्गमः ।। ४४ ।।
नवोदितः समर्थोऽसौ विश्वामित्र इवापरः ।
प्रबोधयन्महाराष्ट्रं मित्रवन्मन्त्रवद्गिरा ।। ४५ ।।
धगद्धगद्विनिर्गच्छत्प्रलयंकरदाहभृत् ।
ज्वालेव सर्पसत्रस्य यद्वाणी रणकर्कशा ।। ४६ ।।
धीरगर्जनया लोकाः येन सर्वे प्रबोधिताः ।
नवोदितेन मेघेन सिंहा इव गुहाशयाः :। ४७ ।।
धर्मराज्याग्रदूताभं यमासेतुहिमाचलम् ।
सञ्चरन्तं प्रतिक्षेत्रं प्रतिपादं नतो जनः ।।४८।।

तिमिरनिचयमग्ने रत्नसूमण्डलेऽस्मिन्
कथमपि स सुधांशुर्वारुणो हन्ति दोषम् ।
जगति परमशेषध्वान्तविध्वंसनार्थम्
दिनमणिरिव नान्यः कोऽपि पुण्यप्रतापी ।। ४९।।

सन्मन्त्रजागरविनिर्गतनैद्रमुद्रः लोकोऽखिलः कमपि मानवलोकबन्धुम् ।
सह्योदयाद्रिशिखरे समुदीयमानं भास्वत्सहस्त्रकरमीक्षितुमातुरोभूत् ।।५०।।

।। इति श्रीशिवराज्योदये महाकाव्ये द्वितीयः सर्गः समाप्तः ।।

Scanned by CamScanner

# श्रीशिवराज्योदयम् महाकाव्यम् ।

## "वसन्तमाङ्गल्यम्" नाम तृतीयः सर्गः

अथ प्रशान्ते शिशिरर्तुयुग्मे नीहारमन्दीकृतचन्द्रसूर्ये ।
प्रम्लापिताशेषसरोजवृन्दे समागतोऽसौ सकलर्तुराजः ॥१॥
काष्ठावशिष्टास्तरवो महान्तः नष्टश्रियो भूपतयो यथैव ।
वसन्तभाग्योदयकालयोगे विनिर्गतां प्रापुरिवात्मलक्ष्मीम् ॥२॥
पिकद्विजा उद्गिरणेऽसमर्थाः चिराय ये मञ्जुलकूजितर्चाम् ।
वसन्तसौराज्यमनुप्रवृत्तं तेषां पुनः कूजनसामगानम् ॥३॥
नवीनचूताङ्कुररक्तकण्ठाः वसन्तराजागमनाग्रदूताः ।
सुस्वागतं पञ्चमरागतानैः पुंस्कोकिला ऊचुरखण्डमुच्चैः ॥४॥
ते दाक्षिणात्या मलयानिलाश्च श्रीखण्डसंपर्कसुगन्धवन्तः ।
सह्यप्रपातोच्छलितैस्तुषारैः आलिङ्गिता स्नेहभरेण गाढम् ॥५॥
पादाहतोऽद्यावधि दासवद् यो दधार शोभामसकृत् सशोकः ।
विनैव पादाभिहतिं स एव बभार शोभामसमामशोकः ॥६॥
आम्रप्ररोहानवधूनयन्तो वेगप्रवृत्ता मलयाद्रिवाताः ।
उड्डीनभृङ्गालिभिरुन्मदाभिः गुञ्जारवं मङ्गलमीरयन्ति ॥७॥
प्रफुल्लपङ्केरुहकोशजन्यं मधु प्रकामं मधुरं पिबन्तः ।
मध्वोर्यशः सञ्जगुरुच्चकैस्ते गुञ्जारवैरुन्मदचञ्चरीकाः ॥८॥
उद्गीयमानं स्वयशो निशम्य प्रसन्नचेता इव माधवोऽसौ ।
प्रफुल्लगुच्छच्छविभिर्मनोज्ञं शुचिस्मितं सम्प्रकटीचकार ॥९॥
निसर्गकाषायरुचस्तरूणां नवोद्गताश्चञ्चलपल्लवास्ते ।
विरेजिरे सह्यगिरौ विरुढाः उदर्कभाग्योदयवैजयन्त्यः ॥१०॥
हेमन्तसम्पातपराहताऽसौ अज्ञातवासेव हि याज्ञसेनी ।
सह्याद्रिसंस्था सुनिसर्गलक्ष्मीः पुनर्नवं वैभवमुद्दधार ॥११॥
मनोहरां वीक्ष्य मधुप्रवृत्तिं महाधनो यादववंशकेतुः ।
विदर्भसीमास्थितपत्तने स्वे वसन्तमाङ्गल्यमहं व्यतानीत् ॥१२॥
निमन्त्रितास्तेन महोत्सवाय सम्बन्धिनो ये सविशेषसङ्गाः ।
सुखप्रमोदावसरे नराणां प्रियः सुहृद्बन्धुसमागमो हि ॥१३॥
सुहृज्जनानां गृहमागतानां सुखाधिवासार्थमकारयत् सः ।
गृहाङ्गणे मण्डपमेकमुच्चैः मनोरथाकारमिवात्मनश्च ॥१४॥

Scanned by CamScanner

विचित्रवासःस्थगितोद्वितानः स्तम्भावनद्धोज्ज्वलकर्पटश्च ।
विरेजे स मण्डपः कौतुकमण्डपाभः ॥१५॥
अधः समास्तीर्णकटिर्विरेजे स मण्डपः कौतुकमण्डपाभः ॥१५॥
न्यस्ताः प्रतिस्तम्भमुदारगुच्छाः सपादपाः गैरिकरक्तकुण्डचः ।
ताभिर्गुहोद्यानमनोज्ञशोभाम् अचूचुरत्तत्पटमण्डपोऽसौ ॥ १६ ॥
निमन्त्रिताभ्यागतबान्धवानां सम्मानयोग्यानि सुखासनानि ।
फेनाच्छवासःपरिसंस्तृतानि हंसासनानीव बभुर्मृदूनि ॥१७॥
तन्मण्डपद्वारमुदारमुच्चैः विस्तीर्णसत्पर्णमयेन युक्तम् ।
रम्भातरुस्तम्भचयेन रेजे तिष्ठत्प्रतीहारमिवोत्पताकम् ॥ १८॥
ततो नभोमध्यमतीत्य किञ्चित् सूर्ये समुत्सर्पति पश्चिमाशाम् ।
सत्स्वागतं वक्तुमनाः स राजा तन्मण्डपद्वारमुपेत्य तस्थौ ॥१९॥
तदात्मजा काञ्चनकान्तकान्तिः पद्मानना़ऽसौ पितृसन्निधाने ।
बभौ सुमुक्ताभरणाऽम्बुजाक्षी पद्मेव साक्षात् सविधे पयोधेः ॥२०॥
ततः समेताः क्रमशः सखायः लसन्महोष्णीषभृतः सुवस्त्राः ।
सुकुण्डलाः काञ्चनरत्नहाराः सचन्दनाङ्का विहसन्मुखास्ते ॥२१॥
पयःसितान् कज्जलकृष्णवर्णान् तथैव कांश्चिद् विलसत्पृषत्कान् ।
विभूषणोन्नादवतस्तुरङ्गान् अध्यास्य केचित् समये समेताः ॥२२॥
विलम्बिघण्टामणिशंङ्खगुञ्जा मालाधरैरुत्ककुदैर्वृषैश्च ।
संवाह्यमानैः शकटैरुपेताः केचित्, पुनः केचन पादचर्याः ॥२३॥
तेष्वागतः कश्चन यौवनाढ्यः धीरोद्धतोऽल्पाल्पविभूषिताङ्गः ।
कराङ्गुलीलग्नकरेण साकं बालेन जल्पन् सकुतूहलेन ॥२४॥
सुधाकरास्यः कुमुदेक्षणश्च बिम्बाधरो मौक्तिककान्तदन्तः ।
तं मण्डपं वीक्ष्य मुदान्वितोऽसौ पप्रच्छ किञ्चित्पितरं किशोरः॥२५॥
तातायमुच्चैर्नवमण्डपो हि सुदर्शनः केन विनिर्मितोऽत्र ?
निशम्य तद्वाक्यमसौ युवापि प्रसारिताग्राङ्गुलिराह बालम् ॥२६॥
अमुं पुरा पश्यसि भूषणाढ्यं प्रालम्बसंवेष्टितकण्ठभागम् ।
हसन्मुखं त्वामभिवीक्षमाणं तस्यैव राज्ञः शुभमण्डपोऽयम् ॥२७॥
निमन्त्रितास्तेन वयं समस्ताः अत्यादरेणाद्य महोत्सवाय ।
तद् याहि शीघ्रं समयातिपातः कदापि कार्यो न निमन्त्रितेन ॥२८॥
"यन्नैव कार्यः समयातिपातः तत् किं विवाहो भविताऽत्र तात?
कालातिपातो हि विवाहयोगे न युज्यते खल्विति ते वदन्ति ॥२९॥
श्रुत्वेति मुग्धां तनयस्य वाणीं तं वक्तुकामः परिहासपूर्वम् ।
पिताऽऽह "नूनं तव मङ्गलार्थं सन्मण्डपोऽयं च महोत्सवश्च ॥३०॥
तद् वाक्यभावार्थमनाकलय्य मुग्धः स बालः पुनराह तातम् ।
"तन्मन्दमन्दं किमु सम्प्रयासि? धावन्तमन्वेहि च सत्वरं माम्" ॥३१।

इत्थं शिशोस्तस्य समुत्सुकस्य सम्मानयंस्तं मधुरानुरोधम् ।
युवा सधीरस्त्वरयाससाद तन्मण्डपद्वारमुदर्कभाग्यम् ।।३२।।
दृष्टवा कुमारं तमदृष्टपूर्वं उत्साहसम्पन्नमतिप्रसन्नम् ।
द्वारस्थिता स्मेरसरोरुहाक्षी पप्रच्छ मन्दं पितरं किशोरी ।।३३।।
" कः सत्वरं तात कुमार एषः धावन्निवाभ्येत्यभिमण्डपं नः ।
स्थास्यत्यसौ किं सदनेऽस्मदीये चिराय, यास्यथवाऽचिरेण ।।३४।।
निशम्य कन्यावचनं तदुक्तं हसन् स राजा सहसा प्रसन्नः ।
कर्तुं परीहासमिवातिमुग्धं समीपमभ्यागतमेनमाह ।।३५।।
"हं हो महाराज ! नवागतेन ह्येनां किशोरीं प्रतिहाररक्षीम् ।
नामाद्यनावेद्य न जातु लभ्यः सद्यःप्रवेशः शुभमण्डपेऽस्मिन् ।।३६।।
स प्राह बालः सहसा, श्रृणुध्वं कुलं पितुर्नाम ममापि नाम ।
भास्वत्कुले भोसलनामधेये जातोऽस्मि मालोजिसुतः शहाजिः।।३७।।
अन्योन्यमुद्वीक्ष्य कुमारकौ तौ जातप्रमोदावनिमित्तमेव ।
स्वजन्मजन्मान्तरजातसङ्गम् अनुस्मरन्ताविव निर्विकारम् ।।३८।।
सुखोपविष्टेषु सुहृज्जनेषु ताम्बूलपात्रेषु च चारितेषु ।
समुन्नते मण्डपमध्यभागे निशारुकं प्रादुरभून्मनोज्ञम् ।। ३९।।
तदा तदाकर्णयतां जनानां संवादसक्तश्रवणेन्द्रियाणि ।
मञ्जीरनादेन पदोत्थितेन हठादिवाकृष्य वशीकृतानि ।।४०।।
शैलेन्द्रकन्या–नटराजरूपं शैलूषयुग्मं प्रियचारुवेशम् ।
धिमिद्धिमिद्ध्वाननिषक्तपादं झटित्यकर्षन्नयनानि तेषाम् ।।४१।।
तपस्विनीं भूधरराजकन्यां परीक्षमाणः शिववर्णिलिङ्गी ।
नाट्येन यास्यन् विकटं सगीतम् आश्चर्यवत् सभ्यजनैरलोकि।।४२।।

शिवः– " वद वद पर्वतराजसुते! तप एवं कस्य कृते तपसि ?
अमलमिदं कमलं च कुवलये मानिनि! किं त्वं म्लापयसि?।।४३।।

पार्वती– " त्रिगुणातीतं त्रिभुवननाथं त्रिदशमहेशं किं स्मरसि ? ।
त्रिपुरहरं वा त्रिखरशरं वा त्रिनयनकमलं किं नमसि "? ।।४४।।

शिवः–"शशिनि किमिति तनुषे तनमानं मृगशिशुनयने मन्थरताम् ?
हिमनगतनये विततश्वसने सन्तनुषे वा किमहिमताम्?" ।। ४५।।

पार्वती–"गगनसुकेशं चन्द्रविभूषं भसितसितं तं किं मनुषे ?
भुजगकुण्डलं मेचककण्ठं परमयोगिनं किं वनुषे ?" ।।४६।।

शिवः– " वद वद बाले वितथतपस्विनि ! किमिति दरिद्रं कामयसे ?"

पार्वती–"चल चल दूरे भगवन्निन्दक! किमिति वृथा मां पीडयसे?"।।४७

तदीश्वरीयप्रणयप्रदर्शि विलासलास्यं प्रविलोकयन्ती
सभाऽभवत्सा विगतान्यसंज्ञा गाढानुरागैकरसावमग्ना ।।४८।।

Scanned by CamScanner

तौ बालकौ नृत्यरसानभिज्ञौ नातिप्रसन्नाविव नर्तनेन ।
प्रौढा हि यस्मिन् विषये सरागाः प्रायेण तस्मिन् शिशवोऽपरागाः ॥४९॥
तौ हेतुनाऽनाकलितेन बालौ परस्परं केनचिदान्तरेण ।
आकृष्यमाणाविव मुग्धभावौ समागतौ मण्डपपार्श्वकोणे ॥५०॥
बालः स तामाह रुषेव किञ्चित्, "यदा मया नाम निवेदितं ते।
तदैव नावेदितमात्मनोऽपि नाम त्वया मां प्रति किं नु मूढे ?"॥
तं रोषदष्टाधरमीषदिद्धं विलोक्य भूयः परिहासबुद्ध्या ।
"जिजाह" मित्युक्तवती व्यतानीत् वक्त्रेऽस्य पार्श्वस्थितकुंकुमं सा ॥५२॥
दृष्ट्वैव तस्याः प्रथमापराधं स भूयसा रोषभरेण बालः ।
मुष्टिद्वये कुङ्कुममाददानः प्रतिक्रियां हि द्विगुणां चकार ॥५३॥
भूयश्च बालाऽपि तथा चकार पुनः स बालोऽपि हि तादृशं च ।
जिह्वाग्रदर्शं विविधोपहासं तौ चक्रतुः कुङ्कुमरागकेलिम् ॥५४॥
तिरस्करिण्यन्तरसंस्थितानां नवाङ्गनानां चटुलेक्षणानि ।
तयोरनागस्करयोरकर्षत् अह्नाय सा कुङ्कुमरागलीला ॥५५॥
विदर्भराजः स च यादवोऽपि कन्यामनालोक्य समीपसंस्थाम् ।
पश्यन् समन्तात् सहसा ददर्श मनोहरां मुग्धकिशोरकेलिम् ॥५६॥
तत्पार्वतीशंकरनाट्यनृत्यम् शैलूषयोः कृत्रिमरागबन्धम् ।
सन्त्यज्य नैसर्गिकभावहृद्यं दृश्यं चकर्षास्य दृशं मनश्च ॥५७॥
अव्याजमुग्धैः शिशुहावभावैः वशेक्षणं यादवमीक्षमाणाः ।
मालोजिमुख्या हि सभासदस्ते तन्नेत्रकेन्द्राभिमुखा बभूवुः ॥५८॥
बालारुणोषःप्रतिमौ कुमारौ तौ कुङ्कुमारक्तमुखारविन्दौ ।
सम्पश्यतः सभ्यजनस्य हर्षो मनस्यणीयस्यमितो ममौ नो ॥५९॥
स्त्रीणां च तालोत्थितशिञ्जितेन पुंसां च हास्यध्वनिना तथोच्चैः।
सविद्युदम्भोधरगर्जनाभः संशुश्रुवे सभ्यजनप्रहर्षः ॥ ६०॥
आकस्मिकाम्भोधरगर्जितेन साश्चर्यभीताविव बालहंसौ ।
तौ दृष्टवन्तौ सहसा गुरूणां दृक्पातवेध्यत्वमिवात्मनोश्च ॥६१॥
पलायमानौ त्रपया महत्या भीत्या च तौ द्रागनुधाव्य बालौ ।
स्वयं गृहीतौ बत यादवेन बुधेन विद्याविनयौ यथैव ॥६२॥
शैलूषसन्त्याजितमञ्चकेऽसौ सन्तस्थिवानात्तकुमारयुग्मः ।
प्रफुल्लनेत्राननपुण्डरीकः शुचिस्मितां वाचमुवाज राजा ॥६३॥
"हे बान्धवाः सम्मुदितान्तरङ्गाः शृणुध्वमीषद् वचनं मदीयम् ।
यस्याखिलानन्दकराविदानीं याताविमौ कारणतां कुमारौ ॥ ६४॥
यः पार्वतीशंकरयोरिदानीम् आलोकितः सम्प्रणयोऽभिनीतः
तत्पूर्तये तादृशयोश्चिराय किशोरयोर्मङ्गलसङ्गमोऽस्तु ॥ ६५॥

सूर्यान्वयो भोसलनामकोऽसौ चन्द्रान्वयो यादवसंज्ञकश्च ।
सन्मण्डपे सेतुनिभेऽत्र यातां पूर्वापरौ तोयनिधी व योगम् ॥६६॥

चन्द्रान्वयस्योज्ज्वलवैजयन्ती जिजा विशेषोच्छ्वसितं मदीयम् ।
भवत्वसौ भोसलवंशहर्म्ये चिराय माङ्गल्ययशःपताका ॥" ६७॥

श्रुत्वैव सभ्या अमृतायमानं हृत्कर्णसन्तर्पणमाप्तवाक्यम् ।
"बाढं" 'वरं' "युज्यते"इत्यनेकैः ते साधुवादैःप्रशशंसुरुच्चैः ॥६८॥

सपदि यादव-वंश-पुरोहितः स्वयमुपेत्य तदैव जगौ मुदा ।
स्वरचितं चिरमङ्गलमष्टकं नववधूवरयोर्हितकाम्यया ॥६९॥

**॥ मङ्गलाष्टकम् ॥**

" यस्योद्दामविवर्तनैर्जलनिधेरुच्चैः समुत्क्षेपिताः
मुक्ताच्छा जलबिन्दवः समभवन् भास्वत्प्रभास्तारकाः ।
यः शङ्खासुरनाशितश्रुतिसमुद्धाराय बद्धव्रतः
श्रीविष्णोः प्रथमावतार इह वः कुर्यात् सदा मङ्गलम् ॥ ७०॥

लीलाकूर्मकलेवरेण भुवनोद्धारैकशीलेन सा
मज्जन्ती प्रलयाम्बुधौ वसुमती येनोद्धृता लीलया ।
क्षुब्धाम्भोनिधिमन्थनेन हि परिभ्राम्यन् महामन्दर-
सौन्दर्यं समवाप यः स भगवान् कुर्यात् सदा मङ्गलम् ॥ ७१॥

कल्पान्तक्षुभिताग्निभासुरतरोज्ज्वाले विशालेक्षणे
झञ्झावातविकीर्णतोयदमहासङ्घातरौद्राः सटाः ।
विद्युद्दामसहस्रभास्वरविभा-जाज्वल्यमाना नखाः
यस्यासन् नरसिंहरूपविभवे कुर्यात् सदा मङ्गलम् ॥७२॥

त्रैलोक्याक्रमणोद्यत-त्रिचरणप्रक्षेपणव्यापृतं
यत्पादाम्बुजसम्भवत्रिपथगानिःष्यन्दसम्प्लावितम् ।
सद्यःसागरमज्जनोद्गतमिव ब्रह्माण्डमुद्भासितं
विष्णोरद्भुतवामनाकृतिरसौ कुर्यात् सदा मङ्गलम् ॥७३॥

क्षत्रध्वान्तनिमग्नभूमिवलये रक्ताक्तधाराधरो
यस्य स्कन्धनिवेशितः स परशुर्बालार्ककान्तिं दधौ ।
मत्तः क्षत्रियराजवंशविपिनोच्छेदाय यो दीक्षितः
ह्यक्षत्रमहोर्म्यः स भगवान् कुर्यात्सदा मङ्गलम् ॥७४॥

रक्षोध्वान्तविनाशनाम्बरमणिर्दातृत्वचिन्तामणिः
सीताकण्ठमणिर्विकर्तनमहावंशस्थमुक्तामणिः ।
पुण्यश्लोकशिरोमणिः सुकवितापाथोधितारामणिः
मर्यादापुरुषोत्तमः स नृमणिः कुर्यात् सदा मङ्गलम् ॥७५॥

कारावासमपास्य जन्मसमये यो निर्गतो गोकुलं
गोपीगोपकिशोर-गोभिरनिशं यो नीतवान् शैशवम् ।
नित्यं गोपदरेणुरूषिततनुर्यो गोरसोल्लालसः
गोसेवार्थमुपागतः स भगवान् कुर्यात् सदा मङ्गलम् ॥ ७६ ॥

वेदोद्धारधृतव्रतोऽपि खलु यो वेदान्निनिन्द स्वयं
चक्राद्यायुधसंयुतोऽपि हि तिरश्चक्रे क्रतौ हिंसनम्
यः संसारसुखं सुखेन विजहौ संसारसौख्याय च
श्रीविष्णोर्नवमावतार इह वः कुर्यात् सदा मङ्गलम् ॥ ७७ ॥

माद्यन्म्लेच्छगणान्निहन्तुमखिलान् त्रातुं सतीसज्जनान्
धर्मं स्थापयितुं श्रुतिस्मृतिगतं पातुं च गोब्राह्मणान् ।
दम्पत्योरनयोरखण्डितयशाः कश्चित् पुनर्जायतां
यो दिव्याद्भुतसद्गुणैरगणितैः कुर्यात् जगन्मङ्गलम् ॥७८॥

शिवतमदिवसे शिवे मुहूर्ते शिवगुणयोरशिवापनोदनाय ।
शिवसाक्षितया शिवोदयाय प्रियतमयोः शिवमङ्गलं बभूव ॥७९॥

॥ इति श्रीशिवराज्योदये महाकाव्ये तृतीयसर्गः समाप्तः ॥

———

# श्रीशिवराज्योदयम् महाकाव्यम् ।

## "शिवजन्म"नाम चतुर्थः सर्गः ।

अथ सुतां पतिभक्तिसमुत्सुकां स समवेत्य विदर्भनराधिपः ।
प्रियसुहृत्सचिवोत्तमसन्निभां स्वगृहिणीं निजगाद मनोगतम् ॥१॥
प्रियसुताविरहं परिभाव्य सा सपदि बाष्पपरिप्लुतलोचना ।
प्रतिजगाद जिजाजननी पतिं किमपि कुण्ठितकण्ठमविस्फुटम् ॥२॥
हृदयनाथ! जिजा हृदयं मम श्वसितमुच्छ्वसितं खलु जीवितम् ।
अमृतवर्तिरिवाक्षिसुखप्रदा वद कथं बत तद् विरहं सहे? ॥३॥
विरहकल्पनया मम मानसं हिमवदेव घनीभवति क्षणात् ।
द्रवति हन्त विमर्शवशात् पुनर् वहति बाष्पभरेण बहिर्मुखम् ॥४॥
किमु वदामि जिजाविरहाकुला तदभिधानपरा रसना मम ।
गदितुमुत्सहते न तदप्रियं प्रिय कुरुष्व यथाभिमतं तव ॥५॥
पतिकुलाभिगमनाहनि सङ्गता उषसि ताः सुखदुःखसमाकुलाः ।
प्रियसखीसहवासभृशातुराः सवयसः प्रतिवेशिकुलाङ्गनाः ॥६॥
विहितमङ्गलगाहनभास्वरा रुचिरकुङ्कुमचन्द्रकलाधरा ।
अरुणवस्त्रयुता शुशुभे जिजा शरदुषा इव सर्वमनोहरा ॥७॥
धवलपाटलनीलसरोरुहैः विहितमङ्गलकुन्तलभूषणा ।
मुखविलोचनपद्ममयी जिजा सपदि सा ददृशे सरसी यथा ॥८॥
विविध-हीरक-मौक्तिक-भूषणैः हृदयसन्निहितैर्विरराज सा ।
गुणवती मृदुमञ्जुलभाषिणी सदुपमानगणैः कविता यथा ॥९॥
नयननीर-भृशार्द्रमुखी जिजा पतिपुराभिमुखी समदृश्यत ।
विषमसह्यशिलोच्चयमार्गगा गिरिनदीव महार्णवगामिनी ॥१०॥
पतिमिताऽमितसम्मदमानसा तदवलोकनमोदितमानसम् ।
तदुदितेङ्गितमात्रवशंवदा प्रथमसिद्धिरिवोत्तमकर्मिणम् ॥११॥
अथ चिरन्तनपुण्यकृतां सतां युगयुगान्तरसञ्चितकर्मणाम् ।
सुपरिपाकमिवोत्कटपिण्डितं कर्मापि गर्भमुवाह जिजा शिवम् ॥१२॥
श्रुतिरिवाद्भुतमन्त्रबलान्विता विजयभाग् रणनीतिरिवोज्ज्वला ।
प्रखरवीररसा कविता यथा प्रबलगर्भधरा शुशुभे जिजा ॥१३॥
प्रथिततीर्थजलान्तरगाहने मुनितपस्विपदाम्बुजवन्दने ।
सकलगोद्विजसम्परिपालने मनसि साऽविरतं प्रतितत्वरे ॥ १४॥

Scanned by CamScanner

भगवतीं महिषासुरमर्दिनीं समनुकर्तुमिवैच्छदनेकदा ।
प्रखरपट्टिशखड्गकृपाणभृत् निजवपुर्मुकुरे समलोकयत् ॥१५॥
नगरसीमविलङ्घनमङ्गलाहनि चतुर्दिगुपान्तजिगीषया ।
सरभसेव महारणरागिणी सकलदिक्षु च चक्षुरुपाक्षिपत् ॥१६॥
शरदि मङ्गलदीपमहोत्सवे पतितमन्दिरगर्भगृहेष्वपि ।
शतशतोज्ज्वलदीपकमालिका रचयितुं न्यदिशत् सकलान् जनान्॥
नभसि गैरिकशोणशुभप्रभाम् उषसि सायमवेक्ष्य दिने दिने ।
समुदितो भगवद्ध्वज इत्यसौ प्रमुदिता समवन्दत भक्तितः ॥१८॥
न हि समैहत वीक्षितुमुज्ज्वलां निमिषमप्युदयाचलसंस्थिताम् ।
यवनशासनवैभवबोधिनीत्यतिशुभामपि चान्द्रमसीं कलाम् ॥१९॥
हततुरुष्कजयध्वजसप्रभेत्यभिविलोकयितुं न समैहत ।
मरकतोज्ज्वलपर्णसुशोभितां सुरुचिरामपि सह्यवनश्रियम् ॥२०॥
विषमसह्यगुहावनचारिणो वसनभूषणहीनतनूञ्जनान् ।
समवलोकयतादरतो यथा न हि तथा धनिनः स्वजनानपि ॥२१॥
हनुमदर्जुनभीमरघूत्तम-प्रभृतिवीरवरेण्यचरित्रतः ।
प्रथितसङ्गररौद्ररसाः कथाः निशमितुं भृशमुत्सुकतां दधे ॥२२॥
परमपूरुषवीरचरित्रतो भृशमरोचत सैव कथाद्भुता ।
नखरशस्त्रबलेन महासुरो हत उरःप्रविदारमसौ यदा ॥२३॥
सकल एष जनोऽस्तु सुखाप्लुतः चिरमनामय एव च जीवतु ।
जगति पश्यतु भद्रमनेकधा भृशमयाचत सेति सदाशिवम् ॥२४॥
पतिरिमां निकटप्रसवामथो निजनिवासमरातिकुलाकुलम् ।
दृढमवेत्य पदं च निरापदं किमपि सुप्रसवं समचिन्तयत् ॥२५॥
निकटवर्तिनमुन्नतदुर्गमं शिवमयं च शिवासमधिष्ठितम् ।
गिरिगतं शिवनेरिशिवाभिधं स्ववशदुर्गमिमामहिनोदसौ ॥२६॥

**निदाघवर्णनम्** ।

अथ मधौ हि विलासविमूर्च्छिते तपनदीधितितापभयावहः ।
समय उष्णतयाऽतिविशोषको दहनबन्धुरिवाभियौ द्रुतम् ॥२७॥
रविमवेक्ष्य सुतप्ततरं भृशं मरुदियाय स तद्गुणतां स्वयम् ।
बत बत क्षमया प्रथिता क्षमाऽभवदसौ सहसा ध्रुवमक्षमा॥२८॥
खनितुमेव हि कूपतलं श्रमी विवरमेत्य भुवो भृशशीतलम् ।
सदनशेखरसंस्थितशिल्पिनं रविकराभिहतं समुदीक्षते ॥२९॥
सुघटिता समता हि निदाघतः सकलसज्जनवन्दसमीहिता ।
विनिहिताः सदनेष्वखिलैर्यतो धनिभिरप्यधनैरिव मृद्घटाः ॥३०॥

Scanned by CamScanner

क्षणश एव यथा रविरुच्चकैः समधिरोहति तुङ्गनभोगिरिम् ।
जगदिदं स्वकरैरुपकर्षयन् नयति सन्निधतामिव चात्मनः ॥३१॥
रविकरैरदयं युगपद् हृतं सकलमीनसरोवरजीवनम् ।
प्रखरतापभृतां दहनात्मनां हतबलेषु कुतः करुणाऽसताम् ॥३२॥
तरणिना हि धरान्तरसंस्थितान् सकलरत्ननिधीनभिवीक्षितुम् ।
निजसहस्रकरैरिव दारिता कठिनमृत्कवचाऽपि वसुन्धरा ॥३३॥
तपनदीधितितापभृशाकुलं पशुकुलं विनिविष्टमहर्दिवम् ।
तरुतले बहुपल्लवशीतले पिहितचक्षुरहान्तमपेक्षते ॥ ३४ ॥
सुषमयाऽमरराज हरिद् यया बहु विराजति पाटलयोषसि ।
प्रतिनिशं सकलास्वपि दिक्षु सा स्फुरति नूनमहो दववह्निना॥३५॥
मरुति वाति निशास्वतिदाहके स्फुरति दावमहानलतेजसि ।
न रविरस्तमगादिति शङ्कया बहिरियाय न घूककदम्बकम्॥३६॥
विगतपङ्कमये धरणीतले तरणितापहतं खलु गोकुलम् ।
न च विदूरमपैतुमभीहते क्षणमहो लघुकूपसमीपतः ॥ ३७॥
कृपणतुल्यमनेन जलं चिरं विजनकूपखलेन हि सञ्चितम् ।
तदपनीतमतो रविणा स्वयं खलधनं हरणीयमिहाधिपैः ॥३८॥
सकलकूपसरःसरितां पयो रविकरैरुपशोष्य दिवानिशम् ।
बहुपिपासितयेव दिवाऽधुना किमदयं सकलं परिपीयते ॥ ३९ ॥
यदि सरो विजलं क्व सरोरुहं ? न हि सरोरुहमेव कुतोऽलयः ?
यदलयो न कुतो मधुगुञ्जितं? न मधुगुञ्जितमेव कुतो मुदः?॥४०॥
बक उपेति सरित्तटमुत्सुको नियतदम्भतपश्चरणाय सः ।
विगतनीरतया पुलिने पुनः भवति तस्य नितान्तविडम्बना ॥४१॥
तपनदाह-सुदग्धतनूरियं बकततिः समगात् किमु कृष्णताम् !
इति सशंकमयं बहुकौतुकी वियति पश्यति काकततिं जनः ॥४२॥
समविशद् रविरश्मिविभर्जितः प्रकुपितोऽहिरितीव पिपीलिकाः ।
स्वविवरं परिहाय भयाकुलाः उदककुम्भसमीपमुपस्थिताः ॥ ४३॥
विकचमेचकनीरजपुञ्जवत् निशि नभः प्रतिभाति च माधवे ।
तदभिलाषवशीकृतमानसा इव समुत्पतिता उडुहंसकाः ॥४४॥
तपनदीधितितप्ततनूभृतो दिव इवाधिकघर्मपयःकणाः ।
उडुगणा हि निदाघनिशासु ते परिलसन्ति सुमौक्तिकसुन्दराः॥४५॥
सुखयितुं सकलानुपनीतमित्यभिविलोकितमादरतो जनैः ।
पवनजेन हिमालयशृङ्गकं प्रतिनिशं शशिखण्डमदो मुदा ॥४६॥

Scanned by CamScanner

शशिभुजङ्गवदेवसरिद्धरोऽपि स हरो न सहेत महातपम् ।
शिरसि सन्ततधारमतो जलं निहितमस्य जनैः प्रतिमन्दिरम् ॥४७॥
रविकरैरभितप्ततनूभृतां तरुविहीनपथं व्रजतां नृणाम् ।
क्वचिदकालघनो नभसि स्फुरन् वरदहस्तसमो भवति प्रभोः ॥४८॥
इति निदाघमहातापतपिते समय एव शुभाहनि माधवे ।
किमपि सौख्यमबोधितकारणम् स्वहृदये सहसा जनताऽन्वभूत् ॥
विपिनपुष्पसुगन्धवहो मरुत् परिजहर्ष तथैव हुताशनः ।
मुदितभृङ्गविहङ्गकुलं जगौ किमपि मङ्गल-गीतमविस्फुटम् ॥
सकलदेवकुलेषु महाध्वनिः मुरजशंखभवोऽनददुच्चकैः ।
निशमिताः सुचिरं जयगर्जनाः मुदितदेवगणैरिव घोषिताः ॥५१॥
सकलसज्जनमानसवर्तिनी परममङ्गलवाञ्छितवल्लरी ।
शुभतमेऽह्नि नवार्भकजन्मना सुफलिता शिवनेरि-महालये ॥५२॥
नवशिशोरतिभास्वरतेजसा न गृहमात्रगता लघुदीपिकाः ।
प्रतिहता यवनाधिपमस्तकस्थितकिरीटमहामणिभा अपि ॥५३॥

पुण्ये च नामकरणाहनि मीलिताभिः तस्याङ्गनाभिरुदितं हि नवार्भकस्य
तद्दुर्गदैवतसमाख्यमनन्तकीर्ति प्रेम्णा शिवाजिरिति मङ्गलनामधेयम् ॥

नवीरवर्यस्य रणोत्सुकस्य प्रियं शहाजेरपि तच्च नाम ।
शिवा भवेदाजिरमुष्य चेति स नामधेयार्थमुदाजहार ॥५५॥

नवीनां निरुक्तिं स्वतःकल्पितां तां स्वपुत्राभिधानस्य लोकान् ब्रुवाणः ।
पिता मन्त्रवत् संजुगुञ्जेव भूयः नवार्भकस्य तन्मङ्गलं नामधेयम् ॥५६॥

कुटीरे कुटीरे प्रसन्नान्तराणां शिशूनां च यूनां च सीमन्तिनीनाम् ।
ननर्तेव जिह्वाग्रमञ्चेऽभिधानं शिवाजिः शिवाजिः शिवाजिः शिवाजिः ॥

रसालरसरक्तकण्ठपिकवृन्दमञ्जुस्वराः
कृषीवलकुलाङ्गनाः प्रतिगृहं जगुः सर्वदा ।
सुशाययितुमर्भकान् स्वरचिताश्च गीतीर्नवाः ।
स्वबान्धवसुखश्रवाः प्रियशिवाजिनामाङ्किताः ॥ ५८ ॥

॥ इति श्रीशिवराज्योदये महाकाव्ये चतुर्थः सर्गः ॥

—–

## श्रीशिवराज्योदये महाकाव्ये "शिवशिक्षणं" नाम पञ्चमः सर्गः

जिजातनूजः शिवनेरिदुर्गे दिने दिने संववृधेऽतितेजाः ।
यथोदयाद्रावुदयोन्मुखोऽसौ क्षणे क्षणे बालसहस्ररश्मिः ॥१॥
विलम्बिदोलाशयने शयानः मुखारविन्देन पदारविन्दम् ।
लिहन् मुदा मातृमनोऽरविन्दे न्यषिञ्चदानन्दसुधाप्रवर्षम् ॥२॥
क्षुधाकुलं तं च विजानती सा माता जिजा सत्वरमुत्सरन्ती ।
गाढं गृहीत्वा हृदयावलग्नम् अपाययत् स्नेहमयं पयः स्वम् ॥३॥
स स्तन्यपीयूषरसं प्रसन्नः पपौ स्वमातुर्मुखमीक्षमाणः ।
आकेकराक्षोऽमृतरश्मिबिम्ब-निषक्तनेत्रो हि यथा चकोरः ॥४॥
अभ्यंगसुस्नातममुं कुमारं श्रीखण्डरेखाङ्कित-चन्द्रभालम् ।
विलोकयन्ती जनताद्रिसंस्था मेने शिवाजिं शिवकल्पमेव ॥५॥
संत्यज्य मृत्क्रीडनकानि सर्वाण्यबालसत्त्वः स हि वीरबालः ।
कृपाणखड्गच्छुरिकादिशस्त्रैः संक्रीडितुं तत्परतां दधार ॥६॥
आकर्ण-संकृष्टधनुर्गुणोऽसौ अनन्यदृष्टिः स्थिरचित्तवृत्तिः ।
विध्यन् स्ववेध्यं द्रुतमप्रमादं मेने गुणज्ञैः खलु वीरयोगी ॥७॥
सम्भ्रामयन् पट्टिशमुज्जवलाभं मरुज्जवेनेव सुनीलकान्तिः ।
रराज स स्वेदलवार्द्रमूर्तिः तडित्परीताभिनवाम्बुदाभः ॥८॥
दूरस्थवेध्याभिमुखं स्वशूलं प्रक्षिप्य शक्त्याऽपि पुनस्तमेव ।
संधर्तुकामः स्वकरेण भूयः शूलानुसारी प्रदुधाव वेगात् ॥९॥
स मल्लकेलीषु शिशून् वयस्यान् न केवलं जेतुमभूत्समर्थः ।
वयोऽधिका अप्यभवन्न शक्ताः तरस्विनं जेतुममुं कुमारम् ॥१०॥
वृक्षाग्रशाखासु समुत्प्लवन्तं प्लवङ्गवृन्दं भृशलोलशीलम् ।
विडम्बयन्नुड्डयनैः स बालः प्रमोदमग्नान् विदधे वयस्यान् ॥११॥
झञ्झामरुच्चञ्चलमुत्प्लवन्तं तुरङ्गमं रश्मिविनाकृतं च ।
स्फुरत्सटावग्रहणं स वेगात् क्षणादिवाध्यास्य चमच्चकार ॥१२॥
उक्षाणमुन्मत्तमपि प्रसह्य विषाणयोरात्मबलेन धृत्वा ।
प्रत्याक्षिपत्तं हि तथा यथाऽसौ वप्रावलीलारसमुत्ससर्ज ॥१३॥
सह्याद्रिजारण्यविहारलोलं शार्दूलशावं रभसा प्रगृह्णन् ।
पृष्ठं समध्यास्य मुदाऽस्य हिण्डन् धीरैरपि व्यात्तभयैरलोकि ॥१४॥

चित्रे भुजङ्गाभरणं विलोक्य शिवं तमेव ह्यनुकर्तुकामः ।
हठादिवाकृष्टुमियेष चान्तर्बिलं निलीनार्धतनुं भुजङ्गम् ॥१५॥
असौ +द्विपञ्चाशदुदम्बुकुण्डेष्वनेकधा तोयविहारसौख्यम्
अभीरभीक्ष्णं ह्यनुभूय खिन्नः समुद्रसंगाहनमाचकांक्ष ॥१६॥
सा वीरजाता नरवीरजाया जिजा निजार्भस्य च वीरवृत्तम् ।
अदृष्टपूर्वं प्रविलोकयन्ती जगाद जाताऽस्म्यपि वीरमाता ॥१७॥
कृपाणपाषाणकृतव्रणेषु शिशोस्तनावस्य च वज्रसारे ।
सतैलहस्तेन परामृशन्ती समन्वभूद् वीरसुतैकभाग्यम् ॥१८॥
आबाल्यतो वीररसैकसक्तं पिता निजं पुत्रमवेत्य सुज्ञः ।
सुक्षात्रसंस्कारविशेषदीप्तां कर्तुं तदीयां प्रतिभामियेष ॥१९॥
दादोजिनामानमुदग्रमानं पापैकभीरुं गुरुमग्रवर्ण्यम् ।
विश्वासपात्रं प्रियमात्ममित्रं न्ययोजयच्छस्त्रकलागुरुत्वे ॥२०॥
अजानता येन कदाचिदन्यतरोः फलं लूनमहेतुपूर्वम् ।
तं स्वापराधं परिहर्तुमैच्छत् यो हस्तविच्छेदनतो मनस्वी ॥२१॥
तस्मिन् गुरौ ब्राह्मणकर्मशीले महातपस्विन्यवसत् सुखेन ।
ऊर्जस्वला क्षत्रियवीरविद्या वितानवह्नाविव कर्मसिद्धिः ॥२२॥
दण्डप्रहार–च्छुरिकाविभेद–कृपाणविच्छेदन–शूलघातैः ।
स वञ्चिका-चर्मनिरोधयुक्तैः गुरूपदेशैरभवद् बलाढ्यः ॥२३॥
प्रडीन-संडीन-चतुष्कयुक्तैः क्षेपैरनेकैः करवालपाणिः ।
विद्युज्जवेनेव परिभ्रमन् सः जातः सहस्रैरपि दुष्प्रधर्षः ॥२४॥
यत्रोन्मदानां यवनाधमानाम् अभद्रशब्दः सहसोद्बभूव ।
तत्रान्धकारेऽपि हि भद्रशीलः स शब्दवेधी निजघान बाणम् ॥२५॥
शरीरसामर्थ्यवदेव तस्य प्रज्ञाबलं वर्धयितुं जिजाऽपि ।
संस्थापयामास गणाधिपस्य ह्युपासनार्थं महतीं सुमूर्तिम्+ ॥२६॥
मनीषितं साधयितुं स्वकीयम् अनन्यसंकल्पितपूर्वमुत्कः ।
भक्त्या स तं ज्ञाननिधिं ययाचे प्रज्ञां सुमेधां प्रतिभां च दीप्ताम् २७
स बालको भाग्यविशेषशाली बाल्ये हि यः प्रत्यहमाश्रुणोति ।
कथाः पवित्रा जननीमुखेन रामायणीया अपि भारतीयाः ॥२८॥
श्रीरामकृष्णार्जुनभीममुख्य–वीरोत्तमानां चरितामृतस्य ।
प्रबोधयन्ती परमं रहस्यं माताऽभवद्धर्मगुरुः शिवस्य ॥२९॥

---

+ शिवनेरिदुर्गे द्विपञ्चाशदुदकुण्डानि आसन् किलेति ज्ञायते ।

+ इयं मूर्तिः पुण्यपत्तनवासिभिः नगरदेवतेति साम्प्रतं पूज्यते ।

"वत्स ! स्वकं क्षत्रियजातिधर्मं न जातु कृच्छ्रेष्वपि संजहीहि ।
रामावतारे स्वयमीश्वरेण यः पालितो विश्वहितार्थमेव ॥३०॥
गोमातरं भूतलदेवतां तां त्रायस्व सेवस्व भजस्व भक्त्या।
पूर्णावतारे स्वयमीश्वरेण स्वकर्मणाऽऽदिष्ट इवैष धर्मः ॥३१॥
वेदोक्तशुद्धाचरणैकवित्तान् सत्तत्त्वसंचिन्तनमग्नचित्तान् ।
भूदेवतान् जङ्गमशास्त्रबोधान् त्रायस्व विप्रान् स्वभुजाश्रयेण॥३२॥
रामासु रामानुजवत् परासु मातृत्वबुद्धिं सततं दधीथाः ।
पराङ्गना यस्य मता स्वमाता स राजयोगी स च योगिराजः॥३३
सन्तो वसन्ते विजने जने वा संसेवनीया दृढभक्तितस्ते ।
श्रद्धस्व तत्सूक्तिषु सर्वथा त्वं श्रेयस्करं नान्यदतोऽत्र लोके ॥३४॥
धर्मेषु सर्वेषु समत्वबुद्धिं त्वं सर्वदा धारय धर्मनिष्ठः ।
मानव्यमाङ्गल्यपरा उदारा धर्मा हि सर्वे भगवत्प्रणीताः ॥३५॥
वेदानुकूलो मनुना प्रणीतः विभक्तवर्णाश्रमकर्मधर्मः ।
स एव पथ्योऽखिलमानवानां तद्रक्षणं ते परमो हि धर्मः ॥३६॥
ईशाधिवास्यं सकलं हि तत्तत् चराचरं गोचरमत्र यद्यत् ।
त्यक्तेन तेनैव न भुञ्जते ये चौरा हि ते तान् खलु दण्डय त्वम्॥३७॥
मान्यः स मे यः परमो हि धर्मः परं स सापेक्षतयैव सेव्यः ।
देवद्रुहां पापकृतां खलानां जानीहि हिंसामपि तामहिंसाम् ॥३८॥
एकान्तनिष्ठं त्रिविधं हि सत्यं न श्रेयसे तद्वदहिंसकत्वम् ।
कर्तव्यमालोच्य सदात्मनीनं पाल्यं द्वयं विश्वजनीनमेतत् ॥३९॥
द्विराह गीतासु जनार्दनो यत् वाक्यं स्मर त्वं चिरमुत्तमं तत् ।
श्रेयः स्वधर्मे निधनं हि लोके भयावहोऽसौ परधर्म उच्चैः ॥४०॥
कुलस्य वर्णस्य च राष्ट्रकस्य धर्मो हि कः का च परम्परा मे ।
अहर्निशं चिन्तय सम्यगेवं चिन्तामणिश्चिन्तनमेतदेव ॥४१॥
अनन्यभक्त्या परमेश्वरस्य स्थिरं मनः स्वं कुरु लोलशीलम् ।
यच्चञ्चलं बन्धनमत्र घोरं स्थिरं पुनर्मुक्तिनिदानमेव ॥४२॥
यदैन्द्रियं पञ्चकमात्मसंस्थं सोदर्यमप्यान्तरशात्रवं तत् ।
त्वं जागरूको निगृहाण शश्वत् समीहसे चेत् प्रभुतां प्रभूताम्॥४३॥
वाक् सुनृता कामदुघेव धेनुः सा शारदा मङ्गलदेवता वा ।
सात्यन्तसिद्धिः सकलार्थदात्री सैका परं कार्मणकर्मलोके ॥४४॥

मेरुर्निवासः खलु चेत् सुराणां स नातिदूरे विहितो नराणाम् ।
मनस्विनां कर्मपरायणानां हृदि स्थितो निश्चय एव मेरुः ॥४५॥
अस्तं गतो भानुरुदेति भूयः क्षीणोऽपि चन्द्रो लभते विकासम् ।
छिन्नोऽपि वृक्षः श्रियमुद्बिभर्ति तन्मा स्म भूः कार्यहतौ हताशः॥४६

Scanned by CamScanner

जहीहि भोगान् सुलभानपि त्वं भोगा हि भोगा इव पन्नगानाम् ।
स्वधर्मकल्याणपरायणस्ते महौजसो जातु न भोगसक्ताः ॥४७॥
प्रतिक्षणं क्षीयत आयुरेतत् नायाति यातोऽवसरः कदापि ।
तन्मा कृथा जातु वृथा स्वमायुः पले क्षणे वा दिवसेऽथ मासे॥४८॥
महाजनैः सत्तमतत्त्वनिष्ठैः क्षुण्णोऽत्र यः कण्टकितोऽपि पन्थाः ।
तमेव हि त्वं व्रज तत्र नूनं द्वारं चतुर्धा पुरुषार्थसिद्धेः ॥४९॥
सदैव देवं भज पूजय त्वं स्वकार्यसिद्धावपि मा स्म दृप्यः ।
विना जगन्नाथकृपाकटाक्षं न दिव्यकार्ये प्रभवन्ति मर्त्याः ॥५०॥
समीहसे त्वं यदि सर्वथैव लोकानुरागं भव सौम्यतेजाः ।
उल्लासने तोयनिधेः समर्था चन्द्रप्रभा जातु न सूर्यकान्तिः ।५१॥
अमित्रमित्रादिविवेकमादौ विधाय सम्यग् विनियोज्यमाना ।
दृढस्थिरा शाश्वतराजनीतिः नूनं यशोनिःश्रयणीह लोके ॥५२॥
आपत्सु रामः समरेषु भीमः दानेषु कर्णश्च नयेषु कृष्णः ।
भीष्मः प्रतिज्ञापरिपालनेषु विक्रान्तकार्येषु भवाञ्जनेयः ॥५३॥
म्लेच्छैश्चिरायाक्रमिताऽतिपापैः या मातृभूमिस्तव पुण्यभूमिः ।
प्राणव्ययेनापि विमोचयैनां कर्तव्यमेतत् तव जन्मसिद्धम् ॥५४॥
एवं यथाकालमुदीर्यमाणैः श्रुतेश्च सूक्तैरिव मातुरुक्तैः ।
संस्कारकृद्भिर्दृढसंस्कृतात्मा सदा सदाचारपरायणोऽभूत् ॥५५॥
तत्पावनं शिवचरित्रमनन्यतुल्यं बाल्येऽपि वीक्ष्य जनताऽऽदरनिर्भराऽभूत् ।
ऊर्जस्वलं सुविमलं निजधर्मनिष्ठं चारित्र्यमेव जनभक्तिनिदानमेकम् ॥५६॥

॥ इति श्रीशिवराज्योदये महाकाव्ये पञ्चमः सर्गः समाप्तः ॥

———

Scanned by CamScanner

श्रीशिवराज्योदये महाकाव्ये 'दम्पतीमतभेदः' नाम षष्ठः सर्गः

तं तथा तनुमनोमतिस्थितैः उज्ज्वलोर्जितगुणैः प्रभासितम् ।
श्रीशहाजिरवलोक्य नन्दितः राजकार्यनिरतो निरन्तरम् ॥१॥
आत्मजस्य मुखचन्द्रदर्शनं सर्वमातृपितृनेत्रतर्पणम् ।
तत्र सद्गुणविशेषशालिनः नात्र चित्रममृतायते यदि ॥२॥
मल्ल-केलिषु परिश्रमोद्गत-स्वेद-लिप्त-मृदु-रेणु-रूषितम् ।
स्वात्मजस्य वपुरुन्मनाः पिता निर्भरः स परिरभ्य निर्वृतः ॥३॥
द्वन्द्वयुद्धसमये निजात्मजं सर्वदा जयिनमेव दर्शिवान् ।
हर्षगर्वभरमत्तमानसः गर्जति स्म हरिगर्जमेदुरम् ॥ ४
वीक्ष्य सायमवनम्रमस्तकं पादयोः स च तमात्मनः सुतम् ।
सुप्रसन्नमनसाऽतिमङ्गलान् आशिषः शतसहस्रशो ददौ ॥ ५॥
तं विनीतमतिमात्रसंस्कृतं स्वात्मजं यवनराजसन्निधौ ।
नेतुमैच्छदभिवादनाय सः रम्यभव्यभवनं विजापुरम् ॥ ६॥
आह तत् स सहधर्मचारिणीं कल्पितं स्वकमनुत्तमं रहः ।
धीमतोऽपि पुरुषस्य भार्यया मन्त्रणा समुचितेति चिन्तयन् ॥७॥
साऽपि भर्तुरवगत्य काङ्क्षितम् मानिनी हि विषसाद तत्क्षणम् ।
म्लेच्छराजपुरतः स्वमात्मजं नो समर्हत नतं कथञ्चन ॥ ८॥
अप्रशस्तमपि भर्तुरीप्सितं श्रुण्वती स्मितमुखी पतिव्रता ।
मन्दनिःश्वसितपूर्वमाकुला संरुरोध विनयोदितैः पदैः ॥ ९॥
लोकरीति-निपुणस्य धीमतः राजनीतिकुशलस्य ते पुरः ।
अल्पशिक्षितधिया स्त्रिया मया भाष्यतेऽनुचितमेव तत्खलु ॥१०॥
हन्त किन्तु हतधीरियं मम निस्त्रपेव हि सखी बलादिव ।
प्रेरयत्यहह वक्तुमल्पकं मामभाषणपरां पुरस्तव ॥ ११॥
वन्दते दयित ! वन्दनोचितान् दैवतान् तव ममापि यः पदे ।
सज्जनांश्च भगवत्परायणान् म्लेच्छराजपुरतः स किं नमेत्? ॥१२॥
बालभास्करमिवोदयोन्मुखम् बालमप्यमुमिमे महौजसः ।
आनमन्ति शिवदर्शनं शिवं दृष्टमात्रमतिभक्तितो जनाः ॥१३॥
किं न पश्यसि मुखेन्दुमण्डले पाणिपादकमले च गोचरम् ।
जन्मसिद्धमिव पुत्रकस्य ते छत्रपत्युचितलक्षमजालकम् ॥ १४॥

Scanned by CamScanner

म्लेच्छराजसदनुग्रहामिषे श्वप्रवृत्तिरितरो जनोऽस्त्वयम् ।
हन्त तत्र हि कथं प्रवर्ततां सिंहशावचरितः सुतस्तव ॥ १५ ॥
म्लेच्छराजनगरीमवेक्ष्य तां देवमन्दिरविनाकृतामिव ।
तोयमात्रमपि नो पिबेदसौ तत् क्षमेत कवलग्रहे कुतः ॥१६॥
म्लेच्छराजनगरे जनाकुले हन्यते पथि चतुष्पथेऽपि गौः ।
दृक्पथे यदि पतेदमुष्य तत् वेत्सि नाथ स किमाचरिष्यति?॥१७
म्लेच्छराजनगरेऽङ्गनाजनः पीड्यते क्वचिदपोह्यते क्वचित् ।
स्त्रीजनापदसहिष्णुराक्रमेत् भीमवत् स सहसा सुतस्तव ॥ १८॥
हिन्दुराजपदसंश्रितां श्रियं म्लेच्छराजकवशंगतामिव ।
संश्रुणोति स तवात्मजो यदा स्वान्तमस्य दहतीव हि क्रुधा॥१९॥
तां तथा स सहधर्मचारिणीं भामिनीमतनुकूलवर्तिनीं ।
कर्तुमैच्छदनुकूलवर्तिनीं लोकरीतिमुपदिश्य कामपि ॥ २० ॥
"वाग्मिनि ! त्वदुदितं सुसंस्कृतं पुत्रसद्गुणसुधारसान्वितम् ।
सन्निपीय हृदयंगमं परं तृप्तिमेव हृदयं न मे गतम् ॥२१॥
भाग्यवानिह न कोऽपि दृश्यते मादृशः सदृशदारसंग्रही ।
काव्यसम्मिततयोपदिश्यते कान्तया य उचितोचितं नयम् ॥२२॥
स्वाभिमानिनमवैषि पुत्रकं त्वं यथाऽहमपि तं तथैव च ।
भारतीय-सुपरम्परोद्भवक्षत्रियस्य स गुणः स्वभावजः ॥ २३॥
आनमन्ति यदिमं सुतं तव दृष्टमात्रमपि ते महौजसः ।
नात्र चित्रमयि किं ब्रवीमि ते मस्तकं नमति मेऽपि तद्गुणैः॥२४॥
ईदृशं गुणगणान्वितं सुतं वन्दयामि यदि राजपादयोः ।
तोषमेष्यति स सर्वथा परं कल्पवृक्ष इह तोषितोऽधिपः ॥२५॥
मङ्गलं नृपतिवक्त्रदर्शनं श्रेयसेऽत्र नृपपादवन्दनम् ।
राजलोचनकटाक्षवीक्षितं धन्यमेव नरजीवनं भुवि ॥२६॥
यापितं नृपतिपाणिपल्लवे यौवनं खलु तदेव यौवनम् ।
विद्धि भामिनि! तदन्यथा पुनः यौवनं तदपि नाम वार्धकम्॥२७॥
भूभृतो हि सदनुगहस्य चेत् पात्रतां सुत उपैति तावकः ।
देवदुर्लभतरं लभेत सद्भागधेयफलमत्र भूतले ॥२८॥
सा कुशाग्रमतिरुत्तमा सती भर्तुरीप्सितमवेत्य तादृशम् ।
प्रस्फुरत्तरविलोचनाधरा हृद्गतं स्फुटमवोचदात्मजम् ॥ २९ ॥
"हृद्गतस्य तव नाथ हृद्गतं वेद्मि चानुदितमप्यहं सदा ।
क्षम्यतां प्रिय वदामि चेत् स्फुटं यत् प्रियं तव ममाप्रियं हि तत्॥
सर्व एव नरवीरमानिनः स्वाभिमानमपहाय निस्त्रपम् ।
यापयन्ति हतजीवितं स्वकं म्लेच्छराजपदकिंकरा इव ॥३१॥

क्षत्रियस्य च गुणः स्वभावजो यस्त्वया निगदितो ममाऽधुना ।
हन्त हन्त हतभारतेऽधुना क्षत्रिये क्वचन नावलोक्यते ॥३२॥
वन्दनीयचरणा जनाधिपाः यन्मतं तव ममापि तत् तथा ।
किन्तु तेषु निजधर्मशत्रवः नैव नैव मम ते तथा मताः ॥३३॥
राजलोचनकटाक्षवीक्षितं धन्यमेव नरजीवनं यदि ।
हिन्दुराजपदमाप्य तावकः पुत्र एव हि तथा करिष्यति ॥३४॥
लभ्यते नृपतिपाणिपल्लवं संश्रितैर्यदिह भूतले जनैः ।
प्राप्तभूपतिपदस्य लभ्यतां मत्सुतस्य शुभपाणिपल्लवे ॥३५॥
श्रेयसे नृपतिपादवन्दनम् आत्थ यत् तदपि सम्मतं मम ।
मत्सुतस्य पदवदनं तथा राजपीठमधितिष्ठतो भवेत् ॥३६॥
म्लेच्छभूमिभृदनुग्रहार्जितात् वैभवादपि वरीयसी मम ।
आत्मबाहुबलमात्ररक्षिता मानिनो वनसदः स्वतन्त्रता ॥३७॥
तां प्रकोपविततेद्धलोचनां द्यामिवोष्णसमयार्कभास्वराम् ।
वह्निसम्भृतशमीलतोपमां दर्शिवान् पतिरभूत् स विस्मितः ॥३८॥
या मदर्थमतिविप्रियं निजं सुप्रियं चिरममन्यत प्रिया ।
साऽधुना बत न साधु मन्यते मद्वचस्तनयमङ्गलास्पदम्" ॥३९॥
तत्पुनः किमुपदिश्यतामियम् ईषदुग्रवचनैर्मया प्रिया ।
चिन्तयन्निति निमीलितेक्षणः वीक्षितः स हि शिवेन तत्क्षणम्॥४०
तातमामिलितलोचनं तथा मातरं च तरुणारुणेक्षणाम् ।
वीक्ष्य विस्मयविकस्वरेक्षणः स क्षणादुपगतः सुलक्षणः ॥४१॥
सन्नमय्य विनयेन मस्तकं रत्नकुण्डलविशेषशोभितम् ।
चन्दनालिखितचारुचन्दिरं संजगाद स शुचिस्मितः शिवः ॥४२॥
"अम्ब! तात! किमिदं स्थिताविह मौनिनाविव रहस्युभावपि ।
किं विचिन्तयतमर्थमाकुलौ ब्रूतमद्य मम किं करोमि वाम् ॥४३॥
मन्द्रमेदुररवोदितं रहः पुत्रवाक्यममृतप्रसाददम् ।
सन्निशम्य सहसैव तावुभौ प्रापतुः प्रणयिनौ परां मुदम् ॥४४॥
उन्नमय्य चिबुकं सुतस्य च प्राहतुः सपदि तावुभावपि ।
जीव ! जीव सुखमार्कतारकं चिन्तितस्त्वमसि चेतसा यतः॥४५॥
तं पिता पुनरुवाच सस्मितं "यामि राजनगरीं मनोहराम् ।
किं न वाञ्छसि निरीक्षितुं च तां देवराजनगरीमिवोज्ज्वलाम् ॥
भान्ति यत्र सुमनश्चयोज्ज्वलाः वाटिकाः विविधवल्लरीयुताः ।
तोययन्त्रसुसमुच्छलत्पयःशीतलानिलविकीर्णरेणवः ॥४७॥
यत्र राजपुरुषा महाधनाः सुप्रदीप्ततमरत्नमण्डनाः ।
तुङ्गचञ्चलतुरङ्गमस्थिताः यान्ति सत्वरमितस्ततः पथा ॥४८॥

Scanned by CamScanner



**गोलघुमट** (विजापुरम्)

★ ★ ★ ★ ★ ★

यत्र सन्ति मदमत्तदन्तिनः क्लिन्नगण्डविवशीकृतालयः।
यैः स्वमन्थरगतैर्निरोधिताः सम्भ्रमन्ति पथि चञ्चला हयाः ॥४९॥

मण्डलाकृति-चमत्कृतिप्रदं तत्र पश्यसि महालयं मुदा+।
यत्र मन्दमुदितं पदं ध्रुवम् श्रूयते पृथगिवाष्टधा जनैः ॥५०॥

यत्र यान्ति परिणद्धकन्धराः हस्तिहस्तपरिपुष्टबाहवः।
खड्गशूलहतिविद्धरक्षसः गर्वभारगजगामिनो जनाः॥ ५१॥

भाषितं पितुरदो हि शुश्रुवान् उन्मना इव स बालको मुदा।
प्राह तात, सह याम्यहं त्वया वीक्षितुं महददो विजापुरम् ॥५२॥

तं तादृगुत्सुकमवेक्ष्य सुतं जिजाऽपि ह्यह्नाय विस्मृतवती प्रतिकूलभावम्।
प्रायेण तत् प्रियतमं सुतवत्सलानां पुत्रस्य यत् प्रियतरं परमप्रियस्य।॥५३॥

॥ इति श्रीशिवराज्योदये महाकाव्ये षष्ठः सर्गः समाप्तः ॥

+ अयं महालयः 'गोलघुमुट' 'गोलगुम्बज' इति वा नाम्ना सुप्रसिद्धः साम्प्रतमपि विराजते विजापुरे।

Scanned by CamScanner

## श्रीशिवराज्योदये महाकाव्ये
## “राजधानीप्रवासः” नाम सप्तमः सर्गः ।

ऋद्धां विशालामथ राजधानीं संद्रष्टुकामो जगतीप्रसिद्धाम् ।
शिवः प्रतस्थे जनकेन सार्धं जयो नयेनेव महोदयेन ॥१॥
पृष्ठाधिरूढं सहसावगत्य निजप्रभुं बालशिवं सुखेन ।
आनन्दतुङ्गोर्मिविलोलिताङ्गं तुरङ्गरत्नं चपलं ननर्त ॥२॥
लताः प्रसूनैर्मधुबिन्दुगर्भैस्तथा प्रसूनान्यलिगुञ्जनैश्च ।
सभाजयामासुरिवैनमारात् सुलक्षितोर्जस्वलराजचिह्नम् ॥३॥
माद्यन्मयूरा विततोर्ध्वबर्हाः कुमारमालोक्य कुमारकल्पम् ।
अकालकेकाभिरिवोचुरुच्चैः सुस्वागतं प्रोन्नतकण्ठनालम् ॥४॥
शिलोच्चयान्तर्गतगह्वरान्तर्निषेदुषो व्याघ्रकिशोरकास्ते ।
उच्चैर्नरव्याघ्रकिशोरकस्य जगर्जुरेतस्य जयैकघोषम् ॥५॥
पतत्प्रपाताच्छतुषारशीताः शिलाजतुस्पर्शसुगन्धशीलाः ।
सिषेविरे ते मरुतः शिवं तं शिवं तुषाराद्रिभवा यथैव ॥६॥
उत्स्फूर्तवात्सल्यरसेव माता सह्याद्रिलक्ष्मीर्वनगोचराऽसौ ।
बालस्य तीव्रातपवारणाय च्छत्रं तरुच्छायमयं दधार ॥७॥
अभ्रङ्कषोत्तुङ्गसहस्रशीर्षा नीलोदकुण्डस्फुटलक्षनेत्रः ।
उपत्यकादीर्घभुजार्गलोऽसौ दृष्टोऽद्भुतः सह्यगिरिः शिवेन ॥८॥
कुलप्रदीपं कुलपर्वतस्तं समाजुहावेव समानशीलम् ।
चलत्पलाशाङ्गुलिभिस्तरूणां तथा खगानां कलकूजनैश्च ॥९॥
समुच्छलन्तीर्गिरिसम्भवास्ता मुक्ताच्छतोयाः सरितोऽवलोक्य ।
अपां हि तृप्तोऽपि तृषार्तमानी पपौ प्रसन्नः सलिलं कराभ्याम् ॥१०
तद्दर्शनोत्कण्ठितमानसानां वनेचरीणां च नगेचरीणाम् ।
अव्याजसद्भावमनोहराणि ग्रामीणगीतानि पपौ श्रुतिभ्याम् ॥११
सह्याद्रिपाषाणकठोरकायान् सह्यात्मजान् सह्यसमानवर्णान् ।
वृद्धान् वयस्यान् पथि पुंजितांस्तान् पपौ निमेषालसलोचनाभ्याम् ॥
असह्यदास्येन चिरं ज्वलन्तः सह्याद्रिबाला हृदयस्थदाहम् ।
अदर्शयंस्तं स्फुटगूढरोषैरारक्तवर्णैर्नयनस्फुलिङ्गैः ॥१३॥
कांश्चित् क्षणं मस्तकचालनेन कांश्चित् प्रसन्नेक्षणवीक्षणेन ।
स्मितेन वाचा नमनेन कांश्चित् सम्भावयामास वनेचरांस्तान् ॥१४
स्वमण्डलान्तःस्थितकान्तकान्तिश्चन्द्रेण नूनं वदनेऽस्य कीर्णा ।
तस्मिन् कलङ्कोऽत्र तु चन्द्रकान्तिः तस्मादिति प्राहुरशेषनार्यः ॥१५

Scanned by CamScanner

नेत्रद्वयेऽस्य ध्रुवमेव लग्ना ।
नीलाम्बुजानां च विशेषशोभा नेत्रद्वयेऽस्य ध्रुवमेव लग्ना ।
तन्न्यूनताव्याकुलिता इवातो गवेषयन्तो भ्रमरा भ्रमन्ति ॥१६॥
आरक्तरुच्या कमलश्रियापि कृत्वाऽस्य पाणिग्रहणं प्रियस्य ।
स्फुटीकृता श्रीहरिमात्रलभ्या सम्भाविनी श्रीपतिता शिवस्य॥१७॥
अस्योन्नतस्कन्धभुजो भुजौ तावाजानुलम्बौ धृतरश्मिपाशौ ।
दुर्दास्यपाशानिव मातृभूमेश्छेत्तुं मुहुः प्रस्फुरतः समर्थौ ॥ १८॥
स भाति कोशः कटिपट्टलग्नो निगूढभास्वत्करवालतेजाः ।
इमं भवान्या भजतीव वीरं म्लेच्छासुरासृक्परिपानकामः ॥१९॥
समाहृतं पत्रपुटे लघिष्ठे गोपाङ्गनाभिः पथि वत्सलाभिः ।
हैयङ्गवीनं मधुबिन्दुपृक्तं मुदा समादाय शिवो लिलेह॥२०॥
सद्भावपूर्णाकुललोचनानां कृषीवलानां गलिताङ्गभाजाम् ।
प्रसारिताञ्जल्युपसंधृतानि प्रेम्णाऽग्रहीत् वन्यफलानि बालः ॥२१
जरद्गवैः संपरिमर्दितानां प्रत्यग्रनीवारहरित्कणानाम् ।
भूयः समास्वाद्य रसं प्रशंसन्नष्ठवखेदः प्रययौ जवेन ॥२२॥
तस्मै पिता प्राह शुचिस्मिताय हसन्मुखः संभृतकौतुकाय ।
"जानासि किं राजसभागतेन यथा त्वया राजनि वर्तितव्यम् ॥२३॥
विजापुराधीशसभागतेन शूरेण धीरेण च पण्डितेन ।
प्रविष्टमात्रेण नतेन मूर्ध्ना सिंहासनं केवलमीक्षणीयम् ॥२४॥
पृष्ठे समारोप्य च वामपाणिं संस्पर्शता भूमिमथो ललाटम् ।
पुनः पुनर्दक्षिणपाणिना च प्रणम्य सिंहासनमर्चनीयम् ॥२५॥
कटाक्षपातेन पदाधिकारी यदादिशेदासनपीठमारात् ।
तत्रैव तूष्णीं नतमस्तकेन गत्वाऽऽसनीयं नृपदर्शनार्थम् ॥२६॥
सुवर्णसिंहासनसन्निविष्टो यः कोऽपि राजा स हि विष्णुरेव ।
स दर्शनीयः स च माननीयः प्रशंसनीयः स च सेवनीयः ॥ २७॥
अवाच्यवाचोऽपि ऋचस्तदीया यत्तद्दुरुक्तं खलु तच्च सूक्तम् ।
य उच्यते भूमिचरो हि देवो विपर्यये स्यान्न कथं स वेदः ॥२८॥
कृतप्रवेशे च धराधिनाथे तारस्वरं बन्दिजनः स गर्जेत् ।
सा गर्जना जीव जयेति सर्वैः प्रमुक्तकण्ठं परिबृंहणीया ॥२९॥
आ जन्मनस्त्वं चपलस्वभावो जिज्ञासुरन्यायनिराकरिष्णुः ।
जानीहि राजेन्द्रसभास्थितेन स्वतन्त्रवृत्तिर्न हि दर्शनीया ॥३०॥
समाह्वयेच्चेत् प्रियदर्शनं त्वां राजा स मत्सन्निधिसन्निविष्टम् ।
नतेन मूर्ध्ना व्रज तत्समीपं कुरु प्रणामं जयघोषपूर्वम्" ॥३१॥
शृण्वन् पितुस्तं स हितोपदेशं गम्भीरचेता इव बाल आसीत् ।
संकल्पयन् राजसभाप्रवेशं निसर्गशोभां परितो न वेद ॥३२॥

Scanned by CamScanner

अथोपविष्टेषु पदाधिकृत्सु हृचालोकशब्देषु निनादितेषु ।
दतिः स दुर्लालितराज्यलक्ष्म्या म्लेच्छाधिराजः सद आससाद ॥३३
तदा तदालोकनतत्पराणाम् अत्युत्सुकानामपि भक्तिभाजाम् ।
निरन्तराभ्यासवशादधस्तान् नतान्यकस्मादिव मस्तकानि ॥३४॥
सहस्ररत्नावलिपूरितस्य सभावितानस्य विचित्रशोभा ।
नतोत्तमाङ्गस्थशिरस्त्ररत्नप्रभाभिरालेखि धरातलेऽपि ॥३५॥
निसर्गसंस्तम्भितमस्तकेन स्फुटाभिमानेन शिवाजिनाऽसौ ।
विलोकिता राजकृपाकटाक्षसमुत्सुकानां महतां श्ववृत्तिः ॥३६॥
नतेषु सर्वेष्वपि मस्तकेषु कस्यापि बालस्य नवागतस्य ।
नैवानतं मस्तकमैककस्य तदीक्षितं भूपतिनैकलेन ॥३७॥
निवर्णयन् रूपममुष्य कान्तं तेजोविशेषप्रतिभासमानम् ।
राजा सहासं सहसा तमाह "कुमार! कस्यासि किमागतोऽसि॥३८॥
नरेन्द्रजिज्ञासितपात्रभूतः कोऽयं कुमारः खलु भाग्यशाली ।
इतीव कौतूहलभाग्जनानां नेत्रारविन्दैर्ध्रुवमर्चितोऽसौ ॥३९ ॥
स मन्द्रगम्भीरतरस्वरेण सम्पूरयन् राजसभां विशालाम् ।
अनम्रशीर्षा नृपमाह बालः "शिवाजिरेषोऽस्मि शहाजिसूनुः॥४०॥
तन्नूतनं नाम शिशोरमुष्य हृचाम्रेडितैरुच्चरितं नृपेण ।
सभ्यैश्च सर्वैरपि तद्वदेव परस्परं नाम निवेदितं तत् ॥ ४१ ॥
सर्वाननेभ्यः समुदीर्यमाणं प्रतिध्वनत् तुङ्गसभालयान्तः ।
स्तम्भेषु भित्तिष्वतिचित्रितासु तन्नाम गम्भीरगुरुत्वमाप ॥४२॥
अनम्रमूर्ध्नो नवबालकस्य निर्भीकतां काञ्चिददृष्टपूर्वाम्
दृष्ट्वैव राजा विमना बभूव समर्थयंस्तं प्रथमापमानम् ॥४३॥
स नित्यनैमित्तिककार्यजातं सभागतं वीक्ष्य कुमारकोऽपि ।
पित्रा प्रतस्थे बहिरञ्जसैव सञ्चिन्तयन् किञ्चिदचिन्तनीयम् ॥
परस्परं किञ्चिदभाषमाणौ पथा प्रयान्तौ जनकात्मजौ तौ ।
चतुष्पथोत्थं सहसा प्रभूतं कोलाहलं शुश्रुवतुर्जनानाम् ॥४५॥
हा हन्यते गौरिति दीनवाक्यं जनैः सहस्रैरुदितं शिवस्य ।
प्रतप्तवज्राहतितीव्रपातं बिभेद चिच्छेद ददाह चित्तम् ॥४६॥
ततः क्षणाद्रम्भणमार्तधेनोरभ्याह्वयन्नूनमनाथनाथम् ।
अश्वाधिरूढं दलितान्तरङ्गं प्रत्याचकर्षेव शिवाजिमारात् ॥४७॥
आकर्णसंकृष्टविशालचापविनिःसृतो भल्ल इव प्रधावन् ।
निमेषमात्राज्जनसागरान्तः प्रविष्टमात्मानमसौ न वेद ॥४८॥
विलिह्यमाना नवशावकेन गृष्टिः स्नुतक्षीरसुधा व्यलोकि ।
आकृष्यमाणा नरराक्षसेन गोपूजकानामपि पश्यतां च ॥४९॥

Scanned by CamScanner

स्वभावशूरस्य शिशोरमुष्य
वामेतरः पाणिरतीववेगात् ।
निस्त्रिंशमाक्रष्टुमुदग्रधारं
झटित्यसर्पत् कटिदेशमेव ॥५०॥
गोघ्नस्य तस्यैव करः सशस्त्रः
स्वस्यात्तशस्त्रेण कदा करेण ।
निःपातितो भूमितले तदेतद्
रोषाभिभूतो न विवेद बालः ॥५१॥
आलोक्य गोत्राणमदृष्टपूर्वं
सविस्मयं सा जनता बभाण ।
गोरक्षणार्थं धृतबालरूपः
कृष्णः स्वयं भूमितलेऽवतीर्णः ॥५२॥
जयतु जयतु कृष्णो गोकुल-त्राण-दीक्षः
सकलभुवनदीपो गोपवंशावतंसः ।
तदनु जयतु बालस्तादृशस्तद्व्रतश्च
स्फुरति य इह कोऽपि क्षात्रवंशावतंसः ॥५३॥
जय जय जय जीवोज्जीव जीवेति लोकैः
प्रविकसितमनोभिः कण्ठशंखावकीर्णाम् ।
विनयविनतमूर्ध्ना गर्जवर्षा दधानः
प्रथममनुबभूव स स्वमूर्धाभिषेकम् ॥ ५४॥
श्रीकृष्ण-दिव्यवपुषः शिवबालकस्य
स्वप्राणरक्षणचणस्य वपुर्लिहन्ती ।
वात्सल्यमाविरकरोदथवा प्रसादं
सा गौरगौरपि सुगौरवमात्मसंस्थम् ॥

**॥ इति श्रीशिवराज्योदये महाकाव्ये**
**"राजधानीप्रवासः" नाम सप्तमसर्गः॥**

# श्रीशिवराज्योदये महाकाव्ये
## “ पारतन्त्र्यजुगुप्सा ” नाम अष्टमः सर्गः

प्रत्यागतः परिनिरीक्ष्य स राजधानीं तां म्लेच्छसंस्कृतिनिवेशनकिल्बिषार्ताम् ।
दृङ्मोहिनीमपि जुगुप्सितसंनिवेशां मेने क्षुधेव पितृकाननवाटिकाभाम् ॥१॥
तां दुर्जनर्द्धिमिव गर्हितलोकसेव्यां क्षुद्रोपभोगमणिकाञ्चनकोषजालाम् ।
स्मृत्वा पुरीं स परिवर्जितपुण्यशीलां मेने मनः कलुषदूषितमात्मनोऽपि ॥२॥
सौधावलीविमलहीरककण्ठहाराम् उद्यानपादलतिकास्फुटभूरिमाल्याम् ।
सद्भावमात्रपरिहीनतरान्तरङ्गां वाराङ्गनामिव जगर्ह स राजधानीम् ॥३॥
बद्धामसह्यनियमैर्निगडैरिवैनां व्यापन्नधर्मपतिकां हतभाग्यरेखाम् ।
अन्तर्व्यथाऽस्फुटविशुद्धगिरं स मेने कारालयस्थविधवामिव राजधानीम् ॥४॥
हर्म्येषु शैवलमलीमसवर्णभाजा म्लेच्छाधिपत्यपिशुनध्वजसंचयेन ।
आन्दोलितोऽरिनगरानिल एव तस्य प्राज्वालयन्मनसि दुर्धरकोपवह्निम् ॥५॥
विद्योतिनीं हरजटामुकुटैकभूषां चान्द्रीं कलां यवनपार्श्वरशृङ्गकेषु ।
स्मृत्वा निपातितशिवालयनिर्मितेषु शूलप्रहार इव चेतसि तस्य जातः ॥६॥
कामोपभोगरतदुर्मदशासकानां दुश्चेष्टितैरतिभयार्तकुलीननारीम् ।
तां म्लेच्छराजनगरीं स्मरतः शिवस्य जज्वाल भालनयनप्रखरं मनोऽपि ॥
वेतण्डवृन्दविनिरुद्धपथप्रवाहां वाराङ्गनाचटुललोचनमत्स्यपूर्णाम् ।
कङ्कालशेषजनतामिषलुब्धराजग्राहां पुरीं हृदि स वैतरणीं हि मेने ॥८॥

वेश्यासमानविकटोज्ज्वलवेशभाजाम्
उद्रञ्जितभ्रुकुटिगण्डभुजाधराणाम् ।
तत् ताण्डवं पथिषु दुर्मुखषण्ढकानां
नैव क्षणं स्मृतिपथेऽपि शिवः स सेहे ॥९॥

माणिक्य-नीलमणि-विद्रुम-पद्मराग-गोमेद-मारकत-मौक्तिक-हीरकेषु ।
उद्भासिनीं यवनभूपतिहर्म्यगर्भे लक्ष्मीममन्यत स गर्हितमामलक्ष्मीम् ॥
कार्तस्वरोज्ज्वलरसावृतबृहद्वितान-व्यालम्बिहेममयसूत्रसहस्रनद्धाः ।
अन्तःस्थवर्तिरुचिभास्वररत्नदीपा व्यातेनिरे स्मृतिपथेऽस्य घनान्धकारम् ॥

सिंहासने सुमणिकाञ्चनपादपीठे
तं किंप्रभुं च निजधर्मविरुद्धभूतम् ।
स्मृत्वा बलाहृतनिजबान्धववन्दिताङ्घ्रिं
स्थायी रसोऽस्य सहसा भयमुद्दिदीपे ॥१२॥

हा क्रीतबन्दिभिरसौ समुदीर्यमाणा
म्लेच्छाधिराज्यविभवस्मृतिहेतुरुच्चैः ।
सा घोषणा श्रुतिपथेऽस्य परिध्वनन्ती
कामं रहोऽपि बिभिदे मनसः समाधिम् ॥१३॥

Scanned by CamScanner

# श्रीशिवराज्योदये महाकाव्ये
# • “ पारतन्त्र्यजुगुप्सा ” नाम अष्टमः सर्गः

प्रत्यागतः परिनिरीक्ष्य स राजधानीं तां म्लेच्छसंस्कृतिनिदर्शनकेन्द्रभूताम् ।
दृङ्मोहिनीमपि जुगुप्सितसंनिवेशां मेने क्रुधेव पितृकाननवाटिकाभाम् ॥१॥
तां दुर्जनर्द्धिमिव गर्हितलोकसेव्यां दुर्दर्शनीयमणिकाञ्चनकोषजाताम् ।
स्मृत्वा पुरीं स परिवर्जितपुण्यशीलां मेने मनः कलुषदूषितमात्मनोऽसौ ॥२॥
सौधावलीविमलहीरककण्ठहाराम् उद्यानपाटलततिस्फुटभूरिमाल्याम् ।
सद्भावमात्रपरिहीनतरान्तरङ्गां वाराङ्गनामिव जगर्ह स राजधानीम् ॥३॥
बद्धामसह्यनियमैर्निगडैरिवैनां व्यापन्नधर्मपतिकां हतभाग्यरेखाम् ।
अन्तर्व्यथाऽस्फुटविशुद्धगिरं स मेने कारालयस्थविधवामिव राजधानीम् ॥४॥
हर्म्येषु शैवलमलीमसवर्णभाजा म्लेच्छाधिपत्यपिशुनध्वजसंचयेन ।
आन्दोलितोऽरिनगरानिल एव तस्य प्राज्वालयन्मनसि दुर्धरकोपवह्निम् ॥५
विद्योतिनीं हरजटामुकुटैकभूषां चान्द्रीं कलां यवनमन्दिरशृङ्गकेषु ।
स्मृत्वा निपातितशिवालयनिर्मितेषु शूलप्रहार इव चेतसि तस्य जातः ॥६
कामोपभोगरतदुर्मदशासकानां दुश्चेष्टितै रतिभयार्तकुलीननारीम् ।
तां म्लेच्छराजनगरीं स्मरतः शिवस्य जज्वाल भालनयनप्रखरं मनोऽपि ॥
वेतण्डवृन्दविनिरुद्धपथप्रवाहां वाराङ्गनाचटुललोचनमत्स्यपूर्णाम् ।
कङ्कालशेषजनतामिषलुब्धराजग्राहां पुरीं हृदि स वैतरणीं हि मेने ॥८॥

वेश्यासमानविकटोज्ज्वलवेशभाजाम्
उद्रञ्जितभ्रुकुटिगण्डभुजाधराणाम् ।
तत् ताण्डवं पथिषु दुर्मुखषण्ढकानां
नैव क्षणं स्मृतिपथेऽपि शिवः स सेहे ॥९

माणिक्य-नीलमणि-विद्रुम-पद्मराग-गोमेद-मारकत-मौक्तिक-हीरकेषु ।
उद्भासिनीं यवनभूपतिहर्म्यगर्भे लक्ष्मीममन्यत स गर्ह्यतमामलक्ष्मीम् ॥
कार्तस्वरोज्ज्वलरसाक्तबृहद्वितान-व्यालम्बिहेममयसूत्रसहस्रनद्धाः ।
अन्तःस्थवर्तिरुचिभास्वररत्नदीपा व्यातेनिरे स्मृतिपथेऽस्य घनान्धकारम् ॥

सिंहासने सुमणिकाञ्चनपादपीठे
तं किंप्रभुं च निजधर्मविरुद्धभूतम् ।
स्मृत्वा बलाढ्यनिजबान्धववन्दिताङ्घ्रिं
स्थायी रसोऽस्य सहसा भृशमुद्दिदीपे ॥१२॥

हा क्रीतबन्दिभिरसौ समुदीर्यमाणा
म्लेच्छाधिराज्यविभवस्मृतिहेतुरुच्चैः ।
सा घोषणा श्रुतिपथेऽस्य परिध्वनन्ती
कामं रहोऽपि बिभिदे मनसः समाधिम् ॥१३॥

धेन्वातिकातरतरेक्षणमीक्ष्यमाणम् आत्मानमार्तजनवृन्दपरीतमेकम् ।
निष्कोषितासिगतमात्ममुखं ददर्श ॥१४॥
स्मृत्वा पुनः पुनरुदीरितगूढरोषो
किं कर्म चेति न विदन् किमकर्म चेति म्लेच्छाधिपत्यदृढवृक्षविपाटनाय ।
प्रज्ञा सुतीव्रपरशुप्रखराऽपि तस्य पाषाणखण्डनविधाविव कुण्ठिताऽभूत् ॥
रात्रौ विनिद्रमतिचिन्तनमग्नचित्तं प्रातः कषायितविलोचनमप्रसन्नम् ।
मध्यन्दिने विगतभोज्यरसं सुतं स्वं दृष्ट्वैव मातृहृदयं विकलीबभूव ॥
सह्यस्य तुङ्गशिखरे लघुगह्वरे वा तीरे प्रगाढसरितो विपिनस्य गुल्मे ।
तीव्रातपेऽन्धतमसे च परिभ्रमन्तमेकाकिनं तमवगत्य जिजाऽऽकुलाभूत् ।
प्राणप्रियं सुतममुं विमनायमानं विज्ञाय तद्वदनलोचनहावभावैः ।
माता जिजाप्यनुबभूव समामवस्थां पुत्रान्तरङ्गसमवर्ति हि वत्सलत्वम् ॥
"वत्स! व्यथाकुलमना इव लक्ष्यसे रे ब्रूषे न मामपि हि किंचन मातरं ते।"
पृष्टोऽपि कोमलगिरेति भृशं जनन्या तस्थौ स्वहस्ततलसंस्थितमस्तकोऽसौ
दृष्ट्वा च मातुरनुरोधमखण्डितं तं चित्तेऽभवद् द्रुत इवैव स मातृभक्तः।
कृच्छ्रादुवाच हृदयोद्भवमात्मदुःखं निष्पीडितस्वजनदुःखनिरीक्षणोत्थम् ॥
"मातः! कृपा भगवतो करुणाघनस्य ह्याजन्मनोऽविरतमेव मयाऽनुभूता।
नैव श्रुतं क्वचन किञ्चन वीक्षितं वा ग्रामे निजे निजमनःप्रतिकूलभूतम् ॥

सर्वेऽत्र सन्ति सुखिनश्च निरामयाश्च
पश्यन्ति भद्रमखिलं सकलत्रपुत्राः ।
सोऽयं भ्रमो जननि! मेऽद्य लयं प्रयातो
ह्यालोक्य तां यवनशासितराजधानीम्। ॥ २२ ॥

नालोकितं किमपि देवकुलं न भग्नं
नैव श्रुतं जनवचः खलु यन्न दीनम्।
स्पृष्टं न तीर्थसलिलं न विदूषितं यत्
ज्ञातं च तन्न खलु यत् प्रियमुत्तमानाम् ॥ २३॥

दृष्ट्वा च मातरखिलान्निजधर्मबन्धून्
प्रायेण शक्तिविकलांश्च भयाकुलांश्च
दुष्पारतन्त्र्यनरके परिपच्यमानान्
हा हा निखात इव मे हृदि वज्रकीलः ॥२४॥

आश्चर्यमेव परमं समवेक्षितं तद्
यद् बुद्धिशक्तिनृपनीतिसमृद्धिमन्तः ।
अस्मत्समाजगुरवोऽप्यरिराजपादम्
आरञ्जयन् स्वनिटिलाङ्कितकुङ्कुमेन ॥२५॥

चामीकरोज्ज्वलविलम्बिविभूषणाढ्या
आनामितोच्चशिरसो द्रुतगामिनश्च

Scanned by CamScanner

दृष्टा मया हि तुरगा इव शासकानाम्
अस्मत्समाजतरुणा विहताभिमानाः ॥२६॥
म्लेच्छाधिपाङ्घ्रिमभितो गुरुगौरवेण
हा हा नतानि पलितान्यपि मस्तकानि
अम्ब! त्वदङ्घ्रिविनतं परमेकमेव
नैवानतं शिर इदं खलु मामकीनम् ॥२७॥
ह्रीः कर्षतीव रसनां हृदयावगूढा
क्रोधानलश्च सहसा क्वथतीव चेतः ।
स्मृत्वैव घोरविपदः सकलाङ्गनानाम्
अम्ब! ब्रवीमि किमतःपरमात्मदुःखम् ।।२८॥
किं जीवितेन विभवेन सुखेन तेन
किं भारभूतकरवालधनुःकृपाणैः ।
किं पौरुषेण यदि न प्रभवामि पातुं
गो-देव-वेद-वनिता-द्विजसाधुसंघान् ॥२९॥

रात्रिञ्चरप्रकुपितेन रघूत्तमेन ह्येकाकिनाऽपि विपिनेचरसङ्गतेन ।
त्रेतासु वीरचरितं चरित यदेव कुर्यादयं तव सुतोऽपि कलौ तदेव ॥३०॥
स्वत्वाभिमानपरिपूर्णविशालवक्षो-निक्षिप्तदक्षिणकरोत्थितनादगाढाम् ।
रोषातिरेकविततध्वनिनाऽऽत्मजेन प्रोद्घोषितां श्रुतवती जननी प्रतिज्ञाम्॥
आगर्भसम्भवदिनात् क्षगशः स्फुरन्तं तं स्वप्नजागरसुषुप्तिषु चेतयन्तम् ।
संकल्पमात्ममनसः प्रियपुत्रवक्त्रादुच्चैरुदीरितमसौ निपपौ प्रसन्ना ॥३२॥
संकल्पितं स्वहृदयाङ्कुरितं चिराय विज्ञाय कोरकितपल्लवितं सुतान्तः ।
तत् पुष्पितं च फलितं च पुनर्विधातुं साशीर्वचांसि सहसा निजगाद देवी॥३३
"घृष्णेश्वरः स भगवान् स च वैजनाथः सा सह्यगह्वरचरी तुलजाभवानी।
श्रीविठ्ठलः स च गणाधिपतिः स रामः सम्पूरयन्तु शुभमुत्कटवाञ्छितं ते ॥
सह्याद्रितुङ्गशिखराण्यधिसंस्थितास्ते दुर्गाश्च दुर्गमतमा वनवासगूढाः ।
ध्यानस्थिरा मुनिवरा इव सर्वं एव त्वां गोपयन्तु हृदयेषु शिवं शिवाय ॥३५
श्रीरामचन्द्ररणकर्मसहायशूरा ये वानरा इव नरा गिरिसञ्चराश्च ।
ते सर्वं एव दृढसंघटिता भवन्तु त्वत्कांक्षितं झटिति साधयितुं पवित्रम्॥३६॥
एकीकृतस्वसुखदुःखहिताहितानाम् एकानुशासनतृणीकृतजीवितानाम् ।
एकात्मनां सवयसां नरपुङ्गवानां व्यग्रो बभूव दृढसंघटने शिवाजिः ॥३७॥
शुभतमतनुकान्तिःकोऽपि सह्याद्रिगर्भे गुणगणशुचिगन्धिः पारिजातः प्रफुल्लः
इति कथमपि वार्तां ज्ञातवन्तःसमन्तादहमहमिकया ते मीलिता बालभृङ्गाः ।

॥ इति श्रीशिवराज्योदये महाकाव्ये 'पारतन्त्र्यजुगुप्सा' नाम अष्टमः सर्गः ॥

# "स्वातन्त्र्यप्रतिज्ञा" नाम नवमः सर्गः।

ते सर्वे नरशार्दूलाः सह्याद्रिवनवासिनः।
निर्भयाः परितश्चेरुः शत्रुवर्गभयंकराः ॥१॥
निगूढतीव्रशस्त्राणां तेषामत्युग्रतेजसाम् ।
शिव एव नियन्ताऽऽसीद् गणानामिव शंकरः ॥२॥
शिवाजिमभितो वीरा भ्रमन्तस्ते विरेजिरे ।
ज्योतिष्टोमाग्निनिर्गच्छत्स्फुलिङ्गा इव भास्वराः ॥३॥
चापल्यपाटवं तेषां तदालोक्य प्लवङ्गमाः ।
त्रपया कृष्णतुण्डा वा रक्ततुण्डा इवाभवन् ॥४॥
गूढप्रसर्पणे तेषां वीक्ष्य पाटवमुत्कटम् ।
भयाकुला इवासर्पन् परितस्ते सरीसृपाः ॥५॥
उग्रकर्मभिरापूर्णस्तैर्भूचरसरीसृपैः ।
सह्योऽसह्यं जहासेव सागरं मकरालयम् ॥६॥
पदे पदेऽनुकुर्वाणास्तेषां व्यालुम्पनं वृकाः ।
महोदरा नहि प्रापुस्तदभ्यासेऽपि कौशलम् ॥७॥
सत्वरारोहणैस्तेषां हेलयोच्चैस्तटेष्वपि ।
उत्तुङ्गशिखरः सह्यो नूनं वामनतां गतः ॥८॥
तदश्वखुरसम्पातोत्थापितैर्धूलिसंस्तरैः ।
आच्छादितो बभौ सह्यो मैनाक इव सागरे ॥९॥
करालाक्रन्दितैस्तेषां निर्जने गिरिगह्वरे ।
मतङ्गजा भयत्रस्तास्त्यक्तनिद्रा इवाभवन् ॥१०॥
परिभ्रमन्तो गहनं शिवराजपुरस्सराः ।
आदित्या इव संग्रामे कार्तिकेयानुयायिनः ॥११॥
पराक्रमे महासिंहा हरिणास्तु पलायने ।
मूषका गूढसञ्चारे वीरास्ते शिवसैनिकाः ॥१२॥

Scanned by CamScanner

वायसा रन्ध्रविच्छेदे कोकिलाः कलभाषणे ।
भ्रमराः संततोद्योगे कुशलाः शिवसैनिकाः ॥१३॥

गरुडा इव सर्पाणां वानरा इव रक्षसाम् ।
बलाका इव मीनानां म्लेच्छानां शिवसैनिकाः ॥१४॥

पूर्वजन्मदृढाभ्यासाज्जन्मसिद्धां कलां पुनः ।
तुङ्गवृक्षाग्रसञ्चारैर्दर्शयन्तस्तमस्वपि ॥१५॥

शिवसेवा परो धर्मः शिवराजो महेश्वरः ।
शिवाज्ञा वेदशास्त्राज्ञा येषां ते शिवसेवकाः ॥१६॥

आज्ञां पालयितुं येषां शिवराजमुखोद्गताम् ।
वज्रादपि कठोराणि शरीराणि मनांसि च ॥१७॥

भस्मीकृतस्वार्थसौख्यपरिचर्चितविग्रहाः ।
स्वराज्ययोगनिर्मग्ना धन्यास्ते वीरयोगिनः ॥१८॥

शत्रुपूरे सरित्पूरे विनिपत्य स्वयं मुदा ।
क्वचिदग्नौ रणाग्नौ वा चिकीर्षन्तो महाक्रतुम् ॥१९॥

स ययौ सह तैर्दूरमतिप्रेष्ठैः सुहृज्जनैः ।
अन्तश्चरेभ्यः प्राणेभ्यः प्राणैरिव बहिश्चरैः ॥२०॥

निर्जनारण्यमध्यस्थभग्नदुर्गान्तरस्थितम् ।
विध्वस्तभित्तिशिखरं किञ्चिदालोक्य मन्दिरम् ॥२१॥

संतस्थिवान् स सहसा प्राह सर्वान् सुहृज्जनान् ।
"अप्रणम्य न गन्तव्यं दैवतं पुरतः स्थितम्" ॥२२॥

तदा सम्प्रस्थिताः सर्वे तदादेशवशंवदाः ।
सवयस्काः किशोरास्ते प्रवेष्टुं भग्नमन्दिरम् ॥२३॥

लूतातन्तुभिराकीर्णे गर्भागारेऽवलोकितम् ।
चिरादनभिषिक्तं तैः स्थाणुलिङ्गं पुरातनम् ॥२४॥

कृताभिषेकैस्तैर्वीरैरभिषिक्तः स ईश्वरः ।
कृत्ताङ्गुल्यग्रनिर्गच्छद्रक्तधाराभिरेव च ॥२५॥

तद्रक्तधारासंक्लिन्नं शिवलिङ्गं तदा बभौ ।
यथान्धकारध्वंसोत्कमुद्यन्मार्तण्डमण्डलम् ॥२६॥

अभितः स्थाणुलिङ्गं ते गलदङ्गुलिशोणिताः ।
तस्थिवांसो जगुः सर्वे प्रार्थनां नवकल्पिताम् ॥२७॥

Scanned by CamScanner

# हर हर हर महादेव

"स्वातन्त्र्यसंगरदीक्षितास्त्वच्चरणशरणागताः ।
वयमविचलनिश्चया हर हर हर महादेव ॥२८॥

उद्दामवेगपुरस्सरा एते वयं गिरिनिर्झराः ।
ध्येयार्णवं समुपेयुषो हर हर हर महादेव ॥२९॥

श्रद्धा हिमाद्रिसमाऽचला शक्तिर्नृसिंहनिभाऽतुला ।
आविर्भवत्वस्मासु सा हर हर हर महादेव ॥३०॥

वज्रः शिरसि यदि निष्पतेद् वह्निर्वपुषि यदि संविशेत् ।
न हि निश्चयो नः प्रस्खलेद् हर हर हर महादेव ॥३१॥

अश्वा यथा झञ्झानिलाः खड्गाः पुनः प्रलयानलाः ।
सम्प्रस्फुरन्तु हि नः सदा हर हर हर महादेव ॥३२॥

मुष्टिर्हि भीमगदायतां भल्लश्च शिवशूलायताम् ।
समराङ्गणे नः सर्वदा हर हर हर महादेव ॥३३॥

चापेषु नः सज्जीकृतेष्वारोपणीया अद्य ते ।
बाणाः पुरत्रयदाहका हर हर हर महादेव ॥३४॥

रुद्र ! तव रौद्रात्मता जायेत नो हृत्संस्थिता ।
आदेहपातमनारतं हर हर हर महादेव ॥ ३५ ॥

त्वत्सज्जकोदण्डोद्भवं टङ्कारमतिशयभैरवम् ।
प्रस्फोटयास्मद्गर्जिते हर हर हर महादेव ॥३६॥

श्रीकण्ठ ! कण्ठे धेहि तां विनिकृत्तरिपुमुण्डाङ्किताम् ।
त्वद्वाञ्छितां नवमालिकां हर हर हर महादेव ॥३७॥

त्वद्विग्रहैकविलेपनं कुर्याम रिपुतनुभास्मनम् ।
सङ्ग्रामघोरहुताशने हर हर हर महादेव ॥३८॥

त्वन्मस्तकोच्छलदापगा स्वरयप्रदीर्णमहानगा ।
अस्मन्मनांसि पुनातु सा हर हर हर महादेव ॥३९॥

त्वद्भाललोचनपावको ब्रह्माण्डमण्डलदाहकः ।
नेत्रेषु नः सम्भ्राजतां हर हर हर महादेव ॥४०॥

त्वत्कण्ठकुण्डसुसञ्चितं हालाहलं परमाद्भुतम् ।
वम तीक्ष्णशस्त्राग्रेषु नो हर हर हर महादेव ॥४१॥

Scanned by CamScanner

भुजगः स ते भुजकङ्कणं भव ! भवतु नः संरक्षणम् ।
समराङ्गणेऽरिनिषूदने हर हर हर महादेव ॥४२॥
त्वद्विग्रहार्धसमाश्रिता रणचण्डिका सा देवता ।
युद्धेऽस्तु नश्चाग्रेसरा हर हर हर महादेव ॥४३॥
भरतभुवमतिमङ्गलां हतनिखिलखलरिपुबलाम् ।
कुरु करुणयाऽस्मत्करैर्हर हर हर महादेव" ॥४४॥
श्रीरोहिडेश्वरसनातनमन्दिरान्तः
प्रोद्घोषिता नरवरै रणगर्जना सा ।
सह्याद्रिगह्वरशतप्रतिनादतुङ्गा
संशुश्रुवेऽप्यरिभिरङ्गुलिनद्धकर्णैः ॥४५॥
सा गर्जना हरहरेति शिवप्रणादा
व्याप्नोदरं दशदिगन्तरचक्रवालम् ।
प्रोत्तुङ्गसप्तकुलपर्वतरोधसान्द्रा
कैलाससुस्थितमजागरयन्महेशम् ॥ ४६ ॥
म्लेच्छाधिपत्यगुरुपातकभूरिभारां
क्लान्तो धरामविरतं शिरसोद्दधानः ।
चक्षुःश्रवाः श्रमजडाक्षिसहस्रयुग्म-
संस्पर्शिनीमतिपपौ शिवगर्जनां ताम् ॥४७।
सद्भावतुन्दिलमनःपरिनुद्यमान·
वागुद्गतैर्हर हरेति पदैः शिवस्य ।
खं वायुरग्निरिति पञ्चकमुत्क्रमेण
नैमित्तिकं ह्यनुनिमित्तमभूत् पवित्रम्॥४८॥
तां प्रार्थनां हरहरेति निशम्य नूनं
प्रीता हरार्धतनुभाक् सहसा भवानी ।
स्थाणुं विहाय धृतभास्वरखड्गरूपा
दोर्दण्डमाश्रितवती प्रचलं शिवस्य ॥ ४९ ॥

**॥ इति श्रीशिवराज्योदये महाकाव्ये "स्वातन्त्र्यप्रतिज्ञा" नाम नवमः सर्गः समाप्तः ॥**

Scanned by CamScanner

# श्रीशिवराज्योदये महाकाव्ये
# "स्वातन्त्र्यदिनोदयो" नाम दशमः सर्गः

श्रीरोहिडेशं परितोष्य भक्त्या प्रदक्षिणीकृत्य च मन्दिरं तत् ।
तत्प्रार्थनाशब्दनिनादपूर्णम् समाहितास्तस्थुरमी किशोराः ॥१॥
विमृश्य सचिन्त्य मुहुर्मुहुस्ते स्वप्रार्थनार्थं पुरुषार्थनिष्ठाः ।
आर्द्रेन्धनक्षीणमिवाग्निमन्तः प्राचेतयन् वीररसं निगूढम् ॥२॥
उद्दीपितोदग्रतरप्रतापप्रभूततेजांसि मुखानि तेषाम् ।
विलोक्य लज्जारुणतां दधानो ह्यन्तर्दधे दीप्रसहस्ररश्मिः ॥३॥
क्षपातमस्काण्डनिमग्नमेनम् आलोक्य सह्याद्रिमलौकिकास्ते ।
प्रतस्थिरे संजनयन्त उच्चैः रात्रिञ्चराणामपि भीतिकम्पम् ॥४॥
आलोकयामासुरतिप्रसन्ना नभोनिलीनास्त्रिदशाः समस्ताः ।
तं दिव्यभावं शिवमित्रसंघं नक्षत्रचक्षुर्भिरिवानिमेषैः ॥५॥
तत्प्रार्थनासत्कृतिसाक्षिणस्ते पुराणवृक्षाः परमादरेण ।
निम्नोन्नताध्वानमदर्शयंस्तान् खद्योतविद्योततनुप्रदीपैः ॥६॥
दिनेषु गच्छत्सु जिगीषवस्ते दिदृक्षवो दुर्गमजय्यमेकम् ।
पर्यभ्रमन् दुर्गमसह्यगर्भे चारैरनालोकितगूढचाराः ॥७॥
मार्दङ्गिका वा यमपट्टिका वा संन्यासिनो वा चिरमौनिनो वा ।
शिवाज्ञयाऽव्याजहृदो युवानोः व्याजेन केनाप्यचरन् समन्तात् ॥८॥
कोऽप्येकदा शत्रुरहस्यवेदी रहस्यवादीत् स्वगतं रहस्यम् ।
तदा तदाकर्णयता शिवेन कर्णायितं फुल्लविलोचनेन ॥९॥
गते चरे सत्फललाभतुष्टे शिवाजिरुत्कण्ठितमानसोऽसौ
प्रासादपूजालयमेत्य भक्त्या प्रणम्य चानर्च चिरं भवानीम् ॥
ततश्च मातुश्चरणारविन्दे शिरोऽरविन्दं सुचिरं निधाय ।
भक्त्या जयाशीर्वचनं ययाचे मनोगतं किंचिदभाषमाणः ॥११॥
तथा सुतं तं प्रणतं विलोक्य संयाचमानं विजयाशिषं च ।
पुनः पुनर्दक्षिणपाणिनाऽसौ पस्पर्श मूर्धानममुष्य माता ॥१२॥
जगाद चैनं विनतोत्तमाङ्गं किं केवलामाशिषमीहसे रे ।
अनीहमानेऽपि सुतेऽस्ति मातुः वरप्रसादो न तु केवलाशिः ॥१३
स मन्दमन्दं जननीमुवाच जानीहि मातः सफलां निजेच्छाम् ।
अद्य प्रभृत्येव समारभेऽहम् अभूतपूर्वां चिरजत्रयात्राम् ॥१४॥
अद्य प्रभृत्यम्ब! महाभिषेकं प्रवर्तयिष्ये रणचण्डिकायाः ।
मदोद्धतारातिनिकृत्तकण्ठ-समुच्छलच्छोणितवर्षणेन ॥१५॥

Scanned by CamScanner

अद्य प्रभृत्येव कृपाणरूपा कराश्रिता मे प्रखरा भवानी ।
तमालनीलाऽप्यरिरक्तरक्ता रणे तडित्-ताण्डवमेव कुर्यात् ॥१६

अद्य प्रभृत्येव नभोविभागे स्फुरेज्जयस्तम्भविरोपितोऽसौ ।
काषायवर्णो भगवद्ध्वजो नः प्रस्पर्धमानोऽरुणरोचिषैव ॥१७॥

अद्य प्रभृत्येव निजप्रतिज्ञा-साफल्यमापादयितुं यतेय ।
जयैषिणो मे विजयैकहेतुः प्रदीयतां माङ्गलिको वरस्ते ॥१८॥

अन्येद्युरेवोषसि किंवदन्ती समागता श्रोत्रपथं जिजायाः ।
यदुज्ज्वलाभो भगवद्ध्वजोऽसौ प्रद्योतते तोरणदुर्गशृङ्गे ॥

प्रभातकाले विजयप्रवृत्तिं पुनश्च तां पुत्रपराक्रमोत्थाम् ।
श्रुत्वैव संदेशहरस्य वक्त्रमापूरयत् सा मधुशर्कराभिः ॥२०॥

सुवर्णसूत्रग्रथितप्रभूत-महार्हरत्नावलिमात्मकण्ठात् ।
द्रुतं विनिष्कास्य ददौ च तस्मै प्रहर्षरोमाञ्चितपुण्यमूर्तिः ॥ २१

विज्ञाय तां तोरण इत्यभिख्यां दुर्गस्य तस्य प्रथमार्जितस्य ।
प्राहोत्ततं तोरणमद्य नूनं स्वराज्यहर्म्ये विजयश्रियैव ॥२२॥

बबन्ध सर्वेष्वपि मन्दिरेषु स्वयं प्रतिद्वारमुदारपर्णम् ।
गन्धाढ्यपुष्पालिमिलन्मिलिन्दं मनोहरं तोरणमुज्ज्वलाभम् ॥२३

ग्रामीणवर्गाः सकलत्रपुत्राः परस्परं शार्कंकमुष्टिपूर्णैः ।
वक्त्रैरवोचन् तदनुक्तपूर्वं स्वबान्धवानां विजयैकवृत्तम् ॥२४॥

गृहे गृहे प्राङ्गणतोरणेषु कुलाङ्गनाभी रचिता सुरम्या ।
प्रदोषकालेऽखिलदोषहन्त्री परिस्फुरद्दीपकतोरणाली ॥२५॥

श्रीरामदासप्रमुखैश्च सद्भिः ध्यानावलग्नाक्षिभिरीक्षितान्तः ।
हृत्पुण्डरीके सहसैव काचित् नवोदिता दीपकतोरणाभा ॥२६॥

जगौ तुकाराममुनिर्नवीनम् अभङ्गबद्धं जयगीतमुच्चैः ।
तदा तदाकर्ण्य जहर्ष चेतः पाषाणमूर्तेरपि विठ्ठलस्य ॥२७॥

पितुर्गृहे बालसखीजनेन क्रीडारताऽसौ शिवधर्मपत्नी ।
कपोतमेकं पदलग्नपत्रं सुतोरणद्वारगतं ददर्श ॥२८॥

भैमीव सा द्रागनुधाव्य लोलं सपत्रमुद्गृह्य च पत्रिणं तम् ।
ज्ञात्वा जयोदन्तममुं स्वभर्तुः प्रहर्षमत्तेव ननर्त मुग्धा ॥ २९॥

कर्णाटकस्थेन शहाजिनाऽपि स्वतोरणद्वारगतोऽह्नि तस्मिन् ।
दृष्टः प्रनृत्यन् विततोर्ध्वबर्हः शुभंकरः कश्चन नीलकण्ठः ॥३०॥

म्लेच्छाधिपानां भवनेषु भव्येष्वाकस्मिकोत्पातवशादखण्डन् ।
लसन्महामौक्तिकसुन्दराणि तस्मिन् दिने काञ्चनतोरणानि ॥३१

स एव बालो ह्यनतोत्तमाङ्गः स्वहस्तस्थलारोपितदीर्घखड्गः ।
सन्तर्जयन् स्वप्नगतेन दृष्टो विजापुरेशेन भयार्दितेन ॥३२॥

Scanned by CamScanner

स्वप्नेऽफझुल्लः सहसा ददर्श महोदरं स्वं प्रविदीर्यमाणम् ।
अकल्पिताश्लेषकृतोद्धतेन तेनैव बालेन सभागतेन ॥३३॥
दिल्लीश्वरस्यारुणवर्णदुर्गे उत्तोरणद्वारमुपेत्य तस्थौ ।
दिवा दिवाभीततती रुवन्ती नक्तं पुनर्वायसपङ्क्तिरन्धा ॥३४॥
नवग्रहोद्भासिविशालरत्न-स्फुरत्प्रभामण्डलमत्र तस्मिन् ।
दिल्लीशसिंहासनपार्श्ववर्ति च्छत्रं प्रचस्खाल कुतोऽपि हेतोः॥३५॥
भावी स दिल्लीपतिरप्यपश्यत् स्वप्ने तदैवोत्तररात्रिकाले ।
वपुर्निजं दक्षिणदिग्विभागे गर्तस्थितं देवगिरेः समीपे ॥३६॥
नवस्वराज्यादिमपीठभूतं पुराणदुर्गं स्ववशंगतं तम् ।
शिवाजिरालोक्य विशीर्णदीर्णं संस्कारयामास विशेषभक्त्या ॥३७॥
स तोरणद्वारगतं विभग्नं शिवालयं वीक्ष्य विदूनचेताः ।
सुशिल्पसंस्कारममुष्य चक्रे भक्त्या स्वयं शिल्पिभिरर्थ्यमानः ॥३८॥
तद्वास्तुवासिन्यधिदेवता च संस्कारसेवाभिरुपास्यमाना ।
समुज्ज्वलं काञ्चनकोषभूतं निजस्वरूपं प्रकटीचकार ॥३९॥
जयध्वनिं वा शिवसैनिकानां संकेतशब्दं ध्रुवमूहमाना ।
विनिःसृता म्लेच्छमहीन्द्रकोशात् हिरण्मयी श्रीः शिवमाविरासीत्॥
स क्रान्तदर्शी गुरुरत्र तस्मिन् दादोजिरह्नाय शहाजिसूनोः ।
शुक्लेन्दुरेखामिव विश्ववन्द्यां प्रावर्तयन्नूतनराजमुद्राम् ॥४१॥
स्वधर्मनिष्ठः शिवराजभक्तः दादोजिना नव्यनृपाज्ञयैव ।
स्वराज्यलक्ष्म्यालय-तोरणाभं संरक्षितुं दुर्गममुं नियुक्तः ॥४२॥

आपारतन्त्र्यदिवसात् प्रतिपाल्यमानः
स्वातन्त्र्यभाग्यदिवसः खलु भारतस्य ।
आविष्कृतो यवनशासनकालरात्री
तैः श्रीशिवाजिपदचिह्नचरैः किशोरैः ॥४३॥
आहूतो ह्यगणितसाधुवृन्दपुण्यैः
आकृष्टः समरमखार्पितस्वदेहैः ।
आयातो जनगणभागधेयहेतुः
स्वातन्त्र्योदयदिवसोऽस्तु वः शिवाय ॥४४॥

**॥ इति श्रीशिवराज्योदये महाकाव्ये "स्वातन्त्र्यदिनोदयो" नाम दशमः सर्गः समाप्तः ॥**

— + —

# श्रीशिवराज्योदये महाकाव्ये
# "विजययात्रा" नाम एकादशः सर्गः

ततः स तोरणाधीशो रणाधीनमना: शिवः।
खड्गं निष्कोषितं कोशे न स्थापयितुमैहत ।। १ ।।
सुहृदस्तान् समाहूय विजयानन्दतुन्दिलान्।
स उवाच महातेजास्तत्तेजस्तेजयन्निव ।। २ ।।
हं हो वीरा नरव्याघ्रा उदयोऽस्तु चिराय वः।
येषां प्रथमसङ्ग्रामे प्रसन्ना जगदम्बिका ।। ३ ।।
न ममैकाकिनो नूनं जयः सम्भाव्यतामयम्।
यत्सम्भूय समुत्थाने सर्वेषामेकजीवता ।। ४ ।।
एकव्रता एकजीवा वयं सर्वे जयैषिणः।
अग्रेसरा सदाऽस्माकं भवानी जयरूपिणी ।। ५ ।।
न मनागपि सन्देहो हृदि धार्यो जयं प्रति।
यत्काङ्क्षति महादेवः स्वयमस्मन्महोदयम् ।। ६ ।।
यत्र यत्र गमिष्यामः शत्रुराज्यजिगीषया।
तत्र तत्र ध्रुवं भूयाज्जयोऽस्माकं धुरन्धरः ।। ७ ।।
दुर्गमेकमिमं जित्वा नूनं विप्रकृतो महान्।
म्लेच्छराज्यमयोऽस्माभिर्नागः पञ्चफणाधरः ।। ८ ।।
विशालभोगिना येन बद्धा ह्यापादमस्तकम्।
मातृभूमिरियं पुण्या दुःसहामश्नुते दशाम् ।। ९ ।।
कालियेनेव यमुना दूषिता येन हिन्दुभूः।
गोपानामिव हिन्दूनां जीवनं मरणास्पदम् ।। १० ।।
स महासैन्यसम्भारफूत्कारैः परिदीपयेत्।
रणदावानलं शीघ्रं परितोऽस्मान् सुदुर्धरम् ।। ११ ।।
अनल्पजययात्रायाः स्वल्पोऽयं प्रथमो जयः।
आवेशेन तदश्रान्तं युध्यतां सम्प्रयुध्यताम् ।। १२ ।।
समिधस्तनवो यत्र कुसुमानि शिरांसि च।
तत्राहवमहायज्ञे प्रवर्तन्ते जयैषिणः ।। १३ ।।
हननं हवनं यत्र गर्जना मन्त्रजागरः।
रणयज्ञः स नः श्रेयान् क्षात्रधर्मानुयायिनाम् ।। १४ ।।
विद्यावयस्तपोज्येष्ठो यदस्मद्गुरुरादिशेत्।
तदेव ह्यनुतिष्ठामो गुरोराज्ञा गरीयसी ।। १५ ।।"

Scanned by CamScanner

मन्त्रशक्तिमयीं वाचं पातुमुत्कण्ठितोऽपि सः।
स्वगुरोरग्रतस्तस्थौ प्रह्वाञ्जलिररिन्दमः ॥ १६ ॥
स नातियूनां मध्यस्थस्तेषां निष्क्रान्तयौवनः।
गुरुर्दादोजिरारेजे कपीनामिव जाम्बवान् ॥ १७ ॥
तनूरुहसिते यस्य प्रक्षीणतनुमन्दिरे।
राष्ट्रभक्तिर्भवानीव जागर्ति स्म निरन्तरम् ॥ १८ ॥
हृदयस्थण्डिले यस्य ब्राह्मसंस्कारपावने।
पिण्डीकृततनुस्तस्थौ स्वाभिमानमहेश्वरः ॥ १९ ॥
मुहुः प्रकम्पमानेन मूर्ध्ना सम्मानयन्निव।
विक्रमैकरसां वाचं प्रियशिष्यमुखोद्गताम् ॥ २० ॥
स उवाच जराजीर्णविग्रहो विग्रहोत्सुकः।
संग्रहः पुण्यबोधानां निग्रहः पापकर्मणाम् ॥ २१ ॥
"शिवराज ! चिरं जीव जय विन्दस्व सद्यशः।
ब्रह्माण्डमण्डले जीयात् त्वत्कीर्तिरनपायिनी २२ ॥
नैवाकृतसुकृत्यानां भवत्येवंविधा मतिः।
त्वय्येकस्मिन् यथा दृष्टा विमर्शसहचारिणी ॥ २३ ॥
मनुष्याणां सहस्रेषु क्वचिदेवावलोक्यते।
कार्याकार्यविवेकार्थं प्रतिभा विश्वतोमुखी ॥ २४ ॥
परमेशप्रसादेन जन्मसिद्धैव सा त्वयि।
अभङ्गा भाग्यरेखेव त्वदीये पाणिपल्लवे ॥ २५ ॥
सहसा सत्वरं कार्यं स्वधिया यत् करिष्यसि।
त्वदीयं तद् भवेत् सर्वं सद्विवेकविजृम्भितम् ॥ २६ ॥
युद्धमुक्तं भगवता स्वर्गद्वारमपावृतम्।
तत्स्वराष्ट्रहितार्थं चेत् मुक्तिद्वारं मतं मम ॥ २७ ॥
वर्षिष्ठस्यापि मे बाहू स्फुरतो हि युयुत्सया।
यद् राष्ट्रमिदमस्माकमाक्रान्तं यवनाधमैः ॥ २८ ॥
योगिभिश्चापि कालेऽस्मिन् युद्धयोगेन साध्यताम्।
आत्ममुक्तिं तिरस्कृत्य राष्ट्रमुक्तिर्महीयसी ॥ २९ ॥
संन्यासिनाऽपि कालेऽस्मिन् पारतन्त्र्यभयंकरे।
निरस्य पैप्पलं दण्डं दण्डनीतिर्विलम्ब्यताम् ॥ ३० ॥
आरम्भशूरा एवैते दाक्षिणात्या इतीह नः।
परीवादोऽस्ति यो रूढः सोऽधुना व्यपनीयताम् ॥ ३१ ॥
शूरता याऽधुनारम्भे दुर्गेऽत्र प्रकटीकृता।
क्रमशो वर्धयध्वं तामासाम्राज्यफलोदयम् ॥ ३२ ॥

यदुक्तं शिवराजेन तद्धि श्रेयस्करं परम् ।
स्वदेशधर्ममुक्त्यर्थं युध्यतां सम्प्रयुध्यताम् ।। ३३ ।।
श्रुत्वा विक्रमसन्देशमाप्तप्रोक्तं तथाविधम्
आविर्भूतरणावेशाः जगर्जुः शिवसैनिकाः ।। ३४ ।।
तानाजि-बाजि-येसाजि-नेताजि-प्रथिताभिधाः ।
विष्णोरिव शिवस्यासन् बाहवः शस्त्रशालिनः ।। ३५ ।।
प्रतीक्षमाणा राजाज्ञां ते विक्रमसमुत्सुकाः ।
उदञ्चितैः कृपाणाग्रैर्नभ एव व्यदारयन् ।। ३६ ।।
निःसाण-निःस्वनं काले समाकर्ण्य प्रतस्थिरे ।
यथादेशं यथाभागं समन्ताद् दिग्जिगीषया ।। ३७ ।।
गिरिदुर्गो मुरुम्बाख्यः कैश्चिदाक्रामितस्तदा ।
तोरणप्रतिवेशीव प्राच्यामुच्चैरवस्थितः ।। ३८ ।।
नवीनशिल्पसंस्कारैर्यथायोगमलंकृतः ।
मुरुम्बः स नवां भेजे श्लाघ्यां राजगडाभिधाम् ।। ३९ ।।
तोरणस्य सखेवान्यो नातिदूरे व्यवस्थितः ।
कुवारिगड इत्याख्यः कैश्चिदाक्रामितस्ततः ।। ४० ।।
संस्कार्य वारिकुण्डानि तत्रत्यानि विशोध्य च ।
स कुवारिगडो नीतः सुवारिपदपात्रताम् ।। ४१ ।।
म्लेच्छराज्यमहाम्भोधौ दुर्गत्रयमसौ जयन् ।
त्रिपुरारेस्तुलां प्राप शिवस्य सहसा शिवः ।। ४२ ।।
सह्याद्रिशिखरस्थेन तेन दुर्गत्रयेण च ।
म्लेच्छसाम्राज्यहृदये त्रिशूल इव रोपितः ।। ४३ ।।
चित्तवृत्तिरिवाजय्या गह्वरेष्ठा जयावली ।
योगिनेव शिवेनासौ युक्त्यैव हि वशीकृता ।। ४४ ।।
चन्द्रराव इति ख्यातो मोरेवंशोद्भवो युवा ।
शिवराजाज्ञया कश्चित् तत्स्वामित्वे न्ययुज्यत ।। ४५ ।।
सह्याद्रिगजराजस्य गण्डाभोग इवोन्नतः ।
कोण्डाणाख्यो महादुर्गो विना युद्धं विनिर्जितः ।। ४६ ।।
भूमिदुर्गः शिवबलैर्जितः शिरवलाभिधः ।
सुभानमङ्गलाख्यश्च जाङ्गलोऽपि तथाऽपरः ।। ४७ ।।
यच्चक्रषट्कमवभिद्य विमुक्तिकामः सामर्थ्यमाप स हि सह्यचरः समर्थः ।
तद्दुर्गषट्कमवजित्य जिवारिवर्गः श्रीश्रीशिवाजिरपि तद्वदरात्यजय्यम् ४८

**इति श्रीशिवराज्योदये महाकाव्ये**
**"विजययात्रा" नाम एकादशः सर्गः समाप्तः ।।**

---

(४४जयावली-इयम् अरण्यमयी भूमिः जावळी नाम्ना महाराष्ट्रे प्रसिद्धा ।)

Scanned by CamScanner

# श्रीशिवराज्योदये महाकाव्ये
# " शत्रुव्यथा " नाम द्वादशः सर्गः ।

उत्तिष्ठमानं शिवराजमेवं दिने दिने दुर्जयसह्यगर्भे ।
ज्ञात्वा पराभूतमहाजनेभ्यः क्रुधा प्रजज्वाल विजापुरेन्द्रः ॥१॥
सेनासुहृत्कोशविवर्जितस्य विशेषतो हिन्दुकुलोद्भवस्य ।
अकल्पितोत्थानमिदं शिवस्य मेने स मूर्ध्नीव पदाभिघातम् ॥२॥
नवस्फुलिङ्गं तमरातिरूपमल्पिष्ठमप्युज्ज्वलदाहशक्तिम् ।
स कल्पनायामपि नो विषेहे स्वकीयराज्याङ्गमभिग्रसन्तम् ॥३॥
यदा यदा तद्विजयप्रवृत्तिम् आकर्णयामास स दत्तकर्णः ।
तदा तदा सोऽनुबभूव कर्णे सुदुःसहं वृश्चिकदंशमेव ॥४॥
अन्तःस्थरोषानलसाक्षिभूतं तदक्षियुग्मं स्फुटलोहिताभम् ।
तं धूम्रपानोचितकुण्डसंस्थं तिरश्चकारेव समिद्धमग्निम् ॥५॥
सरोषदष्टाधरपल्लवोत्था ह्यसृङ्मयी काचन शोणलेखा ।
तस्यासुरीं शोणितमात्रशाम्याम् आविश्चकारेव महापिपासाम् ॥६॥
दीर्घं च शोणीकृतमात्मकूर्चं मुहुर्मुहुर्भूरि परामृशन् सः ।
सञ्चिन्तयामास रहः सदैव रोगीव रोगप्रशमाभ्युपायम् ॥७॥
एकाकिनो नीतिविदोऽपि बुद्धिः नैवोचिता युक्तिविनिर्णयाय ।
मत्वेति शक्तित्रयसंयुतोऽपि स मन्त्रिभिर्मन्त्रयितुं चकाङ्क्ष ॥८॥
ते धमकेतुप्रखरं परीता विजापुरेन्द्रं प्रखला अमात्याः ।
पापग्रहा नूनमनूनरोषाः सञ्चिन्तयन्तो ह्यशिवं शिवस्य ॥९॥
शिवाक्रमव्याकुलशेमुषीकान् मदोद्धतानप्यवनम्रशीर्षान् ।
तानाह धीरान् यवनाधिराजः तदिङ्गितं वेत्तुमना मनस्वी ॥
चतुर्दिगन्तं विततं चिराय मोहम्मदीयं हि यदाधिपत्यम् ।
तदद्य सह्याद्रिचरेण विद्धं महाम्बरं क्षुद्रतराखुनेव ॥११॥
खद्योतको भास्वति भासमाने प्रद्योततां क्वापि कदाचिदत्र ।
परन्तु हिन्दुर्न महाप्रतापी मोहम्मदीये प्रखराधिराज्ये ॥१२॥
ज्वलन्महाङ्गारचयेऽपि कुण्डे प्रवर्धतां काचन वल्लरीह ।
न जातु देशेऽत्र तु हिन्दुशक्तिः मोहम्मदीये प्रखराधिराज्ये ॥१३॥
झञ्झानिले दुर्धरवृष्टिपूर्णे स्थिरीभवेत् कश्चन दीपकोऽपि ।
परन्तु नो हैन्दव-वंशदीपः मोहम्मदीये प्रखराधिराज्ये ॥१४॥

Scanned by CamScanner

क्षुधार्तकण्ठीरवमस्तके वा शालावृकः कोऽपि पदं निदध्यात् ।
न साहसे जातु बलिष्ठहिन्दुः मोहम्मदीये प्रखराधिराज्ये ॥१५॥
विलङ्घयेद् बाहुबलेन कश्चित् कदाचिदब्धिं मकरालयं तम् ।
न काङ्क्षितं पल्वलफल्गु हिन्दुः मोहम्मदीये प्रखराधिराज्ये ॥१६॥
तृणाङ्कुरश्चापि भवेत् समर्थः खर्जूरवृक्षं सहसा विभेत्तुम् ।
आस्माकसाम्राज्यतरोस्तु पर्णं न स्प्रष्टुमीष्टे मनसाऽपि हिन्दुः ॥१७॥
विलूनपक्षश्चटकोऽपि कश्चित् आतीव्रभानूड्डयतां कदाचित् ।
बलिष्ठपक्षोऽपि परं न हिन्दुः मनोरथेनात्र वितस्तिमात्रम् ॥१८॥
अल्ला स्वयं वाञ्छति हिन्दुदेशे पाषाणगोपूजकधर्मनाशम् ।
इस्लामधर्मप्रसरं चिराय मोहम्मदीये प्रखराधिराज्ये ॥१९॥
परन्तु वार्ता विपरीतभूता दूरात् स्फुटन्तीव पिशाचवाणी ।
चिरादनाकर्णितवृत्तसारा मनोऽस्मदीयं तुदतीव मन्दम्" ॥२०॥
विजापुराधीश्वरयेदिलस्य स्वसौख्यहेतोरपि दुःखहेतुः ।
जीवत्यसावित्यवगत्य सर्वे समुत्थिता तेऽरमुदग्रखड्गाः ॥२१॥
उच्चैरवोचन्नमुमात्मनाथं "जगद्गुरो ! किं व्यथसे मुधैव ।
भृशं प्रमत्तः शशकः स जातु मृगाधिराजस्य किमाधिहेतुः ॥२२॥
जानीमहे तं गिरिगह्वरस्थम् अकारणोन्मत्तमतीव मूढम् ।
येनागतेनात्र पुरा सभायां राजन् ! कृतस्ते प्रथमापराधः ॥२३॥
येनागतेनैव पुरा पुरेऽस्मिन् चतुष्पथे राजपथेऽपि राजन् ।
हन्ताऽस्मदीयस्य च धर्मबन्धोः हन्तव्यहन्तुः कर एव लूनः ॥२४॥
स्वधर्मराज्यप्रतिकूलभूतम् निर्हेतुकं क्षुद्रतमापराधम् ।
वयं न राजेद्र सहामहेऽत्र स्तनन्धयस्यापि हि हिन्दुजस्य ॥२५॥
अव्याहतं वर्षसहस्त्रमेते ये चास्मदीयैरिह यावदिच्छम् ।
प्रस्कन्दिता हिन्दुजनाः क्षमन्ते न जीवितुं नाथ ! कुतो नु जेतुम् ॥२६॥
कोऽप्यस्मदीयो नृपते त्वदीयाम् आज्ञामनुज्ञामथवाऽधुनैव ।
विज्ञाय संग्रामविशेषविज्ञो हन्यादरिं तं समरानभिज्ञम् ॥२७॥
फतेहखानो निजनामधेयं जयार्थमेवेति समूहमानः ।
अरेरमुष्याशु पराजयार्थं स्वयं ययाचे नृपतिं ह्यनुज्ञाम् ॥२८॥
अन्येऽप्यहंपूर्विकया तथैव सङ्ग्रामकण्डूक्षुभिताः समस्ताः ।
जेतुं ग्रहीतुं तमरिं निहन्तुं प्रोचुर्निजां साहसिकीं मनीषाम् ॥२९॥
फतेहखानस्य तथेतरेषाम् उत्साहभाजां समरोत्सुकानाम् ।
स्वराज्यनिष्ठां च तथात्मभक्तिं विज्ञाय राजा स तुतोष चित्ते ॥३०॥

Scanned by CamScanner

जगाद चामूनतिमन्द्रमीषत्- स्फुटीकृतारञ्जितदन्तपङ्क्तिः ।
गिरा नवाम्भोदनिनादगुर्व्या कोपानलं सान्त्वयितुं तदीयम् ॥३१॥
“साम्राज्यसिंहासनवज्रपादा दुष्टारिनिर्दलनशक्तहस्ताः ।
शस्त्रास्त्रसन्नद्धमदङ्गभूताः किं दुष्करं वो जगतीतलेऽस्मिन् ॥३२॥
विनाऽपि सेनामसहायमेनं वनेचरं हिन्दुमतीव तुच्छम् ।
युष्मासु कोऽप्येकतमः समर्थः जेतुं ग्रहीतुं सहसैव हन्तुम् ॥३३॥
नैव प्रपश्यामि विमृश्य भूयः प्रयोजनं किंचन संगरस्य ।
किं तर्जनीतर्जनमात्रसाध्ये कार्ये हि कार्यं प्रखरैः कृपाणैः ? ॥३४॥
बिभीषिकामेव विलोक्य दूरात् सुदुर्धरश्चापि पलायतेऽसौ ।
प्लवङ्गमः क्षेत्रविनाशकारी किमेष हिन्दुर्न तथाऽपनेयः ? ॥३५॥
अस्त्यस्य मूढस्य वनेचरस्य पिता शहाजिर्हि वशंवदो नः ।
साम्राज्यकोणे क्वचिदस्मदीये यः किंकरो यापयति स्वमायुः ॥३६॥
विनष्टधीर्मत्त इव प्रकामम् असाम्प्रतं सम्प्रति वर्तते सः ।
कृतोपजापः स्वजनैर्निगूढं साम्राज्यमस्माकमिदं क्षिणोति ॥३७॥
चारैरिदं मे विनिवेदितं प्राग् अद्याफझुल्लेन विलेखितं च ।
आप्तादवाप्ताऽनुमितिप्रतीपा विश्वासपात्रं खलु किंवदन्ती ॥३८॥
दासोऽप्यसौ सैन्यसुहृत्समेतः सङ्ग्रामविद्याकुशलश्च शूरः ।
पुत्रेऽभियोगं सहसाऽवगत्य युद्धं प्रकुर्यात् कुपितः शहाजिः ॥३९॥
तस्मान्न यावद् विनिगृह्यतेऽसौ कर्णाटके शत्रुपिता कथंचित् ।
तावन्न युद्धं विपिनेचरेण फलप्रदं स्यादिति तर्कयामि ॥४०॥
राजाधिराजस्य जगद्गुरोस्तत् सुदूरदर्शित्वमवेक्ष्य सूक्ष्मम् ।
आश्चर्यविस्फारितलोचनास्ते ह्यन्योन्यमैक्षन्त मनाक् सलज्जाः ॥४१॥
विजापुरेन्द्रश्वशुरः प्रसिद्धः कूटप्रयोगे च रणे प्रवीणः ।
उल्लालयन् कूर्चमुवाच वाचम् अमात्यवर्यः किल मुस्तफाख्यः ॥४२॥
“द्विधा कृतं संकटमेकमेव राजन् यदुक्तं भवताऽधुना नः ।
तदर्धभारं व्यपनेतुमद्य कर्णाटकं गन्तुमहं समीहे ॥४३॥
विश्वासमापाद्य कयापि युक्त्या शहाजिमेनं सहसा विमोह्य ।
निगृह्य कालायसशृङ्खलाभिः मतङ्गवत् त्वत्पुर आनयामि ॥४४॥
वाग्जालके कोमलशब्दतन्तौ संव्याततेऽनेन मया यथावत् ।
न केवलं मीननिभाः पुमांसो बद्धा अपि ग्राहभयंकरास्ते ॥४५॥
भुजङ्गमस्तीव्रविषन्धरोऽपि मञ्जुस्वरेणैव वशं प्रयाति ।
तदेष हिन्दुर्मधुभाषणेन कथं वशे स्थापयितुं न शक्यः ॥४६॥

Scanned by CamScanner

निगृह्यते यावदमुष्य जन्तोः पिताऽतितुच्छस्य मया प्रयुक्त्या ।
तावत्ससैन्योऽभियुनक्तु शत्रुं फतेह्खानोऽयमधृष्यवीर्यः ॥४७॥
निश्चप्रचं मृत्युमुखप्रपन्नं दृष्ट्वैव भीरुः पितरं स वन्यः ।
रणं हि मुक्त्वा शरणं तवैव प्रपद्यतां साञ्जलिबन्धमद्धा ॥४८॥
ततोऽपि चेन्मन्दमतिः स बालः शिरस्तवाग्रे नमयेन्न गर्वात् ।
फतेह्खानस्तमुष्य कृत्वा करोतु राजेन्द्र ! नवोपहारम् ॥४९॥
वयं द्विधा कृच्छ्रमभिप्रपन्नाः यथा तथाऽस्मद्रिपुरप्युपेतु ।
जिगीषवो नीतिविदः सदैव शठेषु शाठ्यं प्रतियोजयन्ति ॥५०॥
इति नरपतिवल्लभस्य तस्य कुटिलमतेरवगत्य कूटमन्त्रम् ।
प्रमुदितमतयोऽनुमेनिरेऽन्यैः शिवविजयप्रतिशोधमीहमानाः ॥५१॥

धन-जन- हय-हस्तिपत्तियुक्तो
लघुयुक्त्या ग्रसितुं शहाजिमुत्कः ।
अनुमतिमधिगम्य येदिलस्य
मधुभाषी स च मुस्तफः प्रतस्थे ॥५२॥

**॥ इति श्रीशिवराज्योदये महाकाव्ये**
**"शत्रुव्यथा" नाम द्वादशः सर्गः समाप्तः ॥**

॥ १८८२ तमे शालिवाहनशके चैत्रशुक्लप्रतिपदि
नववर्षारम्भे समाप्तोऽयं सर्गः ॥
( ९-४-५९ खिस्ताब्दे )

# श्रीशिवराज्योदये महाकाव्ये
# 'आपत्तिद्वयाघातो' नाम त्रयोदशः सर्गः।

स दुर्गषट्काधिपतिः शिवाजिः विजेतुकामोऽन्यमरातिदुर्गम् ।
सुखोपविष्टः सह मातृमित्रैः भृशत्वरं चारमपश्यदेकम् ॥१॥
त्रपातपारोपितकालिमानं श्रवाम्बुपूर्णाङ्गजरोमकूपम् ।
प्रवृद्धनिश्वासनतोन्नतोरःस्थलं तमालोक्य स शङ्कितोऽभूत् ॥२॥
पञ्चाङ्गसंस्पृष्टधरं विनम्रः स वक्तुकामोऽप्यवरुद्धकण्ठः ।
गृहीतजिह्वस्त्रपयेव चारः स्खलत्पदां प्रैरयदात्मवाचम् ॥३॥
"सौभाग्यवन्तः खलु तेऽम्ब चाराः ये पूर्णपात्रस्य भवन्ति पात्रम् ।
निवेदयन्तो हितकिंवदन्तीं प्रियां प्रियेभ्यः प्रथमं प्रियाणाम् ॥४॥
परं मया प्राक्तनजन्मनीषत्पुण्येन पापं महदाहितं स्यात् ।
यत्पुण्यभाजां भवतां पुरस्तात् नियोजितो वक्तुमवाच्यवाचम् ॥५॥
सुभद्रशीलस्य किमप्यभद्रं स्वस्वामिनो वः प्रतिवक्तुमद्धा ।
वाचालयत्यद्य हि पामरं मां विधिः कुधीर्हर्तुमिवात्मपापम् ॥६॥
सम्मोहनास्त्रं प्रियवाङ्मयं तत् प्रयोज्य युक्त्या मधुभाषणेन ।
सिंहः शशेनेव हि मुस्तफेन प्रवञ्चितो हन्त शहाजिराजः ॥७॥
गुरुस्तवाऽसौ गुरुशृङ्खलाभिः कुमार ! कालायसदुर्धराभिः ।
रात्रौ तुरीयप्रहरे प्रसुप्तः सशस्त्रपातं रिपुणा निबद्धः ॥८॥
कुलेन धर्मेण च हास्मदीयैः नीचातिनीचैर्बत बाजिमुख्यैः ।
सहर्षहासं परितः समेत्य निर्भर्त्सितोऽपौ कटुशब्दटङ्कैः ॥९॥
संकुण्ठितो नैगडलोहबन्धैः प्रताडितश्चार्मणदुष्प्रतोदैः ।
कारालयं प्रत्यपि हन्त नीतो ह्यनाथवत् सोऽखिलहिन्दुनाथः ॥१०॥
कुमार ! मातर्हतजीवितस्य क्षन्तव्य एषोऽद्य ममापराधः ।
वचो हि यद् दुर्वचमेवमुक्त्वा जीवामि दुःखानलदग्धचेताः ॥११॥
तवाम्ब भर्ता शिव जन्मदाता ममान्नदाता जनदुःखहन्ता ।
विजापुरे राजपथे स राजा प्रदर्शितो बद्धमृगेन्द्रतुल्यः ॥१२॥
वार्तामिमामार्ततया निवेद्य चारः स चारातिकृतिं विनिन्दन् ।
अमर्षशोकानलदग्धचेता विमुक्तकण्ठं सहसा रुरोद ॥१३॥
आकस्मिकीं घोरतमां प्रवृत्तिं स्वभर्तृजीवापहरां निशम्य ।
धीरा प्रकृत्याऽपि जिजा तदानीं पाषाणमूर्तिप्रतिमा बभूव ॥१४॥
शुश्राव किञ्चिन्न जगाद किञ्चित् ददर्श किञ्चिन्न विवेद किञ्चित् ।
निरुद्धकल्पश्वसिता कथञ्चित् न सा तदानीं निपपात भूमौ ॥१५॥

Scanned by CamScanner

श्रुण्वन्नुदन्तं पविपातकल्पं शिवाजिराकस्मिकमार्तचेताः ।
क्षणाद् विसस्मार महान्तमन्तः समुच्छलन्तं विजयप्रमोदम् ॥१६॥
वृत्तान्तमाकर्णयितुं समुत्कैः अन्यैस्तु चारं परितः परीतैः ।
त्यक्षरं कर्णपथेऽनुभूतः प्रतप्तलोहद्रवबिन्दुपातः ॥१७॥
परस्परं किञ्चिदभाषमाणैः निःस्पन्दनालोचनपक्ष्मभिश्च ।
निश्चेतनान्तःकरणैः समित् सा पाषाणमृन्मूर्तिमयीव जाता ॥१८॥
चिराय नाभाषत कोऽपि कञ्चिद् अधोमुखं नोदनयच्च कश्चित् ।
व्यदारयत् कोऽपि भुवं पदेन न्यपीडयद् वाऽथ शिरः करेण ॥१९॥
प्रवेगधावत्तुरगांघ्रिपात–समुच्छलद्भूरिरजःसमुत्थः ।
दूरात् खुराघातकठोरशब्दः चकर्ष तेषां श्रवणेन्द्रियाणि ॥२०॥
सद्यः समाकर्णितदुष्प्रवृत्तिव्यामूढसम्भ्रान्तविषण्णचित्ताः ।
शशङ्किरे संकटमेव सर्वे विपद्गतानां विपदेव चित्ते ॥२१॥
रजःसमूहादुदयन्निवैकश्चारः स्वकीयोऽस्फुटमीक्षितस्तैः ।
प्रताडयन् मन्दगतिं समर्थ्यं तुरङ्गमं स्वं गरुडप्रवेगम् ॥२२॥
निमेषमात्रात् स समीपमेत्य श्रमाम्बुसंक्लिन्नसचैलकायः ।
यथाक्रमं सम्प्रणिपत्य सर्वान् उवाच निःश्वासविकीर्णवर्णः ॥२३॥
मातर्महाराज ! नवस्वराज्यसत्रं हि नो ध्वंसयितुं प्रवृत्ता ।
वरूथिनी काऽपि विजापुरीया प्रचण्डरूपा खलु पूतनेव ॥२४॥
तस्याः प्रणेता चतुरङ्गभाजः फतेहखानः स च कंसतुल्यः ।
हिन्दुस्वराज्यार्भकमात्मशक्त्या निहन्तुमाकाङ्क्षति जातमात्रम् ॥२५॥
दृष्ट्वैव सेनां सहसा रिपूणामहं पुनर्मारुतितुल्यवेगः ।
उल्लङ्घ्य दुर्लङ्घ्यपथं सुदीर्घमभुक्तपीतोऽत्रसमागतोऽस्मि ॥२६॥
दन्तावलास्ते तुरगायमाणाः तुरङ्गमा वा गरुडायमानाः ।
पदातयः कोलकुलायमाना विध्वंसितुं राज्यमिदं त्वरन्ते ॥२७॥
सस्यानि सर्वाणि कृषीवलेभ्यो गव्यानि गोपालकुलाङ्गनाभ्यः ।
हठादपाहृत्य विनिर्ग्रसन्ती चमूरसौ राज्यमिदं ग्रसेन्नः ॥२८॥
क्षमस्व मे धीर कुमार भीरोः इदं वचोऽशङ्कितपापशङ्कि ।
मेरुस्थिरान्तःकरणस्य तेऽग्रे भयस्य शङ्कैव वृथेति जाने ॥२९॥
पूर्वां विपत्तिं परिबृंहयन्तीम् अन्यामिमां मूर्धनि निष्पतन्तीम् ।
श्रुत्वा शिवाजिः स निसर्गधीरः सावेशमुत्थाय बभाण सर्वान् ॥३०॥
उत्तिष्ठतोऽत्तिष्ठत हे सुवीराः जयध्वनिं गर्जत गर्जतोच्चैः ।
स्मृत्वा भवानीं जगदादिशक्तिम् अह्नाय विध्वंसत शत्रुसेनाम् ॥३१॥
गोब्राह्मणत्राणकृतेऽस्मदीयः स्वातन्त्र्यसंस्थापनयत्न एषः ।
विरोधिनस्तत्र भवन्ति ये ये संहारमर्हन्ति सदैव ते ते ॥३२॥

Scanned by CamScanner

सर्वेऽप्यमृतस्य पुत्राः ।
विश्वेश्वरानुग्रहपात्रभूता वयं हि सर्वेऽप्यमृतस्य पुत्राः ।
अस्मत्सुसंकल्पबलेन विघ्नाः समुद्भवन्तो विलयं प्रयान्ति ॥३३॥
युष्मत्कृपाणाग्रविदीर्णसैन्यः पराभवं प्राप्य विपत्युदर्कम् ।
फतेहखानो निजनामधेयवैयर्थ्यमद्यैव विदांकरोतु ॥३४॥
जयैषिणीयं पृतनाऽप्यरीणां ययाभ्युपेति त्वरयाऽऽक्रमार्थम् ।
तयैव यौष्माकपराक्रमेण पराजयं विन्दतु सप्रणाशम् ॥३५॥
उपत्यका काचिदधित्यका च सह्यस्य पाषाणमयी कठोरा ।
प्रस्कन्दितास्मद्रिपुसैन्यमांसवसाभिराप्नोत्वधुना मृदुत्वम् ॥३६॥
म्लेच्छासुरासृक्परिरज्यमाने प्रोत्तुङ्गशृङ्गेऽस्य गिरेर्भवानी ।
खड्गाभिघातस्फुटदुच्चतालाननूनमदं ताण्डवितं करोतु ॥३७॥
कृत्तारिकण्ठोच्छलितास्रकूलंकषाप्रवाहातिकषायितास्ते ।
सह्यप्रपाताः सकला भवन्तु गुणेन पुण्याः प्रतिशोणभद्राः ॥३८॥
म्लेच्छाधिपोऽसौ च विजापुरीयः श्रुत्वा स्वसेनाहतिकिंवदन्तीम् ।
जानातु सह्याद्रिवनेचरेषु जागर्ति सा शाश्वतहिन्दुशक्तिः ॥३९॥
जानन्तु सर्वे यवनाधिराजा युष्माकमूर्जस्वलविक्रमेण ।
अतःपरं भारतपुण्यभूमौ स्वातन्त्र्यलक्ष्मीर्विहरिष्यतीति ॥४०॥
प्रोत्साहिनीं तां शिवराजवाणीम् आकर्णयन्तो विनताः सखायः ।
विषादकार्पण्यभयापहारि नूनं पपुर्वीररसायनं ते ॥४१॥
भयेन भीतिः क्वचन प्रलीना तथा विषादेन विषण्णता च ।
हृत्स्थण्डिले स्फूर्तियुतः स तेषां वीरः रसो मूर्त इवोन्ननर्त ॥४२॥
उत्सादनार्थं रिपुसैनिकानां सर्वेऽप्यहंपूर्विकया सुसिद्धाः ।
संग्रामधुर्यत्वमभीहमानाः जगर्जुरुच्चैर्विजयोग्रघोषम् ॥४३॥
विज्ञाय तं राजगडं रणज्ञः स्वावासदुर्गं समरात्यनर्हम् ।
शिवाजिराजिप्रभुतामवाप्तुं पुरन्दरं गन्तुमना बभूव ॥४४॥
पुरन्दरास्याधिपतिः शहाजेः सखा महादाजिरिति प्रसिद्धः ।
विपद्गतं मित्रसुतं शिवाजिं प्रेम्णाऽग्रहीदात्महृदीव दुर्गे ॥४५॥
हेमाद्रिदुर्लङ्घ्यपुरन्दराद्रौ पुरन्दरौजाः स युवा शिवाजिः ।
म्लेच्छासुरैर्योद्धुमना उवास मरुद्गणाभैः प्रियमित्रवर्यैः ॥४६॥
दुर्गः सुभानोत्तरमङ्गलाख्यः बालाजिनाऽरातिवशंवदेन ।
वशीकृतश्चेति विदन् स वीरः विगृह्य जेतुं पुनरैच्छदेनम् ॥४७॥
प्रक्षुब्धशार्दूलगणैरजय्यः वीराग्रणीर्वीरवरानुयातः ।
दुर्गं द्रुतं जेतुममुं प्रयुक्तः सुहृत्तमः कावजिनामधेयः ॥४८॥
कृत्वा मुहूर्तं रणरङ्गकेलिं सन्तुष्टये श्रीरणचण्डिकायाः ।
सर्वासु दिक्षु प्रसभं विकीर्य रणोचितं मौलिबलिं प्रभूतम् ॥४९॥

Scanned by CamScanner

नवस्वराज्यस्य तमाद्यशत्रुं स्वकीयमप्युद्धतशत्रुवश्यम् ।
बालाजिमाहत्य रणे ससैन्यं दुर्गो जितस्तेन सवित्तकोशम् ॥५०॥
फतेहखानप्रमुखैः प्रवीरैः प्रोत्साहिताऽन्या ध्वजिनी रिपूणाम् ।
गजोष्ट्रतुङ्गा निनदच्छतघ्नी पुरन्दरं प्रत्यभियोक्तुमेता ॥५१॥
वनेचराणां दलमस्त्रहीनं तन्मुष्टिमेयं रभसा प्रहत्य ।
बद्ध्वाऽसहायं पितृवच्छिवाजिं विजापुरं यामि जयेन सार्धम् ॥५२॥
सम्राडसौ राजसभागतं मां सम्मानयिष्यत्युचितैर्वचोभिः ।
अलङ्करिष्यत्यतिदीप्तहारैः स्वयंसमाश्लिष्यति सप्रमोदम् ॥५३॥
जयार्थकं तन्मम नामधेयं लक्षाननेभ्यः समुदीर्यमाणम् ।
प्रवेक्ष्यति श्रोत्रपथं मदीयं पुनः पुनर्द्रागाग्जयशब्दपूर्वम् ॥५४॥
संकल्पयन्नन्तरिति प्रकामं फतेहखानः सहसाऽश्रृणोत् सः ।
जयध्वनिं कर्णविदारणोग्रं स्वावासपार्श्वे शिवसैनिकाम् ॥५५॥
अकाण्डमारब्धमदृष्टपूर्वं संहारकाण्डं परितोऽवलोक्य ।
भयाकुला म्लेच्छवरूथिनी सा गाढभ्रमावर्त इवाममज्ज ॥५६॥
आकाशतो वा गिरिभूमिगर्भात् सरिज्जलाद् वा विपिनान्तरङ्गात् ।
चमूरसौ दुर्धरशस्त्रपाता प्रादुर्बभूवेत्यनुमेनिरे ते ॥५७॥
यथाऽऽपतन् सत्वरमभ्यमित्रं तथैव संहारमयं च सत्रम् ।
समाप्य शैवा रणदीक्षितास्ते शिवं प्रपन्ना विजयेन सार्धम् ॥५८॥
पुरः स्थितं मृत्युमिवापहर्तुं पलायमानः स फतेहखानः ।
अनुद्रुतः सिंहपराक्रमेण वृद्धेन पासलकर-बाजिना च ॥५९॥

शुभ्रं यशः प्रथमसंगरसत्रजन्यं
हा धिक् कलङ्कयितुमीषदिवाकलङ्कम् ।
क्रूरेण तेन विधिना सहसा रणान्ते
निःपातितो बत कृतान्तमुखे स बाजि ॥६०॥

प्रियसखमतिवीरं निर्गतं वीरयोग्यां
गतिमिति हि विदित्वा शोकमग्नः शिवाजिः ।
विजयमपि न मेने हर्षहेतुं कथंचित्
व्यथयति खलु सौख्यं स्तोकशोकाभिभूतम् ॥६१॥

**॥ इति श्रीशिवराज्योदये महाकाव्ये**
**"आपत्तिव्याघातो" नाम त्रयोदशः सर्गः ॥**

Scanned by CamScanner

# श्रीशिवराज्योदये महाकाव्ये
# 'पितृमोचनम्' नाम चतुर्दशः सर्गः ।

अथ जिजा स्वसुतानुगविक्रमं रिपुनिषूदनमात्मजयावहम् ।
समधिगम्य तुतोष न सर्वथा पतिविपत्तिसमाकुलमानसा ॥१॥
प्रतिनिमेषमहर्निशमात्मनि प्रियपति-प्रतिमानमचिन्तयत् ।
किमपि नैक्षत वस्तु निजाग्रतः सततमन्तरुपाहितलोचना ॥२॥
वपुरपास्तसमस्तविभूषणं हृदयमस्तमितान्यविचिन्तनम् ।
बत तदीयमतिप्रियजीवितं क्षणश आहृतसारमिवाभवत् ॥३॥
पतिपदस्थितदुर्धरशृंखला-खणखणायितमात्रपरायणम् ।
श्रवणमन्यरवश्रवणाक्षमं प्रियसुतस्य वचोऽपि न चाग्रहीत् ॥४॥
वदनमश्रुजलाविललोचनं परुषरूक्षकचाचितमस्तकम् ।
करतले विनिधाय दिवानिशं रहसि सा कुलदैवतमार्चयत् ॥५॥
विजयिनोऽपि हि ते शिवसैनिका अगणयन्न जयं हृदयंगमम् ।
स्वहृदयेऽनुबभूवरहर्निशं प्रियसुहृज्जननीहृदयव्यथाम् ॥६॥
अथ यतिः परमार्थपरायणो भुवि समर्थ इति प्रथिताभिधः ।
प्रविचरन् जगतो हितकाम्यया शिवमियाय तदैव यदृच्छया ॥७॥
चिरतपश्चरणेन परोरजा अपि विभूतिरजः कणभूषितः ।
त्रिगुणबन्धनमुक्तमना अपि शिवगुणैकवशीकृतमानसः ॥८॥
तदुदितं रघुवीरजयध्वनिं नवपयोधरगर्जितमेदुरम् ।
श्रुतवतो हृदयं शिवभूपतेः मुदितमाकुलचातकपोतवत् ॥९॥
गुरुविपत्तिमिमां सहसागतां समधिगम्य स नीतिविशारदः ।
स्वपितृमोचनयुक्तिविचिन्तनाकुलमतिं शिवमेवमभाषत ॥१०॥
शिव सुधीर ! सुधीरसि सर्वथा दृढविवेकपरश्च परन्त्विवयम् ।
गुरुविपत्तिरतिस्थितधीमतामपि धियं खलु चालयितुं क्षमा ॥११॥
जननमृत्युभयाच्चिरबन्धनादपि कथञ्चन मुक्तिरवाप्यते ।
यवनशासनशृंखलतः पुनर्न सहसा खलु कोऽपि विमुच्यते ॥१२॥
उदयनः किल बन्धनकोष्ठतः कपटयुक्तिबलेन बहिर्ययौ ।
इह तथा न तु काचन दृश्यते तव गुरोः परिमोचनशक्यता ॥१३॥
कुटिलनीतिरता यवनाधिपा न गणयन्ति ऋतानृतमार्जवम्
शृणु वदामि नयं स्मर शाश्वतं कपटमेव हि कापटिकैर्वरम् ॥१४॥

Scanned by CamScanner

स पृथिवी–परराजपदाभिधो नरपतिः शरणागतवत्सलः ।
अगणयन्नयमेनमनुत्तमं बत निजज्ञतयैव पराहतः ॥१५॥
समवगच्छसि सत्यवतीसुतः श्रुतिसमे स्वकृतावपि भारते ।
दृढमिदं प्रतिपादितवान् मतं जयत मायिनमुत्कटमायया ॥१६॥
स कुटिलान्वयजोऽखिलशास्त्रविद् नृपतिनीतिविदां परमो गुरुः ।
श्रृणु समर्थयते निजदर्शने मदुदितं खलु शाश्वतिकं नयम् ॥१७॥
अपि च विठ्ठलभक्तिरसाप्लुतः परमशान्तिधरः स मुनिर्महान् ।
स्फुटमिदं प्रतिपादयतेऽधुना यदधमैरधमत्वमिहोचितम् ॥१८॥
भगवता कपटेन हि घातितः स यवनः किल कालयुताभिधः ।
कथमिमे यवनाः कपटं विना वद नितान्तपराभवमाप्नुयुः ॥१९॥
अपि च सत्यधनोऽपि रघूत्तमः सकपटं निजघान हि बालिनम् ।
मनुजदेहधरः परमेश्वरश्चरति यत् खलु तन्मनुजश्चरेत् ॥२०॥
पुरुषतामपि तां पुरुषोत्तमः सकपटं विजहन्निजलीलया ।
हितसुखाय विपद्यसुरद्विषां यदुचितं तदसौ समदर्शयत् ॥२१॥
इति निपीय हिताः स गुरोर्गिरः विनयनम्रशिरा युवकः शिवः ।
निजविमर्शबलोदितमुत्तमं कमपि मन्त्रमुवाच सुनिश्चितम् ॥२२॥
सुफलितं खलु भाग्यमिदं मम यदुपयान्ति गृहं प्रति हि स्वयम् ।
मुनिवरा गुरुदेव भवादृशः सकलमानवपूज्यपदाम्बुजाः ॥२३॥
जगति धर्मपथं शुभमुन्नतेः उपदिशन्त्यपि सिद्धगिरा स्वया ।
पितृविपत्तिविचिन्तनभर्जितं तदपि फुल्लति चित्तमिदं तया ॥२४॥
जगति राजपदोत्सुकचेतसां यदुचितं हि विपत्तिषु मादृशाम् ।
तदुदितं भवता स्वयमद्य मे कुटिलनीतिमहत्त्वमतिस्फुटम् ॥२५॥
सदुपदेशमवाप्य मुखाद् गुरोः किमपि भक्तजनेन समर्प्यताम् ।
स्वभुजविक्रमनिर्जितमर्प्यते सकलराज्यमिदं गुरुदक्षिणा ॥२६॥
इति निगद्य वदान्यशिरोमणिर्निजशिरो मणिकुण्डलमण्डितम् ।
यवनराजपुरः स्थितमुच्चकैरनमयद् गुरुराजपदाम्बुजे ॥२७॥
रघुपतेरिव तस्य शिवस्य तां यति–मुनिष्वपि दुर्लभदर्शनाम् ।
विभव–निर्ममतामवलोकयन् परिजहर्ष स हर्षविमुक्तधीः ॥२८॥
समधिगम्य स सिद्धगिरो गुरोः वरविशेषगुणां विजयाशिषम् ।
सविनयं पुनरात्ममनोगतं शुचितमस्मितपूर्वमभाषत ॥२९॥
ननु भवद्वचनश्रवणावधौ कुटिलमार्गगवेषणसत्वरा ।
मम मतिर्नवसंस्फुरणाद् गुरो यददिशत् तदहं निगदामि वः ॥३०॥

प्रबलशत्रुविरोध उपस्थिते मितबलो बलवत्तरमाश्रयेत् ।
कुटिलनीतिरियं समयेऽधुना मम भविष्यति भूरियशस्करी ॥३१॥
सकलभूमिभुजामिह भारते ध्रुवमनन्यसमोऽखिलशक्तिभाक् ।
उपगतः स्मरणं मम देहलीपतिरसौ बत शाहजहाभिधः ॥३२॥
यदपि तस्य बलोद्धतपूर्वजैः निखिलमुत्तरभारतमाजितम् ।
निजबलेन पुनर्विजिगीषते सकलमेव स दक्षिणभारतम् ॥३३॥
चिरमसूयति दक्षिणभारताधिपतये स विजापुरभूभुजे ।
ग्रसितुमेनमरातिमवेक्षते किमपि फलगुनिमित्तमनारतम् ॥३४॥
अतिबिभेति ततोऽयमहर्निशं मदरिरेव विजापुरकिंप्रभुः ।
स किल राक्षसजातिधुरन्धरः कपिकुलाधिपतेरिव वालिनः ॥३५॥
यदि तदीयमहं क्षणमाश्रयं ननु लभेय मनागतिदुर्लभम् ।
मम पिता ध्रुवमेव विमुच्यते रिपुमदेन समं समयेऽधुना ॥३६॥
अनुनयेन विना न हि लभ्यते बलवतामबलैरनुकूलता ।
उदधिमुत्तरति प्रचलोर्मिनम् अनुनयन्निव नम्रशिरा नरः ॥३७॥
स्रवदमन्दमदान्धविलोचनः सुदृढवृक्षविपाटनकौतुकी ।
अनुनयेन वशीक्रियते नरैर्भृशमधृष्यतमोऽपि मतङ्गजः ॥३८॥
विधृतवैतसवृत्तिरतः स्वयं विनयपत्रममुष्य लिखाम्यहम् ।
यदवलोक्य जिगीषुरसौ नृपो मदनुकूलतयैव चरिष्यति ॥३९॥
इति निशम्य शिवस्य यवीयसो नयपरं सुदविष्ठदृशो वचः ।
गुरुरुवाच, कुरु स्वमतोचितं नव मतं नितरां नयसम्मतम् ॥४०॥
अन्येद्युरेव निरियाय शुभे मुहूर्ते
दिल्लीश्वरं प्रति शिवप्रहितोऽग्रदूतः ।
उष्ट्रं प्रवेगमपि नोदयमान उच्चैः ।
आदाय तद् विनयपत्रमुदर्कभाग्यम् ॥४१॥
सा जिजाऽथ पतिमुक्तयेऽनिशम् ईश्वरार्पितमनोमतिः सती ।
उज्झिताऽशनमतीव दुश्चरम् आचचार वटपूजनव्रतम् ॥४२॥
सम्प्राप्ते ननु शुचिमासि शुक्लपक्षे प्राचीनं वटतरुमेकमाश्रयन्ती ।
सावित्रीं प्रियपतिजीवितप्रदात्रीं सा रात्रिन्दिवमतिपूजयांचकार ॥४३॥
निराहारक्षीणा प्रततरुदिताक्लिन्ननयना
वचोहीना दीना मलिनवसना म्लानवदना ।
हठादेकीकृत्य क्षपिततनुशेषं निजबलं
जगौ सा सावित्रीस्तवनमतिमन्दं कथमपि ॥४४॥

Scanned by CamScanner

# श्रीसावित्रीस्तोत्रम्

श्रीसावित्रि त्रिभुवनमहामङ्गले पुण्यशीले
पातिव्रत्यप्रथितचरितस्फीतकीर्त्येकमूर्ते ।
भर्तुप्राणप्रहरणमदोन्मत्तकालप्रजेत्रि !
हे मातस्त्वच्चरणशरणां त्राहि मां दीनदीनाम् ॥४५॥

देवाः सर्वे हरिहरगणेशादयः शक्तिमन्तो
बाल्यादेव प्रतिदिवसमाराधितास्तीव्रभक्त्या ।
निस्सामर्थ्या इव जननि ते हन्त नोन्मोचयन्ते
मत्प्राणं तं भगवति चिरान्म्लेच्छकारालयस्थम् ॥४६॥

मत्सेवासम्मुदितहृदयैर्योगिभिर्वीतरागैः
सौभाग्यार्थं शतशतविधा आशिषो मे वितीर्णाः ।
आपत्काले विपरिणमिते सिद्धवाचोऽपि तेषां
मत्सौभाग्ये भगवति ! पुनर्निष्फलत्वं भजन्ते ॥४७॥

अम्ब ! स्त्रीणां त्वमसि परमं दैवतं पुण्यभाजाम् ।
एकं ध्येयं भुवनविदितं भर्तृसेवाव्रतानाम् ।
मर्त्ये लोके मरणजयिनी त्वत्कथाश्चर्यरम्या
मन्त्रप्राया सकलसुलभा काव्यविद्यैव नूनम् ॥४८॥

भर्तृप्राणान् यमकरगतांश्चापि निर्वर्तयन्ती
राज्यभ्रष्टं श्वशुरमखिलं वैभवं प्रापयन्ती ।
साक्षान्मृत्योरपि हि हृदयं निर्दयं प्रीणयन्ती
शक्तिः सा ते महितमहिला-सद्‌यशोवैजयन्ती ॥४९॥

दिव्यं वह्नित्रयविनिहितं ज्योतिराम्नायशस्तं
त्रैविद्यान्तः स्फुरितमखिलं ज्ञानमाध्यात्मिकं च ।
यन्माङ्गल्यं त्रिभुवनगतं, पिण्डितं तत्समग्रं
सावित्रीति प्रथितयशसि त्र्यक्षरे नामधेये ॥५०॥

जीवोद्धर्त्री त्वमुपनिषदन्तर्गता ब्रह्मविद्या
विश्वोद्धर्त्री प्रकृतिविमला कापि भागीरथी त्वम् ।
संसारेऽस्मिन् कलुषतिमिरे दीपिका स्त्रीस्वरूपा
त्वं चिच्छक्तिः स्थिरचरगता वैष्णवी शाम्भवी वा ॥५१॥

Scanned by CamScanner

शुष्कप्रायो जननि निखिलो जीवनौघो मदीयो
भव्याकाङ्क्षामयदृढतटा हन्त भग्नाः समस्ताः ।
आपत्कालो दहति तपवत् सैकताभं मदन्तः
कन्येयं ते सरिदिव हि भूकम्पविध्वस्तरूपा ॥५२॥

इति स्तुतिशतैरहर्निशमसौ समाराधिता
कृपालवमदर्शयत् सपदि तोषिता देवता ।
प्रदोषसमये स्फुरच्छशिनि पूर्णिमास्यां तिथौ
गिरं श्रुतवती जिजा स्वहृदयैकसंजीवनीम् ॥५३॥

मुक्तः पितेति चरसंश्रुतकिंवदन्तीं
पीयूषवृष्टिमिव सौख्यकरीं किरन्तम् ।
ग्रीष्मावसानपिशुनं नवनीरदाभं
सा चातकीव सुतमैक्षत जीवभूतम् ॥५४॥

साश्चर्य-सम्मद-विनिर्गलदश्रुधारां
विप्रोषितागतशुचिस्मितपूर्णवक्त्राम् ।
आलोकयन् स्वजननीं मुमुदे शिवाजिः
मोदेत को न खलु मातृमुदा सुपुत्रः ॥५५॥

**इति श्रीशिवराज्योदये महाकाव्ये**
**"पितृमोचनम्" नाम चतुर्दशः सर्गः समाप्तः ॥**
**(समाप्तोऽयं सर्गः आषाढे सुदि ४ थ्यां तिथौ ।)**

# श्रीशिवराज्योदये महाकाव्ये
# "यवनराजकौटिल्यम्" नाम पञ्चदशः सर्गः।

असह्यकारालयवासमुक्तः शहाजिरानन्दपयोधिमग्नः ।
आकस्मिकं चात्मविमुक्तिहेतुं विज्ञातुमैच्छत् प्रियबन्धुवर्गात् ॥१॥
विजापुरस्थेषु शिवप्रयुक्तेष्वेकश्चरः कश्चन कामरूपः ।
रहस्तमभ्येत्य समस्तमाह वृत्तं तदुन्मोचनहेतुभूतम् ॥२॥
राजन् भवद्भाग्यमवर्णनीयं किं वर्णयामो वयमल्पवाचः ।
यस्यात्मजस्ते प्रविमुक्तदाता शिवः स्वयं दिव्यगुणैश्च नाम्ना ॥३॥
स गूढरन्ध्रो रिपुरन्ध्रदर्शी दिल्लीश्वरं तं रिपुमस्य राज्ञः ।
सम्प्रेष्य पत्रं विनयप्रदर्शि वशीचकारेव भवद्विमुक्त्यै ॥४॥
मित्रत्वमासादयितुं तदीयं पत्रे च तस्मिन्नलिखत् सुतस्ते ।
यत्किञ्चिदत्यन्तविनम्रभावं संश्रूयतां वाङ्मयकार्मणं तत् ॥५॥
दिल्लीन्द्र भूमितलशासनसूत्रधार षाड्गुण्यभाक् त्रिविधशक्तिविशेषशालिन् ।
आदित्यमण्डलनिभे नृपमण्डलेऽत्र ह्येको भवान् रविरिवाखिलकेन्द्रभूतः ॥
न्यायैकलग्नमनसाऽद्भुतकीर्तिभाजा पित्रा नरेन्द्र भवतः प्रविलम्बितायाः ।
मन्द्रध्वनिः स नृपमन्दिरघन्टिकायाः शश्वत्प्रतिध्वनति सर्वदिगन्तराले ॥
साम्नैव कांश्चिदथ कांश्चनभूरिदानैः भेदेन कांश्चिदितरान् समरप्रतापैः ।
जेता पितामह उदारमनास्त्वदीयो मोहम्मदीयनृपवर्यललामभूतः ॥८॥
तैमूर-सत्कुलमहोदधिसम्भवेन्दो ज्योत्स्नेव कीर्तिरमला भवतश्चकास्ति ।
काचित् कला रुचिरकान्तिमती यदीया धर्मध्वजं हरितवर्णमलंकरोति ॥
यद् बाबरप्रभृतिवीरवरैरतुल्यैः त्वत्पूर्वजैः स्थिरपदत्वमनीयतात्र ।
तन्मत्पितुर्मम च सम्मतमेकमेव साम्राज्यशासनमुदग्रतरप्रभावम् ॥१०॥
तद्दक्षिणापथ इहाहमनन्यसाह्यः पूज्यः पिता च मम वर्धयितुं सयत्नः ।
द्वेष्टा सुनी-मतवतां स शियाभिमानी मां बाधते मम गुरुं च विजापुरेशः ॥
आत्मानमेव जगदेकगुरुं वरिष्ठं मन्वान एष खलु दक्षिणसार्वभौमम् ।
राजन् सुनी-मतवतां भवतामरातिः मां ध्वंसितुं प्रयतते भवदेकनिष्ठम् ॥
यन्निर्जितं भुजबलेन मयाऽत्र किञ्चित् दुर्लङ्घ्यपर्वतमये विपिनप्रदेशे ।
हे सार्वभौम! नृपवर्य! तवाधिपत्ये संरक्षितुं तदखिलं सततं समीहे ॥१३॥
आहन्तुमेव सकलं बलमस्मदीयं राजाधिराज भवतः परमोपकारि ।
पूज्यः पिता मम भवद्धितमात्रदक्षो बन्दीकृतः कपटतः स विजापुरीयैः ॥

Scanned by CamScanner

यावन्न मे गुरुरसौ तव पक्षपाती कारालयाद् बहिरुपेति विजापुरीयात् ।
यौष्माकराज्यपरिवर्धनदत्तचित्तः तावन्न किञ्चिदपि कर्तुमहं समर्थः ॥
यच्छासने हि भवतां जनतोऽस्त्यराहा श्वःश्रेयसं भजति हिन्दुकुलप्रसूता ।
पृथ्वीपते! तदधिगच्छतु दाक्षिणात्या नित्यं भवद्बलसुरक्षितमद्विभागे ॥
त्वत्पुत्रसम्प्रहितमेवमुदारभावं राजन्नदो विनयपत्रमवाप्य तुष्टः ।
दिल्लीश्वरः स झगिति प्रतिपत्रमुग्रं सन्तर्जनार्थमहिनोच्च विजापुरेऽस्मिन् ॥
यस्मिन् क्षणेऽभ्युपगतं भयकम्पकारि तत्पत्रमेभिरिह शत्रुभिरस्मदीयैः ।
उद्घाटितं कटुरवं विरुदत् कवाटं कारालयस्य नृपते क्षण एव तस्मिन् ॥
शृण्वन्निती मं स्वसुतप्रयुक्तं नीतिप्रयोगं निजमुक्तिहेतुम् ।
शहाजिराश्चर्यनिमग्नचित्तो विजापुरेन्द्रेण निमन्त्रितोऽभूत् ॥१९॥
कृताभिषेको धृतरम्यवासाः सुकुण्डलोऽसौ ग्रहरत्नहारः ।
विलोलमुक्तावलिलम्बिगुच्छस्फुरन्महोष्णीशयुतोत्तमाङ्गः ॥२०॥
श्रीखण्डरेखाङ्कितचन्द्रभालः कर्णान्तविश्रान्तसुनीलनेत्रः ।
सुगन्धिताम्बूलरसाक्तदन्तच्छदः प्रसन्नस्मितचारुवक्त्रः ॥२१॥
पुत्राभिमानोन्नमितोरुवक्षा आन्दोलिताजानुबलिष्ठबाहुः ।
स्वच्छन्दकण्ठीरवधीरगामी नृपालहर्म्यं प्रययौ शहाजिः ॥२२॥
तद्दर्शनात्युत्सुकलोलनेत्रा आबालवृद्धा वनिताः पुमांसः ।
सन्तोषयामासुरुदीर्णलाजैः पथा व्रजन्तं तमतिप्रसन्नम् ॥२३॥
तन्मुक्तिसम्मोदितमानसानां सुहृद्वराणां प्रणयप्रणामान् ।
प्रतिप्रणामैः प्रियभद्रवाक्यैः गृह्णन् नृपद्वारमसौ प्रपेदे ॥२४॥
द्वारि प्रविष्टं तमवेक्ष्य दूराद् म्लेच्छाधिपः कृत्रिमसम्मदोऽसौ ।
प्रदर्शयामास समीपमेत्य स्वयंकृताश्लेषमहाप्रसादम् ॥२५॥
स्नेहातिरेकादिव तस्य कण्ठे भुजं निवेश्य द्विपहस्तपुष्टम् ।
सिंहासनं प्रत्यनयत् स्वकीयं विजापुरेशः सहसा शहाजिम् ॥२६॥
यथोचितस्थानमुपेयिवांसं राजा समाकृष्य तमादरेण ।
हठादिवार्धासनमात्मनीनम् अध्यासयामास निवारयन्तम् ॥२७॥
तद् गूढरोषारुणितेक्षणास्ते सर्वेऽफझुल्लप्रमुखा अपश्यन् ।
बहिर्हसन्तो हृदि विद्विषन्तो वृक्षा विषार्द्रा इव फुल्लगुच्छाः ॥२८॥
तथापि सम्मानपरैर्वचोभिः स्मितैस्तथा कृत्रिमहार्दगर्भैः ।
नृपालयस्था अधिकारिणस्ते सभाजयामासुरमुं शहाजिम् ॥२९॥
करं तदीयं च करे स्वकीयं गृह्णन् सुहास्यस्फुटदन्तकान्तिः ।
म्लेच्छाधिपोऽसौ स्मयमानमेनम् उवाच वाचं कृतकोपचारम् ॥३०॥

Scanned by CamScanner

सखे! सखायः सुहिताः सहायाः सहस्रशः सन्ति ममात्र लोके ।
भक्त्या सुमत्या च पराक्रमेण नैकोऽपि तेषां तुलनास्पदं ते ॥३१॥
मदीयसाम्राज्यविकासहेतोः प्रभूतकष्टैः समरप्रयोगैः ।
अव्याहतं यत्नवता चिराय त्वयाधमर्णत्वमिवास्मि नीतः ॥३२॥
त्वामेव सङ्ग्रामविशेषविज्ञं विज्ञाय मद्दक्षिणबाहुभूतम् ।
न केवलं पामरशत्रुवर्गो दिल्लीपतिश्चापि विकम्पतेऽसौ ॥३३॥
प्रवीर! पैगम्बरसम्प्रसूतः शियाऽभिधानो मतसम्प्रदायः ।
एषोऽन्वयो धर्मपरायणो नः त्वयैव देशेऽत्र दृढप्रतिष्ठः ॥३४॥
साम्राज्यनिष्ठां तव चाविचाल्यां परीक्षितुं भ्रान्तधिया मयैव ।
यत् किञ्चिदत्याचरितं त्वयीषत् तत्क्षालनीयं मनसः समूलम् ॥३५॥
न सोदरत्वेन हि केवलेन भ्रातृत्वमद्धा घटते नराणाम् ।
असोदरत्वे त्वयि यन्मदीयं भ्रातृत्वमन्तःकरणं दधाति ॥३६॥
विधर्मणोः सख्यमशक्यमेव वदन्ति यत्तत् खलु मूर्खजल्पः ।
अकृत्रिमं यत्त्वयि मामकीनं हार्दं सखे मय्यपि तावकीनम् ॥३७॥
मत्साहचर्योचितसन्निवेशस्त्वं दूरदेशे न्यवसश्चिराय ।
अतः परं मत्सविधे सुखेन निवासमाधेहि विजापुरेऽस्मिन् ॥३८॥
क्षमस्व मित्र प्रणयातिरेकात् स्मृतेरपेतं मम यत् कथञ्चित् ।
वृत्तं मनःपद्मविकासकारि त्वत्पुत्रदाराकुशलानुबन्धि ॥३९॥
स्मरामि तं त्वत्तनयं सदैव मृगेन्द्रशावानुगुणं शिवाजिम् ।
निसर्गनिर्भीकमुदग्रशीर्षं स्वत्वाभिमानोन्नतहृत्कपाटम् ॥४०॥
सभामुपेतः स पुराऽस्मदीयाम् उच्चैः स्वनामाकथयत् सगर्वम् ।
स्वरः स तन्नाम च ते च वर्णाः प्रतिध्वनन्तीव सदा मदन्तः ॥४१॥
श्रुतं च निम्बालकरस्य कन्या भार्या तदीया प्रथमा बभूव ।
ततो द्वितीयोऽपि कृतो विवाहः प्रेम्णा त्वया मोहितकन्ययेति ॥४२॥
प्रचीयमानं सुयशस्तदीयं संवर्धमानं विभवं च भव्यम् ।
संशृण्वतो हृष्यति मेऽन्तरात्मा सुहृत्सुतर्द्धिः स्वसुतर्द्धिरेव ॥४३॥
ग्रावाकुले सह्यवनप्रदेशे वनेचरान् कांश्चन संघटय्य ।
आश्रित्य तान् दुर्गमशैलदुर्गान् जाने स्वराज्यं स चिकीर्षतीति ॥४४॥
तद्राज्यमभ्याक्रमितुं विमूढः फतेहखानः कृतवान् प्रयत्नम् ।
तत्खड्गचिह्नं स्रवदस्रधारं बिभर्ति चाद्यापि स पृष्ठभागे ॥४५॥
पुत्रः स ते दुर्धरशक्तिशाली विहाय दिल्लीपतिमित्रभावम् ।
शियाधिराज्येन दधातु सख्यम् इत्येव मे मित्र दृढाभिलाषः ॥४६॥

यत् किञ्चिदद्यावधि तेन धाष्टर्यात् दुर्मन्त्रतो वा जितमस्मदीयम् ।
तदस्तु सर्वं तदधीनमेव शैलेष्वरण्येषु न मेऽभिलाषः ॥४७॥

पितृव्यभावेन हृदि स्थितेन याचे ततः केवलमल्पमात्रम् ।
सौहार्दलक्ष्मेति ददात्वसौ मे कोण्डाणसंज्ञं गिरिदुर्गमेकम् ॥४८॥

नदीमिवान्तर्हितघोरनक्रां वनस्थलीं कण्टकजालपूर्णाम् ।
सुपुष्पितां तां यवनाधिपस्य गिरं जगाहे सभयं शहाजिः ॥४९॥

तथापि कालोचितकृत्यवेदी राजन्यनीतिव्यवहारधीरः ।
प्रमाणयामास स तन्मनीषां ज्ञात्वाऽपि पुत्राभ्युदयान्तरायम् ॥५०॥

पित्राज्ञयैव पितृवाक्यवशंवदोऽपि
पुत्रो ययातिसदृशस्य तदा शहाजेः ।
स्वायत्तमात्मबलहेतुमतीव रम्यं
दुर्गं न यौवननिभं प्रतिदातुमैच्छत् ॥५१॥

कथमपि पितृवाक्यसुप्रतिष्ठा-
परिरक्षार्थमसावनीहमानः ।
स्वविषयकवचास्पदं हि दुर्गं
शिवराजः स ददौ पुनर्विजेतुम् ॥५२॥

**॥ इति श्रीशिवराज्योदये महाकाव्ये "यवनराजकौटिल्यम्" नाम पञ्चदशः सर्गः समाप्तः ॥**

Scanned by CamScanner

# श्रीशिवराज्योदये महाकाव्ये षोडशः सर्गः ।

एवं भेदप्रयोगेण पितरं मोचयन्नसौ ।
हर्षयन्मातरं चापि पित्रोरानृण्यमाप्तवान् ॥१॥
कारावासविमुक्तं तु शहाजिं यवनाधिपः ।
सच्छद्मनातिस्नेहेन राजधान्यामवासयत् ॥२॥
स दर्शने स्वपुत्रस्य कृष्णस्येवोत्सुकोऽभवत् ।
कारालयाच्चिरान्मुक्तो वसुदेवो यथा पुरा ॥३॥
पितृभक्तः शिवोऽप्यैच्छत् सह मात्रा प्रसन्नया ।
पितुर्बन्धविमुक्तस्य कर्तुं पादाभिवन्दनम् ॥४॥
तेऽन्योन्यसहवासोत्का अपि दूरीकृता मिथः ।
पारतन्त्र्याख्यमोहेन भगवद्-भक्ति-भक्तवत् ॥५॥
कारालयविमुक्तं चाप्यरिराजालयस्थितम् ।
पितरं स पुनर्मेने बन्दीकृतमिवान्यथा ॥६॥
यावद् विजापुरे वासः पितुरासीन्नियन्त्रितः ।
तावद्यवनसाम्राज्यग्रासे सोऽभून्नियन्त्रितः ॥७॥
ततो दुःशासनत्रस्तां याज्ञसेनीमिव प्रजाम् ।
संसान्त्वयितुमारेभे शिवो भीमपराक्रमः ॥८॥
लाक्षागृहनिभे राष्ट्रे म्लेच्छराज्याग्निदीपिते ।
निजबाहुबलेनैकः संररक्ष स्वबान्धवान् ॥९॥
द्यूतादिव्यसने मग्नं धर्मबन्धुजनं निजम् ।
कल्याणमतिरत्यन्तक्रोधेन निरभर्त्सयत् ॥१०॥
म्लेच्छकौरव्यजनितां स्वबन्धुजनदुर्दशाम् ।
पश्यन्निद्धमहामर्षः सदैव समरोत्सुकः ॥११॥
न्यायान्यायविदोऽप्याप्तान् भीष्मद्रोणादिसन्निभान् ।
उपाहसत् परायत्तान् अर्थदास्यपरायणान् ॥१२॥
निहत्य गिरिसञ्चारान् हिडिम्ब-बक-सन्निभान् ।
धनधान्यहरान् चौरान् स लोकर्द्धिमवर्धयत् ॥१३॥
अज्ञातवासरसिकश्छद्मदुर्भगवेशभाग् ।
अनुभावविशेषात्तु व्यस्मापयदनेकदा ॥१४॥
धर्ममूर्तिं तुकाराममुपास्यैकान्तभक्तितः ।
सत्तत्त्वबोधं शुश्राव देशकालोचितं ततः ॥१५॥
दृढमूलतयोन्मत्तान् कीचकानिव कीचकान् ।
उत्पाट्याकृतनिर्बाधां पाञ्चालीमिव सत्कृषिम् ॥१६॥

Scanned by CamScanner

गोरक्षणेऽतिदक्षोऽसौ गोघातग्रहणोद्यतान् ।
शतं विहाय कार्याणि दण्डयामास सत्वरम् ।।१७।।
कुरुवंशमहारण्यसम्भवानधमानिव ।
हठादुन्मूल्य दुर्वृक्षान् प्रावर्तयत सत्पथान् ।।१८।।
सतीदेहपरामर्शमहापातकपाप्मनः ।
भुजं दुःशासनस्येव स्वकीयस्याप्यखण्डयत् ।।१९।।
दुर्योधनोरुसंभेद्यं विनिष्पेष्य शिलोच्चयम् ।
स्वराज्यविजयाध्वानं निष्कण्टकमिवाकरोत् ।।२०।।
रिपुदौरात्म्यसन्तप्तोऽप्यात्मन्यात्मानमाकुलम् ।
विकर्मणः स संयेमे धर्ममेकं प्रमाणयन् ।।२१।।
तनूभूताः प्रवेगाश्च विविधाः पर्वतापगाः ।
आकाङ्क्षा इव पाञ्चाल्या नियम्य समवर्धयत् ।।२२।।
अथ वार्ताहरः कश्चिद् दुःखवार्तां न्यवेदयत् ।
यदसौ श्लाघ्यसम्बन्धी महादाजिर्दिवं गतः ।।२३।।
गोविन्द इव नन्देन येनापदि सुरक्षितः ।
सुहृत्पुत्रः शिवः प्रेम्णा व्रजतुल्ये पुरन्दरे ।।२४।।
चत्वारस्तनयास्तस्य कलिना लोभरूपिणा ।
विरोधभावमापन्ना वर्णा इव परस्परम् ।।२५।।
तं तेषां धर्मबन्धूनां कलहं स्वार्थमूलकम् ।
न विषेहे शिवो धीमान् स्वजनैक्यप्रियो हि सः ।।२६।।
बहुशोऽप्युपदिष्टास्ते विवेकं नैव भेजिरे ।
रसायनं भिषग्दत्तमासन्नमरणा इव ।।२७।।
हितोपदेशविमुखांस्तानाप्तानपि दुर्धरान् ।
निजग्राह स राजर्षिर्विकारानिव संयमी ।।२८।।
ते तु दण्डप्रयोगेण सहसार्जवमागताः ।
दुर्मतीनां प्रबोधे हि दण्ड एव महान् गुरुः ।।२९।।
ततः पुरन्दरे दुर्गे रिपुमर्मविदारणः ।
वीरो नेताजिरायुक्तः कोदण्ड इव सायकः ।।३०।।
तद्दुर्गमतमं दुर्गं नेताजिसमधिष्ठितम् ।
दुर्धर्षमरिभिर्मेने ससिंहमिव काननम् ।।३१।।
जयावलीवनव्याघ्रश्चन्द्ररावाभिधस्तदा ।
शिवोपकारं विस्मृत्य मदेनान्ध इवाभवत् ।।३२।।
म्लेच्छाधिपमनादृत्य यः शिवेनाधिरोपितः ।
सुग्रीव इव रामेण वैभवं मदकारणम् ।।३३।।

Scanned by CamScanner

दुर्मन्त्रिणः कुमन्त्रेण विनष्टालिप्टधीरसौ ।
अलङ्घ्यां नीतिमर्यादामप्यक्राम्यदनेकदा ॥३४॥
नैवालज्जत चाहर्तुं स्वकीयानामपि श्रियम् ।
यथाऽसौ वानराधीशो भ्रात्रीयामपि हि स्त्रियम् ॥३५॥
संररक्षाधिपत्ये स्वे वनिताशीलहारिणः ।
असुरानिव दण्डार्हान् दशग्रीव इवोन्मदः ॥३६॥
जघान धनलोभान्धो धनमात्रजिहीर्षया ।
ऋजूननपराधांश्च प्रतिवेशिजनानपि ॥३७॥
शिवं स्वधर्मसाम्राज्य-संस्थापनदृढव्रतम् ।
दिद्विषे म्लेच्छसाम्राज्यदास्यलम्पटमानसः ॥३८॥
दण्डनीयापराधस्य तस्यात्मीयतया शिवः ।
औद्धत्यं शिशुपालस्य श्रीकृष्ण इव चक्षमे ॥३९॥
स्वातन्त्र्यराजसूयेष्टौ बाधमानमवेक्ष्य तम् ।
व्यापादयितुमुत्तस्थौ चमूचक्रधरः शिवः ॥४०॥
उचिताक्षरसन्दृब्धं पत्रं सम्प्रेष्य बोधितः ।
दुरहंकारमत्तोऽसौ चुक्रोध हितबोधिने ॥४१॥
हितोपदेशवैमुख्यं तस्यावेक्ष्य शिवस्तदा ।
आचक्राम दुराक्रम्यां लङ्कामिव जयावलीम् ॥४२॥
चपला कपिसेनेव शिवराजचमूरसौ ।
विदध्वंसे ससेनां तां शात्रवीं विपिनस्थलीम् ॥४३॥
ध्वस्ते दुर्गे मृतेऽमात्ये सैन्ये चापि पलायिते ।
प्रययौ रायरीदुर्गं चन्द्ररावो जिजीविषुः ॥४४॥
तमन्वधावत्तत्रापि प्रविलीनं शिवः स्वयम् ।
इन्द्रासनाश्रितं नागं सर्पसत्रार्षमन्त्रवत् ॥४५॥
तन्त्रावापविदा रुद्धो भुजङ्ग इव मण्डले ।
शिवेन कुण्ठितश्चासौ सहसा वशमागतः ॥४६॥
पूर्वं कृतापराधोऽपि शिवेन न स दण्डितः ।
क्षाम्यत्यरातिं प्रायेण निग्रहानुग्रहक्षमः ॥४७॥
निगृहीतोऽपि मूढोऽसावुपजातमचीकरत् ।
शिवराजारिभिः सार्धं स्वविनाशाय केवलम् ॥४८॥
तं रोगमिव दुस्साध्यं स्वराज्यरिपुमान्तरम् ।
शस्त्रशल्यप्रयोगेण स निराकुरुतान्ततः ॥४९॥
प्रमादमोहौ तमसस्तथारेस्तस्य पुत्रकौ ।
जघान सत्त्वशीलोऽसौ स्वातन्त्र्यश्रेयसे शिवः ॥५०॥

Scanned by CamScanner

मोहितान्वयसम्भूतः सम्भाजिरिति विश्रुतः ।
भ्राता विमातुरौद्धत्यं कृतवाञ्चन्द्रराववत् ।।५१।।
सैव लोभान्धता सैव न्यायोच्छृङ्खलता तथा ।
दास्याभिमुखता तस्य शिवराजमतापयत् ।।५२।।
अनीतिपरमाचारं न क्षाम्यन्ति गुरोरपि ।
नीतिधर्मप्रणेतारः किं पुनर्मातुलस्य च ।।५३।।
चरितं वीरकृष्णस्य संस्मरन् मातुलं प्रति ।
तत्पथे पदमाधातुं शिवराजः समुद्यतः ।।५४।।
प्रविश्य मातुलावासमकस्मादेव सत्वरम् ।
स्वायत्तमकरोत् सर्वं तदीयं यच्च किञ्चन ।।५५।।
तममर्षज्वलच्चित्तं विरुन्धानं च मातुलम् ।
निग्राह्य प्रेषयामास विमातुः सविधे द्रुतम् ।।५६।।
एवंभूतान् दुराराध्यान् स्वीयानप्यरिसन्निभान् ।
बलादुन्मूल्य बलवान् सोऽभवत् बलवत्तरः ।।२७।।
अधीना चन्द्ररावे ये ये चासन् मातुले तथा ।
तेषु सह्याद्रिदुर्गेषु विरेजे भगवद्ध्वजः ।।५८।।
उद्यन्मार्तण्डसंकाशास्ते स्वातन्त्र्यध्वजाः शुभाः ।
सह्याद्रिमभितः सर्वं दास्यध्वान्तमपाहरन् ।।५९।।
दिल्लीपतिबृहत्कोशकारासु चिरकुण्ठिता ।
व्याकुलेव विमुक्त्यर्थं लक्ष्मीः प्रकृतिचञ्चला ।।६०।।
शिवराजं महावीरं सर्वबन्धनमोचनम् ।
चारवार्तामुखेनेव साचख्यौ स्वमनोव्यथाम् ।।६१।।
स हि लक्ष्मीप्रियो लक्ष्मीं वैदेहीमिव बन्धनात् ।
विमोचयितुमुद्युक्तो रघुवीरसमः शिवः ।।६२।।
दिल्लीन्द्रेण महाराष्ट्रे धनलक्ष्मीर्न्यधीयत ।
गूढं यत्र पुरे तत्र स सेनानुगतो गतः ।।६३।।
प्रसुप्तसैनिकं दुर्गं प्रविश्याहत्य रक्षकान् ।
बृहत्कोशविनिर्बद्धां धनलक्ष्मीममोचयत् ।।६४।।
म्लेच्छाधिपत्यपङ्कोत्थपद्मकोशाद् विनिसृता ।
शिवराजकरस्पृष्टा श्रीः पावित्र्यमिवान्वभूत् ।।६५।।
सिन्धुसागरतीरस्थान् रिपुनिघ्नान् सुदुर्जयान् ।
जेतुं दुर्गान् सुहृद्वीरो रघुनाथो विसर्जितः ।।६६।।
सुवर्ण-लोह-विजय-प्रबलाद्यभिधानसौ ।
पञ्चाशदधिकान् दुर्गान् पञ्चमासान्तरेऽजयत् ।।६७।।

Scanned by CamScanner

देशे देशे तटाघातोत्थितैर्मेदुरगर्जितैः ।
शिवराजजयोदन्तमब्धिराह दिने दिने ॥६८॥
घननीलाम्बुधौ नौकादण्डाग्रेषु विरेजिरे ।
चिरेणान्तःप्रवालाभाः स्वातन्त्र्यविजयध्वजाः ॥६९॥
स्फुरन्ती ध्वजमालासावरुणा वरुणालये ।
रेजे कुङ्कुमरेखेव लक्ष्मीभालाङ्किता शुभा ॥७०॥
प्रसर्पत्-प्रतिबिम्बेन ध्वजस्यारुणरोचिषा ।
अङ्के लुठन्निवारेजे महाब्धेर्वडवानलः ॥७१॥
ध्वजारुणारुणाभाभिर्हरितोऽप्यरुणीकृताः ।
रवङ्गन्तोऽब्धेस्तरङ्गास्ते तुरङ्गा इव भास्वतः ॥७२॥
प्रतिबिम्बानि धावन्ति ध्वजानामधिसागरम् ।
जङ्गमानि प्रवालानां द्विपानीव विरेजिरे ॥७३॥
पश्चिमार्णवतीरस्थाः पाश्चात्यास्ते जलेचराः ।
रत्नकोशानदुस्तस्मै रत्नाकरविलुण्ठितान् ॥७४॥
रत्नकोशमयी नूनं लक्ष्मीः सागरकन्यका ।
विष्णोर्नवावतारस्य शिवस्य पदमाश्रयत् ॥७५॥
उडुपस्थितमाधृत्य नररत्नं शिवाभिधम् ।
अब्धी रत्नाकरोपाधिं मेनेऽन्वर्थं चिरादिव ॥७६॥
सिन्धुदुर्गोच्चशिखरे तस्थिवांसं शिवप्रभुम् ।
आलिङ्गितुमिवाधावत् व्यायतोर्मिकरोऽम्बुधिः ॥७७॥
आत्मजाता लसन्मुक्ताः शिवोष्णीशाग्रगुम्फिताः ।
पश्यन् रत्नाकरः फेनैर्जहासेव मुहुर्मुदा ॥८८॥
त्वरमाणा लहर्योऽब्धौ शिवराजं दिदृक्षवः ।
समुत्थिता इवाराजन् सोत्कण्ठा जलदेवताः ॥७९॥
रिपुवशंगतमेवमहर्दिनं रजतरत्नसुवर्णनिधिं तथा ।
गिरिमहोदधिदुर्गमसौ जयन् ध्रुवमजय्यतमो हि शिवोऽभवत् ॥८०॥

इति श्रीधर-भास्कर-वर्णेकर-विरचिते श्रीशिवराज्योदये महाकाव्ये
षोडशः सर्गः समाप्तः ॥ ( शुक्रवासरे २१-८-५९ ख्रिस्ताब्दे )

Scanned by CamScanner

# श्रीशिवराज्योदये महाकाव्ये सप्तदशः सर्गः ॥

एवमाक्रमणवृद्धवैभवं दुर्गसम्पदतिमात्रदुर्जयम् ।
शाहसूनुमवगम्य शात्रवः प्राज्वलन्निव विजापुरस्थिताः ॥१॥
म्लेच्छशासनधुरे स्थिताऽङ्गना कापि राजजननीव मानिता ।
प्रत्यहं शिवजयैकवार्तया मन्यते स्म निजवार्तमाहतम् ॥२॥
निष्ठुराचरणधिक्कृताऽसुरा सा प्रवृत्तिततिमन्वहं गृहे ।
साममन्यत पुरः समागतां पूर्वपातकपिशाचिकामिव ॥३॥
सा स्वभावभृशकोपनाऽऽसने संस्थिताऽपि शुकपिच्छनिर्मिते ।
स्थापितामवगमत्स्वकां तनुं तीव्रकण्टकमये महीतले ॥४॥
नर्तकीचरणपातशिञ्जितं गायकीमधुरकण्ठकूजितम् ।
सा नटीनटविटादिभाषितं दिद्विषे सुभगमप्यसह्यवत् ॥५॥
भर्तृपिण्डपरिपुष्टविग्रहान् स्वर्णरत्नधनदानमानितान् ।
वीक्ष्य कांश्चिदधिकारिणो जनान् धिक्चकार कटुशब्दताडनैः ॥६॥
आसुरप्रकृतिरङ्गनाऽप्यसौ संदिधक्षुरिव तं जिजात्मजम् ।
सन्ततस्मरणचिन्तनादिभिः क्रोधपावकमदीपयत् सदा ॥७॥
यामिनीषु शयनेऽतिकोमले बर्हसद्व्यजनवीजिताऽनिशम् ।
अन्तरिद्धतमकोपपावका साऽन्वभूत् खलु चिताधिरोहणम् ॥८॥
स्वप्नलब्धममुमात्मवैरिणं राक्षसीव निजघान सा स्वयम् ।
उत्क्वथत्सविषतैलवर्षणैः प्रस्फुरत्क्रकचभल्लताडनैः ॥९॥
घूकसूकरविरावमप्यसौ नाशिवं क्वचिदभावयत् तथा ।
अर्थसङ्गतमपि स्ववैरिणः संश्रुतं हि शिवनाम तद् यथा ॥१०॥
सा विवृद्धदुरमर्षतापिता वीक्ष्य शत्रुपितरं नृपालये ।
राज्यमन्त्रिपदगौरवान्वितं श्रीशहाजिमवदत् कदाचन ॥११॥
मन्त्रिवर्य किमु ते वदाम्यहं राज्यतन्त्रमधिकृत्य साम्प्रतम् ।
सर्वमेव विदितं भवादृशां यद् विवक्षति मनो ममातुरम् ॥१२॥
मत्पतिप्रणयसख्यभाजनं त्वादृशो न खलु कोऽपि दृश्यते ।
यत्र दुर्धरतमा निजव्यथा कथ्यते हृदयमर्मभित्वरी ॥१३॥
राज्यमेतदिह नो भवादृशैः हिन्दुभिर्यवनराजसङ्गतैः ।
अर्जितं च परिरक्षितं तथा वर्धितं चिरमवाच्यभारते ॥१४॥
आनुवंशिकतयाऽधिकारिणो हिन्दवोऽपरिमिता भवादृशाः ।
शासनेऽत्र विभवं हि भेजिरे दुर्लभं यदितरत्र सर्वथा ॥१५॥

Scanned by CamScanner

लक्ष्मभिर्नृपतिधारणोचितैः चामरादिभिरसंख्यहिन्दवः ।
अस्मदीय इह राज्यशासने धर्मबान्धववदेव मानिताः ॥१६॥
यद् भवान् भजति राजसंज्ञितं लोकदुर्लभमुपाधिमुत्तमम् ।
तज्जगद्गुरुविजापुराधिपस्नेह एव भवति स्फुटो ध्रुवम् ॥१७॥
सन्ततोपकृतयो हि नोऽखिला वन्ध्यतामिव भजन्ति साम्प्रतम् ।
हन्त हन्त यदसाम्प्रतं किमप्याचरत्यविनयः स ते सुतः ॥१८॥
आत्मनीनमिदमेव शासनं मानयन्निति यथा भवांश्चिरम् ।
तद्धिताय यतते सुविक्रमः किं तथैव न स पुत्रकस्तव ॥१९॥
आसमुद्रतटतः सुदुर्गमाः निर्जिता निखिलदुर्गभूमयः ।
कोशजातमपि लुण्ठितं क्वचित् किं नु सम्मतमिदं भवादृशाम् ॥२०॥
वेत्सि मृत्युवशवर्तिनोदितं स्वामिना तव यदात्मकाङ्क्षितम् ।
विस्मृतं किमधुना निजात्मजप्रीतिमोहितधिया त्वयाऽपि तत् ॥२१॥
स्वामिकार्यपरिपूरणोद्यताः सन्त आत्मगुरुपुत्रबान्धवान् ।
विप्रतीपचरितात् कथञ्चन नैव नैव गणयन्ति कानपि ॥२२॥
राजसेवकजनोचितं न ते हिन्दवो जहति धर्ममुत्तमम् ।
आत्मदेहकुलसंक्षयेऽप्यहो विस्मृता किमिति सा परम्परा ॥२३॥
त्वत्सुतस्य चरितं मदोद्धतं दीर्घकालमवहेलितं मया ।
राज्यकण्टकविमर्दनोद्यतां विद्धि मां खरकुठारसोदरीम् ॥२४॥
यन्मदीयमवगूहितं चिरात् क्रूरकर्म तव तन्निवेदये ।
वाहिनीपतिरसौ मुहम्मदो मारितः खलु मयैव निर्दयम् ॥२५॥
ये च केचन तथेतरे पुनर्दुर्जना हि बहलोलसन्निभाः ।
निर्हता इह विजापुरे पुरा विद्धि तत्खलु ममैव चेष्टितम् ॥२६॥
हन्त सन्ति शतशः सहस्रशो दन्तिनश्च तुरगाः रणोत्सुकाः ।
क्रीतदासवदसंख्यपत्तयो नाबलां दलबलादवेहि माम् ॥२७॥
देहलीपतिमपीद्धशासनं शक्तिरस्ति मम जेतुमञ्जसा ।
किं ब्रवीमि तव पुत्रकं पुनर् वन्यमर्कटपरीतमेककम् ॥२८॥
यः स च प्रथमपुत्रकस्तव सङ्गरे कपटमृत्युमाप्तवान् ।
स्पष्टमद्य तव वच्मि निर्भयं प्रेरणा मम हि तत्र कारणम् ॥२९॥
पुत्रवानसि तथापि साम्प्रतमेककेन कुसुतेन येन च ।
सोऽपि मत्प्रकुपितैकपात्रतां याति चेदसुत एव नङ्क्षसि ॥३०॥
ज्ञायते तव कलत्रमुत्तमं पुत्रनिःश्वसितमात्रजीवितम् ।
वीक्ष्य मत्प्रकुपिताहतं सुतं छिन्नभिन्नहृदयं भविष्यति ॥३१॥

Scanned by CamScanner

तावकीनमपि वित्तजीवितं मामकीनमवलम्बते मतम् ।
तद् विमर्शपथमात्मनो धियं पुत्रमोहविषमां प्रचोदय ॥३२॥
दुर्वचोभिरनभिस्फुटो निजः क्रोध इत्यनतितुष्टधीरिव ।
भूरिपानपरिसञ्चितं हृदि धूम्रमावमदसौ मुहुर्मुखात् ॥३३॥
इत्थमुग्रतमभावदुःसहं म्लेच्छभूपतिविमातृभाषितम् ।
श्रीशिवस्य गुरुणा तदाददे कालकूटमिव देहदाहकम् ॥३४॥
विक्रियां स्वमनसः प्रशामयन् सुस्मितं च पुनरुक्ततां नयन् ।
कृत्रिमप्रियतरं स कालवित् भाषितुं समुचितं प्रचक्रमे ॥३५॥
राजमातरुदितं तवोज्ज्वलं स्वीयराज्यभविकैकदीपितम् ।
स्पर्शतः खलु मदीयमादहत् किल्मिषं हृदयगह्वरोदितम् ॥३६॥
राजसेवकजनोचितस्त्वया मादृशां सुविहितोऽभ्यधायि यः ।
धर्म एव उचितः स सर्वथा सर्वकिङ्करगणस्य भूतले ॥३७॥
न स्फुरन्ति सहसा सुभाषितान्युत्कटानुभवहीनसंविदः ।
त्वद्वचस्सु सुपरिस्फुटाऽधुना ह्युत्कटानुभवगाढतैव ते ॥३८॥
मत्सखस्य तव भर्तुरीहितं देहपातसमये निवेदितम् ।
विस्मरेत् कथमयं जनोऽञ्जसा तत्कृतोपकृतिसन्तति स्मरन् ॥३९॥
राज्यदास्यनिरतो ह्ययं जनः पुत्रदारमपि यौवनेऽजहत् ।
स्वामिशब्दपरिपूर्तयेऽकरोत् सौख्यमात्मजनुषस्तृणास्पदम् ॥४०॥
धीमता स्वगृहरन्ध्रमात्मना न प्रकाश्यमिति नीतिरुच्यते ।
तद् विरुद्धमधुनाऽऽस्मवत्तया त्वत्पुरः किमपि वक्तुमुत्सहे ॥४१॥
वेत्सि हिन्दुवनिता पतिं प्रियं दिव्यदैवतधियाऽर्चयन्ति ताः ।
हन्त किन्तु गृहिणी ममाप्रियं मां विरोद्धुमिव वर्तते सदा ॥४२॥
आत्मनोऽपि सहधर्मचारिणी विप्रियं व्यवहरत्यनारतम् ।
एवमन्यजनसम्मुखं वदन् ब्रूहि कः खलु न लज्जते पुमान् ॥४३॥
तन्मया निजकुटुम्बजीवनात् सा सरोषमचिरात् पृथक् कृता ।
पुत्रमेककममुं कुलालितं वर्तयत्यसदृशं दुराग्रहात् ॥४४॥
वन्यपर्वतचरैश्चरत्यसौ दुष्टतापसवशंगतस्तथा ।
नेहते सह मया स भाषितुं कं दुनोति न सुतो विरोधकः ॥४५॥
मूढधीरपि च देहलीपतेर्दास्यमिच्छति कुमित्रबोधितः ।
मद्विरुद्धमिव वर्तितुं सदा यत्नवान् स खलु किंसुतो मम ॥४॥
यच्चिरं बत मयान्वभूयत बन्धनं स्वसुहृदोऽपि शासने ।
वेद्मि पुत्रकुचरित्रतः पृथक् तत्र हेतुरपरो न कश्चन ॥४७॥

आत्मनो दलबलं त्वयोदितं तन्न वेत्ति खलु कोऽत्र भूतले ।
ख्यापितं यदवदारिताङ्गकैः शत्रुभिः समरतः पलायितैः ॥४८॥

पुत्रदोषविहितं पितुर्भवेद् दण्डनं यदपि राजशासने ।
पात्रमस्मि खलु तस्य सर्वथा ब्रूहि किं नु करवाणि साम्प्रतम् ॥४९॥

इत्थं प्रकोपभृशलोहितलोचनां ताम्
आवेद्य भूपतिविमातरमत्यसत्यम् ।
मन्दीचकार रुषमीषदिव प्रयुक्त्या
काले मृषा वचनमाहुरगर्हणीयम् ॥५०॥

सपदि स नयविच्चरं स्वमेकं
शिवविपदं परिभाव्यभाविनीं ताम् ।
गदितुमनुचितार्यातिं प्रवृत्तिं
नयविज्ञे विससर्ज रामदासे ॥५१॥

**॥ इति श्रीशिवराज्योदये महाकाव्ये** सप्तदशः **सर्गः** ॥
(समाप्तोऽयं सर्गः भाद्रपदे सुदि १ तिथौ ३-९-५९ ख्रिस्ताब्दे )

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये अष्टादशः सर्गः ॥

(सच्चित्प्रमोदमयमात्मनि जृम्भमाणमात्मानुभूतिविषयं विषयातिरिक्तम्।
सत्साहितीमुकुरबिम्बितमुज्ज्वलाभं सारस्वतं किमपि तत्त्वमुदेतु चित्ते॥)

अथापरेद्युर्दृढगूढरोषा विजापुरेशस्य सपत्नमाता ।
सर्वानकस्मादधिकारिवर्यान् आकारयामास सभालयान्तः ॥१॥

अलङ्घ्यमादेशमवाप्य तस्या नृपालमातुर्भृशकोपनायाः ।
शतं स्वकार्याणि विहाय काले प्रपेदिरे सर्वत एव सर्वे ॥२॥

आकस्मिकामन्त्रणमूलभूतं प्रयोजनं ज्ञातुमशक्नुवानाः ।
स्मृत्वाऽधमत्वं क्षितिभृद्विमातुः शशङ्किरे दुर्गतिमापतन्तीम् ॥३॥

हृदि स्थितां भीतिमपह्नुवानाः स्मितेन हास्येन च नर्मवाचा ।
अन्योन्यमैक्षन्त निगूढशङ्का-चलाचलापाङ्गकटाक्षपातैः ॥४॥

केऽप्यस्मरन् राजविमातृकोपतनूनपाद्दग्धतनूञ्जनान् स्वान् ।
तथैव संकल्प्य निजामवस्थां रोमाञ्चितं स्वाङ्गमिवाजुगूहुः ॥५॥

पप्रच्छुरन्ये निकटस्थितानां कुटुम्बवार्तान्यसकृत् सशङ्कम् ।
अभद्रशङ्काकुलमानसानां जिज्ञासुता वृद्धिमिवेत्यकस्मात् ॥६॥

राजानमायान्तमवेत्य दूरात् बन्दीरितोच्चैर्जयजीवघोषात् ।
प्रसन्नमालोक्य तदीयमास्यमाश्वासयन्नात्मनि चात्मनैव ॥७॥

यावत् स राजाऽसनमभ्युपैति तिरस्करिण्यन्तरुपैच्च तावत् ।
सम्भ्रान्तदासीजनसम्भ्रमेण संसूचिताभ्यागमना विमाता ॥८॥

राजादरार्थं द्रुतमुत्थितानां सदःस्थितानां श्रुतिदृष्टिशक्तिः ।
आच्छादनीं प्रत्यतिसम्भ्रमेण केन्द्रीबभूवेव सभीतिशङ्कम् ॥९॥

स्वमासनं प्राप्य नरेशमाता रूक्षस्वरेणाह निषीदतेति ।
तत्कालमेवाखिलसभ्यवर्गो यथास्थितं संस्थितवान् विनम्रः ॥१०॥

सिंहासनेऽस्थात् स नराधिपोऽपि विमूढवत् सभ्यजनेन साकम् ।
कर्तव्यमात्मोचितमप्रजानन्नितस्ततः शून्यमना ददर्श ॥११॥

तदा श्मशानोपवनप्रशान्ते सभालये घस्मरवायसीव ।
कठोररूक्षस्वरमाश्रयन्ती क्रोधप्रदीप्ता यवनी जगर्ज ॥१२॥

धिगस्तु वः शासनपिण्डपुष्टाः साम्राज्यवृक्षाश्रितदुष्टकीटाः ।
सिताऽसितश्मश्रुमलीमसानि न द्रष्टुमिच्छामि भवन्मुखानि ॥१३॥

नपुंसकाः पुंस्करभूषणानि शस्त्राणि युष्मत्कटिलम्बितानि ।
वैरिप्रहारेष्वलसान्यमूनि तुदन्ति चित्तं मम दुःखतप्तम् ॥१४॥

Scanned by CamScanner

धिक्कारमर्हन्ति न किं भवन्तो न्यक्कारितैः षण्ढजनैरपीह ।
स्वजीवितं यत् पुरुषार्थवन्ध्यम् आहारनिद्रानिरतं नयन्ति ॥१५॥
वरं मृतान्येव कलेवराणि युष्मादृशां मांसवसाभृतानि ।
जायेत यैस्तृप्तिरतिक्षुधार्तश्वजम्बुकानां विपिनेचराणाम् ॥१६॥
महार्हवस्त्राभरणानि देहान्येतानि यान्यत्र विलोकयामि ।
न निर्विशेषाणि च तानि मन्ये चैत्याहिताप्राणकलेवरेभ्यः ॥१७॥
किमन्धवल्लोचनसम्पुटानि निमीलितान्यत्र सभालयेऽपि ।
प्रत्यक्षमीक्षध्वमिदं पुरस्तात् सौवर्णताम्बूलयुतं सुपात्रम् ॥१८॥
स एक एवार्हति वीरवर्यः स्प्रष्टुं सुताम्बूलमिदं मदीयम् ।
जेतुं ग्रहीतुं सहसा निहन्तुं यस्तं शिवाजिं नितरां समर्थः ॥१९॥
तन्नामधेयं श्रवणप्रविष्टं यदा तदैवाहतधैर्यबन्धाः ।
उत्क्रामिणोऽसूनिव सन्निरोद्धुं तेऽकुण्ठयन् निःश्वसनं भयार्ताः ॥२०॥
निरुद्धनिःश्वासरवप्रशान्ते सभालये कालकलान्तरेण ।
विमुक्तदीर्घश्वसितध्वनिश्च प्रतिध्वनिस्फीततरो बभूव ॥२१॥
फतेहखानः स च पृष्ठवक्षःशिरःकरेषु व्रणमार्द्रकल्पम् ।
संस्पृश्य मन्दं व्यथितान्तरात्मा सीत्कारमुच्चैरकरोदकस्मात् ॥२२॥
चकम्पिरे केचन तत्र वृद्धाः सुहृत्सुतभ्रातृगणान् स्मरन्तः ।
निर्विद्धकायांश्च शिवाजिसैन्यशस्त्रप्रहारैः प्रथमाजि-काले ॥२३॥
प्रस्विन्नकायार्द्रसमस्तवस्त्राः केचित् किमप्यात्ममतं प्रवक्तुम् ।
समीहमाना अपि शुष्ककण्ठाः वाचालतां मौनवतीमकुर्वन् ॥२४॥
अधःकृतं वक्त्रमनुन्नयन्तश्चाकेकरां दृष्टिमपाङ्गलोलाम् ।
केचिद् भयार्ता विदधुस्तदानीं पार्श्वस्थितानीक्षितुमात्मतुल्यान् ॥२५॥
शिवाजिनामश्रवणातिभीते सभालये तत्र चिरप्रशान्ते ।
समुत्थितः कश्चन दीर्घदेहो भ्रूश्मश्रुरोमोग्रतरास्यभागः ॥२६॥
असौ महाद्वारविशालवक्षाः सानून्नतस्कन्धयुगोऽतिरौद्रः ।
आलानबाहुः करिकन्धरश्च वटप्रकाण्डोरुरुदग्रतेजाः ॥२७॥
क्रूरग्रहो दीप्तविलोलनेत्रः करालदन्तावलिरुन्नसश्च ।
उच्छूनकल्पोन्नतगण्डपिण्डो निजाट्टहासेन बिभेद शान्तिम् ॥२८॥
द्विपेन्द्रगण्डस्थलपुष्टमुष्टिं भुजं स्वमुद्यम्य बृहद्गदाभम् ।
आहत्य वेगाच्चरणं प्रचण्डं सभालयं कम्पितवान् समस्तम् ॥२९॥
तेनाहतम्लानिरसौ समाजः यावत् तमाश्चर्यवदीक्षते स्म ।
तावत् स भूपालविमातरं ताम् उल्लासयन्तीं गिरमुज्जगार ॥३०॥
धिगस्तु शान्तिं च धिगस्तु मौनं धिगाननान्यत्र विनामितानि ।
धिक्तानि चित्तानि भवादृशानां शिवाजिनामश्रुतिभीहतानाम् ॥३१॥

क्वाऽसौ प्रभावोऽस्मदुदग्रशक्तेः क्व सम्भवोऽयं च भवत्सु भीतेः ।
मृगाधिराजस्य महागुहायां मृगी कथं प्राविशदप्रगल्भा ॥३२॥
तेजः किमस्तं गतमस्मदीयं यत् संस्मृतं निर्दहति स्म हिन्दून् ।
गर्भस्थितानप्यथवाऽतियूनः सिंहासनस्थान् नरवीरवर्यान् ॥३३॥
दीन् दीन् इति प्रोद्धतवीरवर्यैरुद्घोषिताऽसौ रणगर्जना नः ।
प्रकम्पयामास समस्तशैलगुहाशयानुन्मदसिंहसंघान् ॥३४॥
सैवास्मदीया रणगर्जनोग्रा तैरप्युदीर्णा च महम्मदीयैः ।
सह्याद्रिगूढान् कपिमूषकादीन् न भापयत्यद्य विचित्रमेतत् ॥३५॥
आबाल्यतस्तस्य मदोद्धतस्य शहाजिपुत्रस्य हि दुश्चरित्रम् ।
श्रुणोमि पश्यामि न विस्मरामि यन्मूलतोऽस्मत्प्रतिकूलमेव ॥३६॥
न प्रातिकूल्यं परमाणुमानं माहम्मदीयाः क्वचनासहन्त ।
उपेक्षमाणो हि रिपुस्फुलिङ्गो दावायते कालकलान्तरेण ॥३७॥
व्याहन्यमाने क्रमशः स्वराज्ये क्षान्तो यदद्यावधि दुष्टशत्रुः ।
मन्ये तदस्माभिरनादृतोऽसौ धिक्कारितो वा निजधर्म एव ॥३८॥
उपात्तखड्गेन मयाऽद्ययावत् क्षणं न सोढः क्वचनाल्पशत्रुः ।
प्रतीक्षमाणेन परंत्विदानीं मन्ये स्वधर्मः स्वयमाहतोऽसौ ॥३९॥
सहस्रशः काफिरदेवमूर्तीन् मृद्धातुपाषाणमयीर्विनाश्य ।
श्लाघ्यं सदोपाधिमहं बिभर्मि मूर्तिप्रभेत्तेति दृढाभिमानम् ॥४०॥
माहम्मदीयस्य च धेनुहत्यां ग्रन्थो न निर्वक्ति परं करोमि ।
मर्माणि भेत्तुं खलु काफिराणां गोपूजकानामधमाधमानाम् ॥४१॥
प्रस्कन्दितुं हिन्दुजनाभिमानं विक्रीतवानस्मि च हिन्दवीयाः ।
ऊढा अनूढा युवतीरगण्याः पारेसमुद्रं विषयान्तरेषु ॥४२॥
तेषां च यावन्त्यपि मन्दिराणि मन्नेत्रशूलास्पदमीक्षितानि ।
दग्धानि भग्नानि च पाटितानि श्रद्धां तदीयामभिहन्तुमेव ॥४३॥
अतोऽफझुल्लस्य ममाभिधाऽपि कल्पान्तकल्पा खलु काफिराणाम् ।
तन्निश्चितं विद्धि महीशमातरं द्रुतं त्वदीयां सफलां मनीषाम् ॥४४॥
जिता मया द्राविडनायकास्ते काञ्चीपतिः कर्णपुराधिपश्च ।
श्रीरङ्गनामाङ्कितपट्टणेशो बद्नूरराजः स च वीरभद्रः ॥४५॥
पुरी स-काञ्ची मदुराभिधाना नारी सकाञ्चीव मनोभिरामा ।
मद्धस्तसंस्पर्शवशादवाप्नोद् विध्वंसवैक्लव्यमभूतपूर्वम् ॥४६॥
स चाम्बराख्यो निजशक्तिमत्तः स्वस्वामिनं प्रत्यपि धिक्चकार ।
मत्खड्भीतो निजपाणिपादं बद्ध्वा स्वयं मच्चरणाश्रितोऽभूत् ॥४७॥
पारेसमुद्रं निवसन् विदूरे लङ्कान्तरीपाधिपतिर्बलाढ्यः ।
उत्प्रेक्षमाणो मम शस्त्रपातम् आस्माकसाम्राज्यकरप्रदोऽभूत् ॥४८॥

Scanned by CamScanner

औरङ्गजेबः स विजापुरारिर् निर्बद्धकल्पो मम सैन्यपाशे ।
पलायितश्चेन्न रणात्तदानीं भूगर्तवासो नियतो हि तस्य ॥४९॥
त्वन्नेत्रसंकेतमवाप्य मातर् मयैव दुष्टस्य रिपोरमुष्य ।
पिता स नीचः पशुवन्निबद्धः प्रदर्शितश्चापि विजापुरेऽस्मिन् ॥५०॥
कर्णाटके सङ्गरसक्तचेताः यस्याग्रजोऽसौ निहतो मयैव ।
कथं शिवाजिं गिरिमूषकं तं न लीलया हन्तुमहं समर्थः ॥५१॥
क्रूरोत्तमोऽहं खरविक्रमोहं दुर्योधनः शत्रुविभीषणोऽहम् ।
मुष्टयैव निर्दालितमस्तकं तं बलिं शिवाजिं तव कल्पयामि ॥५२॥
दुर्दान्तगर्वादिति वाचमुक्त्वा स वीरमानी सदसि प्रशान्ते ।
सौवर्णताम्बूलकमुद्गृहीतुम् प्रकम्पयन् राजसभां चचाल ॥५३॥
समातृकं भूपमथो प्रणम्य ताम्बूलकं तद् द्रुतमुद्दधानः ।
चिक्षेप चक्षुः परितः सदर्पं धिक्कर्तुमद्धाऽखिलमन्त्रिवर्यान् ॥५४॥

पश्यन्त्यमुं प्रखरविक्रममेकवीरं
सा संजहर्ष यबनी दृढगूढरोषा ।
तेजोनिधिं ग्रसितुमुद्यतमन्तराले
स्वर्भानुमायतमुखं खलु सिंहिकेव ॥५५॥

अगणितमणिमौक्तिकाभिरामान्
शतहारान् प्रददावसावमुष्मै ।
नरपतिरपिरुत्प्रफुल्लचेता
निजनिस्त्रिंशममुं शिवं प्रहर्तुम् ॥५६॥

इति श्रीधर-भास्कर-वर्णेकर-विरचिते
श्रीशिवराज्योदये महाकाव्ये अष्टादशः सर्गः समाप्तः ॥

Scanned by CamScanner

# श्रीशिवराज्योदये महाकाव्ये एकोनविंशः सर्गः ॥

अथापराह्णमुख एव लोका विजापुरीयाः परितोऽत्यशृण्वन् ।
निर्ह्रादमास्कन्दनवाद्यजन्यं प्रगाढनिद्रासुखचौरभूतम् ॥१॥

आध्मातशृङ्गप्रभवान् सुदीर्घान् तारस्वरान् संपरिबृंहयन्तः ।
प्रताडितानां पणवानकानाम् अव्याहतं शुश्रुविरे निनादाः ॥२॥

ढक्काध्वनिः कर्णविदारणोग्रः क्षणे क्षणे श्रोत्रमभिप्रविष्टः ॥
अज्ञातनादान् बधिरानपि द्राक् संस्त्यायमानो व्यथयांचकार ॥३॥

तुरङ्गमा दूरमिवोत्तरन्तः स्तम्बेरमा मन्थरमुत्सरन्तः ।
क्रमेलकाश्चोद्धतमुत्क्रमन्तो लोकैरलोक्यन्त विभातकाले ॥४॥

तत्कारणं ज्ञातुमशक्नुवन्तो जिज्ञासमानास्तु परस्परं ते ।
पप्रच्छुराप्तान् किमिदं किमर्थम् अपि प्रतीकार उताक्रमोऽयम् ॥५॥

ततो विदाञ्चक्रुरमीक्षणेन शिवाजिमाक्रामितुमेकवीरम् ।
वीरोऽद्वितीयो ह्यफझुल्लनामा यातीत्यसंख्येयबलानुयातः ॥६॥

अट्टालिकायां नृपतेर्विमाता सन्तस्थुषी दृष्टवती सहर्षम् ।
वरूथिनीसम्भ्रमसंभवानि रजांसि धूम्रोच्चयधूसराणि ॥७॥

चराः शिवाजेश्चिरजागरूकाः पुरीमरीणां परितश्चरन्तः ।
दृष्ट्वा रजःस्तोममम‍ुं समन्तात् विजापुरं दग्धमकल्पयन्तः ॥८॥

उत्तुङ्गदण्डेषु हरित्पताकाः बृहद्वितानाश्च मरुद्विलोलाः ।
पशूनशेषांस्तृणपर्णभक्षान् पदे पदे नूनममोहयन्त ॥९॥

ततो जयोद्घोषपुरस्कृतोऽसौ तारस्वरं बन्दिभिरुक्तशौर्यः ।
सङ्ग्रामवादित्रमहानिनादकल्लोलराशीनिव गाहमानः ॥१०॥

अयःकिरीटी घनकञ्चुकी च धन्वी निषङ्गी त्सरुरम्यखड्गी ।
उत्तुङ्गभल्लो रणकर्ममल्लः संफुल्लगल्लो ददृशेऽफझुल्लः ॥११॥

प्रोत्साहयन् सैनिकवीरसंघान् प्रदर्शनेनेव निजोच्चमूर्तेः ।
जगर्ज भूयश्च विजापुरेशजयं जयाकाङ्क्षुरसौ प्रवीरः ॥१२॥

समग्रसाङ्ग्रामिकतूर्यनादातिशायिनी सा जयगर्जनाऽऽरात् ।
कुतूहलात् सौधमुपेयिवासं विजापुरेशं सुखयांबभूव ॥१३॥

तस्याफझुल्लस्य रणोत्सुकस्य पुरश्चरः कश्चन खिन्नमुद्रः ।
भयाकुलो दुःशकुनं बभाषे मृतो महाद्वारि गजस्तवेति ॥१४॥

स साट्टहासं निजगाद वीरश्चरं तमेवोपहसन्निवोच्चैः ।
विमूढ जानीहि न जातु विघ्ना अस्मादृशां दुःशकुनैर्घटन्ते ॥१५॥

Scanned by CamScanner

मृतेन कैंकेन गजेन हानिः पदे पदे चेद् गजका म्रियेरन् ।
पाषाणवद् भव्यवपूंषि तेषाम् आक्रम्य गच्छेयमहं रणाग्रे ॥१६॥
इत्येवमात्यन्तिकदर्पमत्तः प्रभूतसेनानुगतश्चचाल ।
समूलमुन्मूलयितुं स्वशक्त्या नवोदितं राज्यमदः शिवाजेः ॥१७॥
वेगादुपेतस्तुलजापुरं तत् प्राचीनपीठं तुलजाभवान्याः ।
भक्तार्तिविध्वंसधृतव्रतायाः शिवाजिसम्पूजितविग्रहायाः ॥१८॥
आज्ञापयामास तदैव सर्वान् आदेशवश्यान् पृतनाधुरीणान् ।
दृश्येत यद्दैवतमूर्तिजातम् अदृश्यतां तन्नयत प्रहारैः ॥ १९ ॥
अहं स्वयं तां तुलजाभवानीं मच्छत्रुपूज्येति विनाशयामि ।
येन प्रकृष्टोज्ज्वलतां भजेत सा मूर्तिभेत्तेति मदीयकीर्तिः ॥२०॥
इत्यूचिवानुद्धृतचण्डदण्डो दुधाव वेगात् तुलजाभवानीम् ।
पिशाचभूतो महिषासुरोऽसावात्मप्रहन्त्रीमिव हन्तुकामः ॥२१॥
सरोषदष्टाधरनिर्गलन्ति स्वशोणितान्येव हि लेलिहानः ।
निर्भर्त्सयन्नष्टसशस्त्रपाणिं तां देवतां दैत्यवदित्यवोचत् ॥२२॥
समग्रसामर्थ्यवतीत्यखण्डं त्वं काफिराणामसि पूजनीया ।
इस्लामधर्मानुचरत्वलब्धं पश्याद्य सामर्थ्यमिदं मदीयम् ॥२३॥
तवाष्टहस्तप्रधृतानि शस्त्राण्यष्टापि नष्टान्यवगच्छ सद्यः ।
मदुद्धृतैकद्रुघणोग्रघातैः महाद्रिनिष्पेषणशक्तिमद्भिः ॥२४॥
सिंहस्तवायं वहनास्पदं च विभाति मे कुक्कुरतुल्य एव ।
व्यात्ताननो मामवलोक्य मन्ये भियेव संक्रन्दति शक्तिहीनः ॥२५॥
सहस्व निर्घातमिमं प्रचण्डं यश्चूर्णसात् त्वामचिरात् करोति ।
यद्यस्ति शक्तिः प्रतिकर्तुमेनं तां द्रष्टुमिच्छत्यफझुल्ल एषः ॥२६॥
स्वच्छन्दमित्थं बहु गर्हयित्वा तां देवतां दुर्धरशक्तिमत्तः ।
संपिण्डितां भक्तिमिवात्मशत्रोः क्रोधातिरेकात् प्रजहार नीचः ॥२७॥
तथाप्यविश्रान्तमहाप्रकोपो निर्भग्नमूर्तेः पुरतो भवान्याः ।
तदीयवात्सल्यमयीमपापां धेनुं सवत्सां सहसा जघान ॥२८॥
इत्थं स तां हिन्दु-जनातिपूज्यां भित्त्वा भवानीं जननीं च हत्वा ।
प्रह्लादितो धार्मिकवर्यमानी विच्छेत्तुमैच्छद् बत पाण्डुरङ्गम् ॥२९॥
हस्त्यश्वपादातचमूपतींश्च बभाण रोषादिव रौद्रकण्ठः ।
झञ्झाप्रवेगेन वरूथिनीयं पुरः पुरं पण्ढरपूर्वमेतु ॥३०॥

स्वादेशमन्वग् स महातरस्वी सेनानुयातस्तुरगाधिरूढः ।
ययौ रजो-दुर्दिनहेतुभूतम् उद्धूनयन् धूमिलधूलिजालम् ॥३१॥
तच्चन्द्रभागातटसन्निविष्टं वैकुण्ठमूर्वीतलसङ्गभिन्नम् ।
श्रीविष्णुभक्तोत्तमपुण्यतीर्थं पुरं प्रपेदेऽनुपदं स पापः ॥३२॥
लत्ताप्रहारेण पदे पदे ते तत्रोन्मदा म्लेच्छखरा अभिन्दन् ।
मायाधृतासंख्यकलेवरस्य पाषाणमूर्तीन् परमेश्वरस्य ॥३३॥
हा लोकसंरक्षणकर्मकष्टान् नूनं कटिस्थापितदीर्घपाणि ।
तद्दैवतं हन्त तदा कथञ्चिल्लोकैररक्षि क्षणलब्धधैर्यैः ॥३४॥
विजापुराधीश्वरपक्षपाती परं रिपोराप्त इति प्रकोपात् ।
ततः स निंबालकराभिधं तं जग्राह कालायसशृङ्खलाभिः ॥३५॥
हिंस्रः स तं शत्रुकलत्रबन्धुं विहिंसितुं श्वापदघातमैच्छत् ।
उत्प्रेक्षमाणो मृगयाविनोदं ततोऽप्यरेराधिमकाण्डपातम् ॥३६॥
तच्चेष्टितान्येवमतीव घोराण्याकर्ण्य रात्रिन्दिवमाकुलोऽपि ।
धीरः शिवाजिर्न चचाल किञ्चित् सुनिश्चयात् स्वस्य न चापि दुर्गात् ॥
यदा यदैकैकममुष्य घोरं दुश्चेष्टितं स श्रुणुते स्म धीरः ।
तदा तदा तद्वधनिश्चयेऽसौ वज्रस्थिरोऽभूत् प्रबलः शिवाजिः ॥३८॥
विज्ञाय वीरो रणकर्मविज्ञो बलाबलं शात्रवमात्मनश्च ।
प्रभूतकोपोऽपि विमृश्यकारी कौटिल्यनीतिं दृढमाऽऽललम्बे ॥३९॥
कृष्णासरित्तीरगतं सुतीर्थक्षेत्रं प्रति प्राप्तममुं निशम्य ।
स्वराज्यसंरक्षणचिन्तनार्तो निमेषनिद्रामपि नो जगाहे ॥४०॥
अहर्निशं निश्चलधैर्यशाली स्वभक्तिभूतां तुलजाभवानीम् ।
ध्यायन् कदाचित् क्षणलब्धनिद्रः समक्षमेवैक्षत सुप्रसन्नाम् ॥४१॥
ज्योतिर्मयेनोज्ज्वलविग्रहेण विभ्राजमाना जगदम्बिका सा ।
वात्सल्यपीयूषमयेक्षणेन परामृशन्ती शिवमित्युवाच ॥४२॥
वत्स ! त्वदन्यो जगतीतलेऽस्मिन् न जातु जातो न जनिष्यते वा ।
मदेकनिष्ठः खलु धर्मवीरो यदेकसंस्थं हृदयं मदीयम् ॥४३॥
नराकृतीनां नवराक्षसाणां चिरातुरा शोणितमस्मि पातुम् ।
तृषं मदीयामपहर्तुमीशो वत्स त्वमेकः परमप्रियो मे ॥४४॥
जगन्निवासाऽपि निवासहीना चिरादभूवं बत हिन्दुदेशे ।
शत्रुञ्जयं यत्र न दिव्यतेजो न तत्र वर्ते न रमे कदापि ॥४५॥
किन्त्वद्य या खड्गलतां बिभर्षि दुःशत्रुविध्वंसपटीयसीं त्वम् ।
तत्रैव तेजांसि ममोत्स्फुरन्ति त्वदीयकीर्तिद्युतिभास्वराणि ॥४६॥

Scanned by CamScanner

अभ्येति यस्त्वामपहन्तुकामः प्रकाममत्तो महिषासुराभः ।
स सर्वनाशं सहसाभ्युपेतु त्वत्स्पर्शलेशादिति मे मनीषा ॥४७॥
उत्तिष्ठ तत् त्वं नरसिंह शीघ्रं युध्यस्व युध्यस्व पराक्रमेण ।
उरोविदारं नवदैत्यमेनं निहत्य विन्दस्व यशः श्रियं च ॥४८॥
साक्षात्कृतिं स्वप्नगतामितीमां समाधिकल्पां खलु सद्विकल्पाम् ।
स वीरयोगी ह्यनुभूय दिव्यां तस्थौ चिरं ध्याननिमीलिताक्षः ॥४९॥
तस्याविरासीन्मुखचन्द्रबिम्बे काचित् स्मितोद्दीप्तिरदृष्टपूर्वा ।
आकेकरे लोचनपद्मयुग्मे स्वानन्दजन्याम्बुलवप्रपातः ॥५०॥
स्वेदाम्बुसम्पूरितरोमकूपो रोमाञ्चसंफुल्लपवित्रगात्रः ।
शुचिस्मितोऽसौ शुशुभे शिवाजिरब्धेर्विनिर्यन्निव कल्पवृक्षः ॥५१॥
स व्युत्थितः स्वप्नसमाधितोऽपि निमील्य नेत्रे स्थितवांश्चिराय ।
ध्यायन् स्मरन् मङ्गलमङ्गलं तज्ज्योतिःस्वरूपं जगदम्बिकायाः ॥५२॥
तदनु सजननीकान् मित्रवर्यान् समग्रान् ।
निजमनुभवमेवंभूतमाह स्म दिव्यम् ।
वचसि च भगवत्याः श्रद्दधानो मनस्वी ।
परिकरमफझुल्लं हन्तुमुच्चैर्बबन्ध ॥५३॥

॥ इति श्रीशिवराज्योदये महाकाव्ये १९ सर्गः समाप्तः ॥

Scanned by CamScanner

# श्रीशिवराज्योदये महाकाव्ये २० (विंशः) सर्गः

ततः कदाचिद् रिपुसर्वनाशचिन्तासमाधिस्थममुं शिवाजिम् ।
बहिश्चरप्राणसमैः स्वपुत्रैः कश्चित् समेतः प्रवयाः प्रवीरः ॥१॥

कान्होजिमाख्यातपवित्रशीलं तमागतं वीक्ष्य सपञ्चपुत्रम् ।
सम्मानयन्नादरतः शिवाजिः पप्रच्छ वार्तां सहशत्रुवार्ताम् ॥२॥

अकृत्रिमं हार्दमथैतदीयं वृद्धं तदाकस्मिकदर्शनेन ।
सरः प्रसन्नं परिपूर्णतोयम् आकालिकेनेव सुवर्षणेन ॥३॥

सुतांस्तदीयान् स्वसहोदराभान् आश्लिष्य सौहार्दवशंगतोऽसौ ।
स्वीयानि रत्नाभरणानि तेषां बबन्ध कण्ठश्रुतिबाहुभागे ॥४॥

वृद्धः स यूनोऽपि पदावमुष्य स्पृशन् सुदूरानतमस्तकेन ।
वाणीमनादाय ददौ च तस्मै पत्रं नवोपायनवद् विचित्रम् ॥५॥

सकौतुकोऽसौ कुतुकास्पदं तद् द्रष्टुं सुहृत्पत्रमभूच्छिवाजिः ।
द्रुतं समुद्घाटच विशाललोलनेत्रद्वयेनेव पपौ समग्रम् ॥६॥

तन्मित्रपत्रं निजशत्रुनाममुद्राङ्कितं वीक्ष्य सरोषचेताः ।
तथापि सौम्यस्मितवक्त्रशाली निगूढभावां तमुवाच वाचम् ॥७॥

यदत्रपत्रे लिखितं त्वदर्थे पुनस्तदुच्चैः श्रुणु वाचयामि ।
वदन्निति स्पष्टगभीरवाचा तद् दुस्सहार्थं स पपाठ पत्रम् ॥८॥

विध्वंसकः सकलकाफिरमन्दिराणां निर्दलिकश्च हतहैन्दवदैवतानां ।
इस्लामराज्यरिपुवंशमहाकुठारो वीरोऽफझुल्ल इदमादिशति स्वयं वः ॥

अज्ञानिना हतधिया गिरिमूषकेण
शाहात्मजेन रिपुणा शिवनामकेन ।
मोहाज्जिताः खलु विजापुरराज्यवश्याः
नानाविधा हि गिरिजाङ्गलसिन्धुदुर्गाः ॥१०॥

उत्पीडिता विनिहता परिलुण्टिताश्च
मद्धर्मबान्धवगणा सततं समन्तात् ।
येनोद्धतेन तमहं विनिहन्तुमेव
सम्प्रस्थितोऽस्म्यगणितोग्रबलानुयातः ॥११॥

तत् सन्दिशामि सकलान् स्फुटमेतदेव
युष्मान् मदीयरिपुसङ्गतिनष्टबुद्धीन् ।
त्यक्त्वाऽनुबन्धमचिरादधमेन तेन
मत्पादधूलिमधिधत्त नतेन मूर्ध्ना ॥१२॥

Scanned by CamScanner

सम्बन्धिनो यदि वसन्ति रिपोरमुष्य
ग्रामे वने निकटवर्तिनि पर्वते वा ।
आदेशमेनमधिगम्य ममाखिलास्ते
सर्पाभिघातमचिरात् खलु कुट्टनीयाः ॥१३॥

यः पालयिष्यति मदीयमिमं निदेशं
स प्रीतिपात्रमिव मे भविता भवत्सु ।
सम्राडसौ मम वचोभिरमुष्य नूनं
पार्यन्तिकं किमपि मङ्गलमेव कुर्यात् ॥१४॥

यः किन्तु दुर्मतिरनादरमत्र पत्रे
सन्दर्शयिष्यति मनागपि शत्रुवश्यः ।
भूगर्भलीनमपि तं हि गवेषयित्वा
यन्त्रे कुटुम्बसहितं खलु निष्पिनष्मि ॥१५॥

दृष्टं महाभाग रिपोरिदं मे पत्रं समग्रं भयलोभहेतु ।
तदात्मभूवित्तसुरक्षणाय पथ्यं भवानाचरितुं स्वतन्त्रः ॥१६॥
जानामि सर्वत्र हि मण्डलेऽस्मिन् ये केचिदस्मद्भविकानुकलाः ।
सन्तर्जितास्ते रिपुणैवमेव पत्रैः सपत्रैरिव कालसर्पैः ॥१७॥
शृणोमि पाशैरिव शत्रुपत्रैरेभिर्मदीयाः सुहृदोऽपि केचित् ।
कुरङ्गमातङ्गवदात्मनैव रिपोर्वशं यान्ति निबद्धकल्पाः ॥१८॥
ये यान्ति यास्यन्ति च वा दिनेन ते यान्तु सर्वे झटिति क्षणेन ।
कुतो भयं मे खलु यावदेषा जयप्रदा हस्तगता भवानी ॥१९॥
इत्यूचिवानुद्धृतदीर्घखड्गतीव्राग्रनिर्दिष्टबहिःप्रदेशः ।
बभाण वर्षिष्ठममुं युवाऽसौ स एष पन्था हितरक्षणस्य ॥२०॥
स्वराज्यसंस्थापनमूढबुद्धेरहो ममार्थे भवता किमर्थम् ।
संसारसौख्यैकनिदानभूतं विनाश्यते भूगृहवित्तजातम् ॥२१॥
सम्प्रेरितः कर्मणि साहसोग्रे येनाहमाबाल्यत ईश्वरेण ।
ईष्टे मदीयेऽपजये जये वा कर्ताऽथवा कारयिता स एव ॥२२॥
वृद्धोऽसि सत्पुत्रकलत्रवांश्च कुरुष्व तद् यत् स्वहितोचितं ते ।
आश्रीयतामाह्वयते स यस्त्वां पार्यन्तिकं दित्सति मङ्गलं च ॥२३॥
वाचं शिवाजेरिति कर्णरन्ध्रविदारणोग्रां सहसैव शृण्वन् ।
स्वस्वामिभक्तिं प्रहतां स मेने हृन्मन्दिरस्थामिव तां भवानीम् ॥२४॥
उदश्रुपूराप्लुतलोचनान्धो बाष्पातिरेकाहतकण्ठमूकः ।
मूर्च्छान्धकारे प्रविशन्निवाऽसौ पपात वृद्धः पदयोः शिवस्य ॥२५॥

Scanned by CamScanner

शिवाङ्घ्रिसंस्पर्शवशात् स्वसंज्ञां पुनः प्रपन्नः स पदप्रपन्नः ।
कुतो नु संज्ञाविरहोऽल्पशोऽपि कल्पेत सञ्जीवनमन्त्रयोगे ॥२६॥
रोषादिवावेशवशात् तमूचे प्राणप्रियं स्वामिनमात्मनोऽसौ ।
खड्गस्तवायं कर एव राजंस्तक्षणोसि तन्मां किमु वाग्भिरेव ॥२७॥
त्वत्पादसेवाप्रतिकूलमेवं स्वप्नेऽपि लोभेन भयेन जातु ।
संकल्पितं यन्न मयाऽधमेन वितर्कितं देव कथं त्वया तत् ॥२८॥
स्वातन्त्र्यलक्ष्म्याश्चरणोपहारं चिकीर्षसे चेन्नरशीर्षपद्मैः ।
त्वन्नेत्रसंकेततृणीकृतात्मा स्वपुत्रशीर्षाण्यपि कर्तितास्मि ॥२९॥
त्वत्काङ्क्षितं दुर्घटमप्यकस्मात् संपूरयिष्याम्यधुनैव राजन् ।
प्रविश्य दावाग्निमुपेत्य वार्ब्धिं निष्पेष्य वाद्रिं प्रविदार्य वाभ्रम् ॥३०॥
यतः प्रभृत्येव नवस्वराज्यसंस्थापनैकोग्रमहाव्रतस्त्वम् ।
ततोऽयमाकाङ्क्षति दास एष त्वत्कार्यसत्रे ससुतात्महोमम् ॥३१॥
हा पश्चिमेऽस्मिन् वयसि प्ररोहेत् चित्ते मदीये ह्यभिलाषवन्ध्ये ।
कथंचन स्वार्थविषाङ्कुरश्चेद् वंशोऽखिलो मे नरकं प्रतीयात् ॥३२॥
स्वधर्म-गो-ब्राह्मणजन्मभूमित्राणार्थमादेशमनु त्वदीयम् ।
कायं पतत्वेतदिति प्रकामं याचे दिवानक्तमहं महेशम् ॥३३॥
इत्थेवमात्माहितजीवितस्य वृद्धस्य तस्योत्कटभक्तिभाजः ।
निपीय वाणीममृतायमानां शिवाजिरन्तर्नितरां जहर्ष ॥३४॥
प्रसार्य बाहू प्रणयातिरेकाद् आनन्दपूताप्लुतदीप्रनेत्रः ।
गाढं तमालिङ्गितुमभ्यसर्पत् वीरः स वर्षिष्ठमभङ्गधीरम् ॥३५॥
सुदुर्लभाश्लेषसुखप्रसन्नं तमाह विश्वासमयीं स वाचम् ।
भवत्सहायोऽहमरातिमेनं जेतास्मि निश्चप्रचमेव शीघ्रम् ॥३६॥
गत्वा निजग्राममितोऽचिरेण कार्यं त्वया कार्यमिदं मदर्थे ।
ये केचनैवं रिपुणोग्रपत्रैः सन्तर्जितास्ते स्ववशीक्रियन्ताम् ॥३७॥
अथात्मनः पूज्यतमस्य भर्तुरादेशमेवं परिगृह्य मूर्ध्ना ।
श्रान्तोऽप्यविश्रम्य महत्तरोऽसौ यथागतं ग्राममगात् स्वकीयम् ॥३८॥
कैङ्कर्य-दक्षान् स्वसुतांश्च सर्वान् स प्रेषयामास निमन्त्रणार्थम् ।
सर्वत्र शत्रुप्रहितोग्रपत्रभयाकुलानां निजबान्धवानाम् ॥३९॥
तदीयसंदेशमलङ्घनीयं प्राप्यैव कालानतिपातमायन् ।
सातङ्कशङ्काः खलु बान्धवास्ते पुरा प्लवङ्गा इव वानरेशम् ॥४०॥
रात्रौ रहस्तानखिलान् स्वगेहे सम्मीलितान् संशयलोलचित्तान् ।
निर्मक्षिकत्वं परितो निरीक्ष्य प्रचक्रमे मन्दमसौ प्रवक्तुम् ॥४१॥
हे भ्रातरः प्राणसमाः समस्ताः समानशीलव्यसना वयं स्मः ।
व्यालम्बते यद् व्यसनं हि मूर्ध्नि परीक्षते शीलमिवाद्य तन्नः ॥४२॥

Scanned by CamScanner

यत्तर्जनापत्रमिदं करे मे संदृश्यते कुण्डलिताहिकल्पम् ।
तदीहते नो ग्रसितुं हि जीवं प्रेष्ठं ततो वा सुदृढाभिमानम् ॥४३॥

सम्प्रेरितं पत्रमयं समन्तात् सर्पास्त्रमेतद् रिपुणा निगूढम् ।
तस्य प्रतीकारविधेर्विधानं जिज्ञासतेऽयं स्थविरो भवत्तः ॥४४॥

प्रागेव दोलायितचेतसस्ते पुरःस्थितां वीक्ष्य पुनः समस्याम् ।
निगूहितुं चञ्चलतां स्वकीयां प्रत्युत्तरं प्रश्नमयं हि चक्रुः ॥४५॥

हे तात! वृद्धस्य वचोऽभिनन्द्यमापत्सु बालैरिति नीति-रीतिः ।
तस्माद् दुरूहप्रतिकारयोगे कृच्छ्रेऽधुना किं नु चिकीर्षसि त्वम् ॥४६॥

अत्र स्थितानां हि वयस्तपोभिस्त्वमेव नेता खलु सारदृश्वा ।
यदादिशस्यात्ममतानुकूलं तन्नः शिरोधार्यमवेहि सर्वम् ॥४७॥

उक्त्वेति तद्वाक्यमपेक्षमाणा विनम्रशीर्षा न यदा बभूवुः ।
तदोच्चकैः केसरिगर्जिताभं संशुश्रुवे वृद्धवचः समस्तैः ॥४८॥

शृण्वन्तु सर्वेऽवहिता युवानः मनीषितं स्थेष्ठमिदं मदीयम् ।
शरीरमेतन्मम वार्थजातं शिवैकसेवार्पितमेव नूनम् ॥४९॥

शिवः स च त्यक्तहिमाद्रिवासः सह्याचलेऽस्मिन्नधुनाऽभ्युपेतः ।
शिवाजिरूपेण जगद्धितार्थं करोति भव्या नरवीरलीलाः ॥५०॥

श्रद्धा ममाद्धा सुदृढेवमेव न जातु लोभान्न भयाच्चलेत् सा ।
तन्मत्पथे चेत् पदमर्पणीयं निर्दह्यतां शात्रवपत्रमेतत् ॥५१॥

इत्यूचिवान् पत्रमदः करस्थं पुरःस्थमन्दज्वलदग्निकुक्षौ ।
निक्षिप्य चिक्षेप स चक्षुरारात् सुहृज्जनानीक्षितुमात्मनीनान् ॥५२॥

ज्वलत्पत्ररोचिर्विराजन्मुखास्ते
समुत्तस्थुरावेशतः सर्व एव ।
विनिष्कास्य खड्गांस्तडिद्दीप्रधारान्
जगर्जुर्जयोद्घोषणां श्रीशिवस्य ॥५३॥

वृद्धः स तं जयजयेति निनादमुच्चै-
रुच्चारितं प्रियसुहृद्भिरुदूढधैर्यैः ।
आकर्णयन्नतितरां परितुष्टचेता
मेने जयः स्वयमुपैति शिवं प्रतीति ॥५४॥

॥ इति श्रीशिवराज्योदये महाकाव्ये २० सर्गः समाप्तः ॥

Scanned by CamScanner

# ॥ श्रीशिवराज्योदये महाकाव्ये (२१) एकविंशः सर्गः ॥

इत्थं रिपोर्भेदनयप्रयोगं वैफल्यमापाद्य स नीतिवेत्ता ।
दण्डप्रयोगोचितमप्रभेद्यं प्रतापदुर्गं श्रयितुं चकाङ्क्ष ॥१॥
सह्यस्य विख्यातगिरेरसह्यप्रतापभाजो निखिलः प्रतापः ।
संपीडितोऽतः खलु संबिभर्ति योऽन्वर्थसंज्ञामभिनन्दनीयाम् ॥२॥
यस्याग्रतः पूर्वहरिद्विभागे दुराक्रमे सानुनि सुप्रतिष्ठम् ।
पञ्चापगा-पुण्यजलाभिषिक्तं ज्योतिर्मयं किञ्चन शम्भुलिङ्गम् ॥३॥
महाबलाख्यस्य य ईश्वरस्य पुरः स्वसामर्थ्यसमं निदेशम् ।
संतस्थिवान् पालयितुं विनम्रो दृढः ककुद्मानिव नन्दिकेशः ॥४॥
पर्यन्तसानुष्ववकल्पः सह्याद्रिरेणुच्छुरिताकडारः ।
गुञ्जन्निवान्तः परितो यमीडयं प्रदक्षिणं बम्भ्रमतीव वायुः ॥५॥
ताः पञ्चकन्या इव सुप्रसिद्धाः सरिद्वराः पावनजीवनाढ्याः ।
यस्याग्रतो नित्यमभित्वरन्ते पापानि संहर्तुमिव प्रजानाम् ॥६॥
काप्यादिशक्तिर्भुवनस्य दिव्या यमाश्रिता योगिभिरीक्षितान्तः ।
परिस्फुरन्तीव विचित्ररूपैः शुद्धास्ववस्थासु चतुर्विधासु ॥७॥
स्वपादसंस्पर्शभवं हि दोषं यल्लङ्घनाद् भानुरवैति नूनम् ।
तत्क्षालनार्थं नियतं दिनान्ते स प्रत्यहं मज्जति पश्चिमाब्धौ ॥८॥
यद्वल्लरीसम्भवपुष्पगुच्छ-स्रवन्मधूद्गारनितान्तलुब्धैः ।
मिलन्मिलिन्दै रचिताः सुकोषाः सहस्रशो यस्य तटेषु भान्ति ॥९॥
यद्गह्वरोत्सङ्गसुखप्रसुप्ता वनेचरा व्याघ्रतनूपधानाः ।
स्वप्नेऽपि नूनं जनभीतिहेतून् कृतान्तदूतानपि भर्त्सयन्ति ॥११॥
यस्यासमन्तान्निबिडोच्चवृक्षच्छायाश्रितं सन्तमसं नितान्तम् ।
सूर्ये तपत्यप्यदिशद्दिनेषु रात्रिञ्चराणामभयप्रचारम् ॥११॥
सह्याद्रिसानूच्छ्रयमध्यवर्ती दुर्लङ्घनीयाटविसंपरीतः ।
प्रतापदुर्गः स गजालि-सेनामध्यस्थवीरप्रभुवद् विरेजे ॥१२॥
सञ्चूर्णयन् दुर्धरतीव्रवेगान् संस्फूर्जथून् कालकरालमेघान् ।
आक्रम्यतो राष्ट्ररिपूनशेषान् यो भाविनं ध्वंसमिवादिदेश ॥१३॥
युयुत्सया शिश्रयिषुर्निगूढम् आयोधनार्हं हि तमेव दुर्गम् ।
मनीषितं ज्ञापयितुं शिवाजिः स मातरं प्रत्यगमत् कदाचित् ॥१४॥
स्वान्तेऽप्रसन्नापि हसन्मुखी सा नप्तारमङ्के बहु लालयन्ती ।
कल्याणहेतोः स्वसुतस्य किञ्चित् स्तोत्रं भवान्या मृदु संगिरन्ती ॥१५॥

Scanned by CamScanner

संसेवमाना चिररोगखिन्नां कन्यामिवान्यां प्रियपुत्रभार्याम् ।
दृष्टा स्वमाता सहसा शिवेन वात्सल्यकारुण्यमयीव शक्तिः ॥१६॥
स्वभावनम्रः स सुतो जिजाया जगत्प्रणम्यो जगदेकवीरः ।
प्रगाढभक्त्या प्रणनाम पूज्यौ साष्टाङ्गपातं चरणौ स्वमातुः ॥१७॥
अशेषमाङ्गल्यमिवोद्गिरन्तं तत्पाणिसंस्पर्शमवाप्य मूर्ध्नि ।
समुत्थितोऽसौ विधृतोजनन्या प्रचक्रमे वक्तुमतीव मन्दम् ॥१८॥
जानासि मातस्त्वदृते सुतोऽयं न जातु किञ्चित् क्षमते विधातुम् ।
आशीर्वरो वा करूणालवस्ते विपत्सु नूनं कवचायते मे ॥१९॥
यत् साम्प्रतं शात्रवकृच्छ्रमेतत् सर्पास्त्रसञ्चारसमं परीतम् ।
तस्य प्रतीकारकृते चिकीर्षे प्रतापदुर्गे खलु सर्पसत्रम् ॥२०॥
गारुत्मतग्रावसमाद्भुतौजाः प्रतापदुर्गो हि रिपुन्दमो नः ।
भुजङ्गमस्येव रिपोरमुष्य निबर्हणेऽसौ क्षम एक एव ॥२१॥
तत् त्वां विनैवाद्य सुहृत्सहायो गन्तास्मि दुर्गं हि सुदुर्गमं तम् ।
कथं नु वत्स्यामि विना त्वयाऽहं कथं विना वत्स्यसि वा मया त्वम् ॥२२
अन्यत् किमप्यस्ति न शक्त एव सुतस्तवायं जननि प्रवक्तुम् ।
त्वत्पादपद्मानतमस्तकाय प्रदेहि मे पूर्णकृपाप्रसादम् ॥२३॥
सा धैर्यमूर्तिर्जननी शिवस्य पुरःस्फुरन्तीमपि शत्रुभीतिम् ।
तृणाय गुर्वीमपि मन्यमाना प्रोत्साहयन्ती स्वसुतं जगाद ॥२४॥
शिव ! त्वमाचन्दिरसूर्यबिम्बं निरामयं जीव यशो लभस्व ।
स्वधर्मशत्रून् प्रणिहत्य सर्वान् अध्यास्व साम्राज्यशुभासनं च ॥२५॥
आजन्मनस्तेऽहमनन्यभक्त्या सम्प्रार्थयामीश्वरमेतदेव ।
कल्पद्रुमोऽसौ शुभकामनानां सर्वङ्कषं मङ्गलमातनोतु ॥२६॥
प्रहर्तुमाहर्तुमुपागतो यस्त्वां तावकं चाभिनवं स्वराज्यम् ।
दृढं विजानीहि नराधमोऽसौ नैव क्षणं जीवितुमर्हतीह ॥२७॥
पूज्यातिपूज्यां तुलजाभवानीमूर्तिं य उच्छेदितवान् मदान्धः ।
म्लेच्छासुरं तं जहि सर्वथा त्वं न शेषितव्यः खलु देवशत्रुः ॥२८॥
सावेशमित्युक्तवती क्षणं सा तूष्णीं स्थिता व्यक्तगभीरभावा ।
सगद्गदं क्लिन्नविशालनेत्रा पुनः कथंचिद् गिरमुज्जगार ॥२९॥
ब्रवीमि किं पुत्रक पुत्रघातं माता कदाचिन्न हि वक्तुमीष्टे ।
तथापि वच्मि स्मर तन्नितान्तं ज्यायांस्तवानेन हतः स बन्धुः ॥३०॥
पापीयसाऽनेन हि राक्षसेन पिता तवाबद्धपदः कदाचित् ।
प्रदर्शितोऽभूद् रिपुराजधान्यां न्यक्कारमेनं न हि विस्मरामि ॥३१॥

स्त्रियोऽपि मे प्रस्फुरतौ हि बाहू स्वयं सशस्त्रं रणमभ्युपेत्य ।
रिपोरमुष्याशु मदान्धबुद्धेराचूलमूलं प्रविदारणाय ॥३२॥
त्वया सुपुत्रेण रणाग्रगेण जाताऽस्मि लोके शिव वीरमाता ।
तद्देवशत्रोरफझुल्लकस्य वधेन नूनं चरितार्थमस्तु ॥३३॥
इत्युक्तवत्यां सहसा जिजायाम् उत्तस्थुषी तल्पगता प्रवेगात् ।
सा क्षीणशक्तिः शिवधर्मपत्नी जगाद भर्तारमथो प्रसन्ना ॥३४॥
बभाण कोपादिव देव! माता यत् साम्प्रतं साम्प्रतमेव मन्ये ।
आकाङ्क्षितं दुर्घटमात्मशक्त्या वीराः स्वमातुः परिपूरयन्ति ॥३५॥
का वीरपत्नी नरवीर लोके भर्तृद्रुहं कञ्चन दुष्टशत्रुम् ।
निमेषमात्रं प्रसहेत नाथ सीमान्तिके जातु समुच्छ्वसन्तम् ॥३६॥
रिपोस्तदद्यैव निबर्हणार्हं कर्तव्यमाधातुमितः प्रयाहि ।
समुत्सुकाऽहं विजयोत्सवे ते नीराजनाभ्यर्चनमेव कर्तुम् ॥३७॥
प्रोत्साहिनीं वाचमिति प्रदीप्तां प्रक्षीणशक्तेरपि धर्मपत्न्याः ।
श्रुत्वा महोत्साहवतः शिवस्य सोत्साहशक्तिर्भृशमुद्दिदीपे ॥३८॥
निसर्गदीप्रारुणलोचनस्य विलोचनान्तर्नवमेव किञ्चित् ।
तस्याविरासीत् स्फुटमात्मतेजो विपत्तमस्काण्डविदारणोग्रम् ॥३९॥
बलाढ्यदोर्दण्डयुगस्य तस्य दोर्दण्डयोः काचिदुदग्रशक्तिः ।
मत्तारिविध्वंसपटीयसी सा पुनः कुतश्चित् सहसाऽऽविवेश ॥४०॥
वक्षःस्थले स्वत्वदृढाभिमानोन्नते स्वधर्मप्रखराभिमानः ।
युक्तस्तयाऽरिप्रतिशोधबुद्ध्या किञ्चिन्नवं ताण्डवितं चकार ॥४१॥
मातुश्च पत्न्याश्च गिरं तदानीं मुहुर्मुहुः श्रोत्रपथे ध्वनन्तीम् ।
विद्यां स मेनेऽतिबलां बलां च रामायणीं तां हृदि संविशन्तीम् ॥४२॥
स्मरन् वधं भ्रातुरिप्रणीतं स निश्चिकायोत्तरमस्य कर्म ।
कर्तुं रिपोः शोणिततर्पणेन शरीरपिण्डार्पणतश्च बाढम् ॥४३॥
देव्या अजापुत्रबलिप्रियाया निर्भग्नमूर्तेस्तुलजाभवान्याः ।
सन्तोषणार्थं नरविग्रहाजं रिपुं स निर्मस्तकितुं चकाङ्क्ष ॥४४॥
मुहुर्मुहुः प्रस्फुरता भुजेन कटिस्थरत्नत्सरुमुज्ज्वलाभाम् ।
धृत्वा विनिष्कोषितवान् भवानीं निरीक्षितुं स्वाननमर्कदीप्तम् ॥४५॥
वीरस्वभावोचितमात्मजस्य माता च तं संभ्रममीक्षमाणा ।
अतिप्रसन्ना सहसा जगर्ज जयोऽस्तु ते पुत्र चिरं जयोऽस्तु ॥४६॥
धर्मप्रियायाः प्रियविक्रमायाः पतिव्रताया शिववत्सलायाः ।
जयध्वनिं तं परिपीय नूनं प्रासादगर्भो मुहुरुद्जगार ॥४७॥

Scanned by CamScanner

जयध्वनिस्फीततरङ्गमालां प्रशान्तिगङ्गासरितं वगाह्य ।
पवित्रमानी स चरित्रपूतः सुतो जिजायाः सहसोच्चचाल ॥४८॥

मूर्ध्ना कराम्बुजपुटेन च भावुकोऽसौ
संस्पृश्य पादकमलद्वयमम्बिकायाः ।
पस्पर्श हृत्कमलसन्निहितात्मजायाः
पत्न्याश्च मूर्धकमलं स्वपदावनम्रम् ॥४९॥

पुत्रं स्तनन्धयममुं शरदिन्दुवक्त्रम्
ईषत्-समुल्लसितनीलसरोरुहाक्षम् ।
आदाय दारकरतो निजहृत्समीपं
वीरः स वत्सलतया मुहुरुच्चुचुम्ब ॥५०॥

प्रियतमजनसन्निकर्षसक्तं
क्षणमेनं शिवमुग्रकर्मनिष्ठा ।
रणमखविधये प्रतापदुर्गं
प्रतिगन्तुं त्वरयांचकार सद्यः ॥५१॥

॥ इति श्रीशिवराज्योदये महाकाव्ये २१ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

# श्रीशिवराज्योदये महाकाव्ये (२२) द्वाविंशतितमः सर्गः

स मातृवरसम्प्राप्तनिखिलोदर्कमङ्गलः ।
प्रतापदुर्गं तं शीघ्रं शिवः प्राप रणोत्सुकः ॥१॥

युवा स नीतिमर्मज्ञो मौलैः कार्यधुरन्धरैः ।
चिकित्सति स्म नीतिज्ञैः कर्तव्यं समयोचितम् ॥२॥

तानुवाच वयोज्येष्ठान् स्वामिभक्तिधनानसौ ।
तदभिन्नमतांश्चापि निजं निश्चप्रचं मतम् ॥३॥

जानीथ बान्धवाः शत्रोः सामर्थ्यं कल्पनातिगम् ।
अस्माकं तुलया यस्य कलां नार्हति षोडशीम् ॥४॥

मतङ्गाश्च तुरङ्गाश्च क्रमेलाश्च सहस्रशः ।
असंख्याः पत्तयस्तेषां तच्छतांशोऽपि नैव नः ॥५॥

परन्तु जयमेवाहं दुर्लभं चापि कामये ।
स्वप्नेऽपि मम नोदेति पराभवविकल्पना ॥६॥

उत्पश्यामि तथा शत्रोर्विध्वंसं सर्वतोमुखम् ।
यथा दिल्लीपतेश्चापि हृदि स्याच्चिरवेपथुः ॥७॥

क्षुद्रा अन्ये च ये केचिद् मह्यं द्रुह्यन्ति सर्वदा ।
प्रस्विन्नगात्राः शृण्वन्तु युद्धवार्तामिमां हि ते ॥८॥

जिगीषुरल्पविषयोऽल्पीयः सैन्यपरिच्छदः ।
अल्पिष्ठेनैव कालेन जयेदिति मतिर्मम ॥९॥

साम्प्रतं घनकालोऽयमखण्डघनवर्षणः ।
पूरिताशेषभूगर्तस्तम्भितानीकचेष्टितः ॥१०॥

दिवाऽपि तिमिराच्छन्नं कालोऽयं कुरुते जगत् ।
नृत्यन्ति चिररात्राय रुचिरा अचिरप्रभाः ॥११॥

कालमेघतमस्काण्डावगुण्ठितनभस्तले ।
खद्योतपुञ्जास्तन्वन्ति रात्रावुडुविडम्बनम् ॥१२॥

नूनमम्भोधिकल्लोला वेलावप्रनिरोधिताः ।
मेघरूपेण सम्प्राप्ता अभिषेक्तुं वसुन्धराम् ॥१३॥

वारिधाराशराघातैः सह्यक्रौञ्चममुं ध्रुवम् ।
विध्यत्यनारतं कोपादयं वर्षर्तुभार्गवः ॥१४॥

तडिल्लताकशाघातैस्ताडितेव धराऽधुना ।
आक्रन्दतीव वर्षाभूक्रन्दनैर्भृशमाकुला ॥१५॥

Scanned by CamScanner

अखण्डधारासम्पातक्लिन्नच्छिन्नगरुत्मताम् ।
खगानामपि सञ्चारो विरलः किं पुनर्नृणाम् ? ॥१६॥
शिरःस्थेन्दुकलाकान्तिसितभोगा इवाहयः ।
शम्भोरिव गिरेरङ्गे निर्झरा भान्ति साम्प्रतम् ॥१७॥
दृढमूला चिरस्थेष्ठा अपि झञ्झाविचालिताः ।
पादपा भुवि लोटन्ति हताशा इव साम्प्रतम् ॥१८॥
शमीकाष्ठगतो वह्निर्जागरूकोऽपि चेतने ।
निःसत्त्व इव नेदानीं जागर्ति भृशघर्षणैः ॥१९॥
पुनर्भाद्रपदस्यान्ते प्रशान्ते घनवर्षणे ।
जृम्भयेत् समरोत्साहं जगदुल्लासिनी शरद् ॥२०॥
पञ्चगङ्गामहापूरपरिखान्तरकुण्ठितः ।
शरत्काले प्रवर्धेत रिपुराश्यानकर्दमे ॥२१॥
निदाघ इव दावाग्निः शरत्काले द्विषद्गणः ।
उपेक्ष्यमाणः सहसा जायते बलवत्तरः ॥२२॥
तदद्यप्रभृति प्रेष्ठा अस्मत्पक्षाभिमानिनः ।
स्वधर्मराज्यनिष्ठा ये तानामन्त्रयितास्म्यहम् ॥२३॥
तद्वाचिकमनुक्षिप्रं सुहृत्सान्निध्यलालसाः ।
शिवं सखायः संप्राप्ता विजया इव विक्रमम् ॥२४॥
प्रेम्णा सभाजयामास शिवः सर्वान् सुहृज्जनान् ।
प्रीणयन्ति न कं लोके विपत्तिसहयोगिनः ॥२५॥
दिने दिने समायातैर्मित्रैर्वीरगणान्वितैः ।
बभौ प्रतापदुर्गोऽसौ सिंहावासगिरीन्द्रवत् ॥२६॥
युयुत्सुत्वं सुवीराणां रौद्रत्वं यच्च किञ्चन ।
दुर्गे तस्मिंस्तदा सर्वं संपिण्डितमिवाभवत् ॥२७॥
निजाङ्गभूतैर्वीरैस्तैः परीतः स बभौ शिवः ।
असंख्यशस्त्रसन्नद्धः परमाद्भुतवीरवत् ॥२८॥
खड्गपट्टिशबाणानां कुठाराणां च सर्वतः ।
समुत्तेजनमारेभे तीक्ष्णानामपि तत्र तैः ॥२९॥
विलिप्तगरलास्तेषां कृपाणा मेचकप्रभाः ।
विरेजिरे तडिल्लोला भद्रकालीभुजा इव ॥३०॥
ते चाल्पतमसंख्याका अपि वीरा रणातुराः ।
प्रत्येकं चिन्तयन्ति स्म सहस्ररिपुमर्दनम् ॥३१॥

Scanned by CamScanner

महिष्ठं प्रबलावेगं रणरागं मनोभवम् ।
अमान्तमङ्गे चालिपिष्ठे समयच्छन् कथंचन ॥३२॥
निरीक्ष्य सूक्ष्मेक्षिकया दुर्गं तं परितः शिवः ।
हृदि संयोजयामास चमूव्यूहं जयावहम् ॥३३॥
प्रत्यर्धरात्रमागत्य च्छद्मवेशधराश्चराः ।
शिवमावेदयन् सर्वं शात्रवं दुष्टचेष्टितम् ॥३४॥
कश्चिदाह स्म कष्टेन राजन्नद्य जितोऽरिणा ।
त्वदीयो भूमिदुर्गोऽसौ प्रियः शिरवलाभिधः ॥३५॥
अन्येद्युरपरः कश्चिच्चरः कोङ्कणसञ्चरः ।
वणिग्ब्रुवाणामाङ्ग्लानां बकचेष्टामवेदयत् ॥३६॥
पुनः कश्चन सिद्दीनां मकरालयवासिनाम् ।
कालव्यालोग्रकायानां ग्राहकृत्यमसूचयत् ॥३७॥
चौराणामिव गौराणां वलंदेजफराशिणाम् ।
आह स्मान्यः कुकर्माणि शिष्टाचारकलावताम् ॥३८॥
कश्चित् स्वधर्मबन्धूनां शत्रुकिंकरताजुषाम् ।
जघन्यत्वं कुलीनानामपि खेदादवेदयत् ॥३९॥
शिवः प्रकृतिधीरोऽसौ श्रुण्वन्नपि दिवानिशम् ।
उदन्तजातमित्येवं न चचाल मनागपि ॥४०॥
विचिन्तयन् विजज्ञेऽसौ ऋषीणां क्रान्तदर्शिताम् ।
भद्रं कर्णेभिरित्येनां प्रार्थनां गायतां तदा ॥४१॥
मेने च सहसा किं मे रत्नकुण्डलमण्डितम् ।
श्रोत्रयुग्ममिदं देवैरश्रव्यश्रवणे कृतम् ॥४२॥
किं नु नैकोऽपि वृत्तान्तः क्षणं श्रुतिसुखावहः ।
न मामेष्यति कालेऽस्मिन् विपद्दावाग्निदीपिते ॥४३॥
इति चिन्तयतस्तस्य नूनं शीलं परीक्षितुम् ।
प्रवृत्तिरागताऽकस्मात् काचिद्वज्रविदारिणी ॥४४॥
ज्यायसी धर्मपत्नी सा हाऽऽबाल्यात् सहचारिणी ।
पुत्रं द्विवर्षदेशीयं विहाय त्रिदिवं गता ॥४५॥
आकर्ण्य दुर्भगां वार्तां तां वज्राघातनिष्ठुराम् ।
विदीर्णकल्पचित्तोऽपि निशश्वास निरश्रु सः ॥४६॥
स शोको हृदये तस्य नाव्यज्यत दहन्नपि ।
सागरान्तर्गतः किं नु व्यज्यते वडवानलः ॥४७॥

Scanned by CamScanner

दहन्तमन्तः शोकाग्निं विवेकजलसिञ्चनैः ।
मन्दीचकार तत्कालं शिवो धीरधुरन्धरः ॥४८॥

दुःखाकुलं सुहृद्वर्गं गम्भीरमुखमुद्रया ।
निःशब्दं सान्त्वयामास स्वयं कर्तव्यनैष्ठिकः ॥४९॥

तस्य निश्चलचित्तत्वं विजानन्तो विपत्तिषु ।
जिह्रीयुरन्तः सन्तोऽपि योगाभ्यासविशारदाः ॥५०॥

साङ्ग्रामिकेषु पणवानकगोमुखेषु ।
धीरं ध्वनत्सु परितोऽपि निसर्गधीरः ।
कर्माणि शास्त्रविहितानि दिवं गतायाः
शान्त्यर्थमाचरितवान् स हि धर्मगोप्ता ॥५१॥

॥ इति श्रीशिवराज्योदये महाकाव्ये २२ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये २३ तमः सर्गः ॥

अथोदिते शरत्काले निःसाराम्बुदमण्डले ।
निर्मलाकाश–संमूर्च्छत्सहस्रकिरणातपे ॥१॥
लसत्काशे हसच्चन्द्रे विकसच्चारुपङ्कजे ।
विपक्वकमलक्षेत्रस्वर्णकान्तिमनोहरे ॥२॥
विलोलमञ्जरीपुञ्जनृत्यन्मत्तमधुव्रते ।
मूकभेककुलाक्रन्दे हंसकूजितमञ्जुले ॥३॥
आकाशगङ्गादिव्याम्बुस्नातनक्षत्रमण्डले ।
मैत्रावरुणिसत्तेजःस्पर्शस्वच्छजलाशये ॥४॥
केतकीकुसुमोद्गच्छद्रजःकणसुगन्धिते ।
मन्दिरान्तर्ज्वलत्कृष्णागुरुचन्दनधूपिते ॥५॥
नवरात्रोत्सवाध्मातशंखध्वनिनिनादिते ।
जगदम्बाजयोद्घोषप्रसन्नशिवमानसे ॥६॥
काले तदा ययौ कश्चिद् द्विषत्प्रतिनिधिर्द्विजः ।
शिवराजमनाहूतोऽप्याहूत इव निर्भयम् ॥७॥
काशपुष्पच्छवि-स्वच्छकौशेयवसनावृतः ।
कर्णिकाररुचिस्फीतरक्तोष्णीशविभूषितः ॥८॥
दीपज्वालाभसिन्दूररेखालिप्तललाटकः ।
सुवर्णसूत्रग्रथितनवरत्नललन्तिकः ॥९॥
म्लेच्छसेवापरिक्षीणस्वाभिमानोऽप्युपाययौ ।
अग्रजन्माग्रदूतोऽसौ शिवाग्रे गर्वभागिव ॥१०॥
अन्तरङ्गसुहृद्वर्गकेन्द्रभूतममुं शिवम् ।
नमन्नपश्यद् विप्रोऽसौ ज्योतिः किञ्चन नूतनम् ॥११॥
तत्तेजःप्रतिघातेन स्फारस्फुरितपक्ष्मणी ।
उन्मील्य लोचने सम्यग् दर्शनीयं ददर्श सः ॥१२॥
प्राप्तातिथ्यो जगादासौ विप्रोऽहं भास्करात्मजः ।
कुलकर्णिकुलोत्पन्नः कृष्णाजिरिति विश्रुतः ॥१३॥
विजापुरीयसाम्राज्यसेवाधर्मपरायणम् ।
अमात्यकल्पं मां विद्धि शाहसूनो समागतम् ॥१४॥
कृष्णातटमनुप्राप्तो योऽयं विख्यातविक्रमः ।
अफझुल्लाभिधानो हि प्रचण्डपृतनापतिः ॥१५॥
सम्राडपि वशे यस्य दुर्दम्यबलशालिनः ।
सोऽपि यद्वचनं प्रायः प्रशस्य बहुमन्यते ॥१६॥

Scanned by CamScanner

सोऽहं तदीयमादाय पत्रमेतदिहागतः ।
अलङ्घनीयसन्देशमुदर्कहितसाधनम् ॥१७॥
सेनापतेश्चिरादेव पिता ते सख्यभाजनम् ।
अतः पितृव्यवात्सल्यं त्वयि तस्यावगम्यताम् ॥१८॥
गुणगृह्यो गुणाढ्यं त्वामसौ द्रष्टुं समीहते ।
रत्नाकरोऽपि जलधिर्नित्यं स्पृहयतीन्दवे ॥१९॥
राजप्रसादलभ्यं यत् सौख्यं वैभवसम्भवम् ।
एक एव समर्थोऽसौ त्वीरो दापयितुं क्षणात् ॥२०॥
तं तत्पत्रगतं भावमाकलय्य विमृश्य च ।
आत्मश्रेयस्करं पथ्यं त्वमाचरितुमर्हसि ॥२१॥
धर्मार्थशास्त्रविज्ञोऽहं ब्राह्मणस्त्वां निवेदये ।
नर्ते राजेन्द्रसेवाया धर्म्यमन्यत् कलौ युगे ॥२२॥
नीतिज्ञो नियतिज्ञोऽहं त्वत्कल्याणमतिः पुनः ।
ब्रवीमि तव सौभाग्यं सुफलेद् राजसेवया ॥२३॥
राजपीठाभिगमनै राजनिष्ठावलोकनैः ।
राजानुकूलाचरणै राजलक्ष्मीः प्रसीदति ॥२४॥
त्वादृशां खलु शूराणां पण्डितानां च मादृशाम् ।
राजस्थाणुमुपाश्रित्य वर्धते कीर्तिवल्लरी ॥२५॥
शुभं कामयमानेन वाशुभं निश्चिकीर्षुणा ।
स्वयमेवाभिगन्तव्या धीमता राजवल्लभाः ॥२६॥
विहितं चेत् क्वचित् किञ्चिद् राजापथ्यमजानता ।
तदायतिमपघ्नन्ति कृपया राजवल्लभाः ॥२७॥
अपृष्टेनापि विप्रेण यन्मया बहुभाषितम् ।
शाहसूनो विजानीहि तत् त्वन्मङ्गलकाम्यया ॥२८॥
हितोपदेशमित्येवं श्रावयित्वा प्रसन्नधीः ।
अफझुल्लमहामुद्रालाञ्छितं पत्रमर्पयत् ॥२९॥
विनयादिव तत्पत्रं स्वयमादाय शात्रवम् ।
शिवः सम्भावयामास ब्राह्मणं तममात्यवत् ॥३०॥
सुवर्णसूत्रनिस्यूतविचित्राकृतिभास्वरम् ।
पत्रोर्णजातं दुष्प्रापं ददौ सेनापतिं प्रति ॥३१॥
सम्भावनाप्रसन्नास्यं तमासन्नासनस्थितम् ।
अमात्यमानिनं दूतं शिवो मन्दमभाषत ॥३२॥



Scanned by CamScanner

अस्ताभिलाषी भगवानेष सम्प्रति भास्करः ।
सन्ध्यावन्दनकालोऽयं धार्मिकाणां भवादृशाम् ॥३३॥

आभार्यानिधनादस्मि दुःखाविलमना अहम् ।
नोत्सहे सहसा किञ्चिद् वक्तुं कर्तुं च साम्प्रतम् ॥३४॥

प्रातिकूल्यमवेक्ष्येदं ग्रहाणां च विधेरपि ।
स्वभावकातरं चेतः कम्पते मे दिवानिशम् ॥३५॥

श्रीमता यदुपागत्य मदीयहितकाम्यया ।
प्रोक्तमर्थ्यं च पथ्यं च तेनास्मि ऋणवानिव ॥३६॥

तदलं बहु भाषित्वा मया वाचस्पतेः पुरः ।
सन्ध्योपासनवेलेयं नातिक्रामतु मद्गिरा ॥३७

आज्ञापत्रमिदं नक्तं पठित्वा च विमृश्य च ।
श्वो मध्यन्दिनवेलायां लेखयामि तदुत्तरम् ॥३८॥

विसृज्यैवंविधैर्वाक्यैरग्रदूतममुं रिपोः ।
स्थविरैर्मन्त्रयांचक्रे तन्त्रावापविशारदैः ॥३९॥

सेनासम्पत्तिसम्भारमदिरोन्मत्तचेतसः ।
शुश्राव तदरेः पत्रं सर्पफूत्कारदुःश्रवम् ॥४०॥

"त्वया दुर्मते सह्यगर्भाश्रितेन
मनुष्याखुना दुष्टचेष्टोद्यतेन ।
यदद्यावधि प्रत्यपहारि किञ्चित्
तदागत्य मत्पादयोरर्पणीयम् ॥४१॥

महासंगरोपार्जितस्फीतकीर्तिः
नितान्तोद्यतोऽहं रिपून् हन्तुमेव ।
परं त्वादृशा काननश्वापदेन
कथं मादृशो युद्धकेलिं करोतु ? ॥४२॥

न वाञ्छामि युद्धं त्वया दुर्बलेन
न सिंहो विगृह्णाति रे मर्कटेन ।
मदीया इमे सेवकाः किन्तु मूढाः
त्वया सार्धमायोधनं कामयन्ते ॥४३॥

तदेतन्मदीयं विलोक्यैव पत्रं
त्वया लुण्ठितं यत् किमप्यस्मदीयम् ।
सुवर्णादि तद्दीयतां सर्वमेव
स्वयं मत्समक्षं नमन्मस्तकेन ॥४४॥

Scanned by CamScanner

समायासि चेन्मत्समक्षं विनम्रः
चिकीर्षामि भूभृत्-कृपाभाजनं त्वाम् ।
हठादन्यथा किन्तु दुश्चेष्टमानं
विजानीहि कर्तास्मि रे नामशेषम् ॥४५॥

त्वया नीच निःपातितान्यस्मदीया-
न्यसंख्यानि सन्मन्दिराणि प्रकामम् ।
इति शृण्वता त्वत्प्रियं तद्भवान्या
महन्मन्दिरं ध्वंसितं रे मयाऽपि ॥४६॥

अनाथीकृता मूढ मोहस्मदीया
निजायत्तदेशे त्वया बान्धवा मे ।
तमास्माकसाम्राज्यभागं समस्तं
क्षमायाचनापूर्वमेवार्पयस्व ॥४७॥

उदाराणि चिह्नानि राजोचितानि
श्रुतं धारयस्युच्चकै राजमानी ।
न जानासि किं भूतले हिन्दवीयाः
चिरात् केवलं दासतापात्रभूताः ॥४८॥

विजानीहि सिद्धान्तमेनं विमूढ
चिरं संस्मर त्वं तमान्तं नितान्तम् ।
इयं हिन्दुभूर्भोगभूरस्मदीया
जनाः काफिराः केवलं दासभूताः ॥४९॥

कठोरोग्रदण्डार्हं रे पर्वताखो
चिरादेव यत्तस्करागस्करोऽसि ।
तदाबद्धयाच्ञाञ्जलिः क्षान्तिहेतोः
झटित्यत्र कृष्णातटे मामुपेहि ॥५०॥

द्विः त्रिः पत्रमदो मदोद्धतरिपोराकर्ण्य कर्णन्तुदं
तेजस्वी सहसा बभूव स महारोषानलोद्दीपितः ।
जानन् किन्तु विपन्निपातविषमां कालस्य वक्रां गतिं
तत्कालं सुविवेकवश्यमकरोत् क्रोधोद्धतं स्वं मनः ॥५१॥

आप्तानां वचनानि तत्र सुधियां स्वश्रेयसाकाङ्क्षिणां
शृण्वन्नप्रकटीकृतात्मविकृतिर्भ्रूमात्रभङ्गैरपि ।
तान्यन्तर्निहितानि मातृवचनान्युच्चैरिवाकर्णयन्
धीरः काञ्चिदचिन्तयत् स कुटिलां साङ्ग्रामिकीं योजनाम् ॥५२॥

॥ इति श्रीशिवराज्योदये महाकाव्ये रिपुदूतागमनं नाम २३ सर्गः समाप्तः ।

Scanned by CamScanner

समायासि चेन्मत्समक्षं विनम्रः
चिकीर्षामि भूभृत्-कृपाभाजनं त्वाम् ।
हठादन्यथा किन्तु दुश्चेष्टमानं
विजानीहि कर्तास्मि रे नामशेषम् ॥४५॥

त्वया नीच निःपातितान्यस्मदीया-
न्यसंख्यानि सन्मन्दिराणि प्रकामम् ।
इति श्रुण्वता त्वत्प्रियं तद्भवान्या
महन्मन्दिरं ध्वंसितं रे मयाऽपि ॥४६॥

अनाथीकृता मूढ मोहम्मदीया
निजायत्तदेशे त्वया बान्धवा मे ।
तमास्माकसाम्राज्यभागं समस्तं
क्षमायाचनापूर्वमेवार्पयस्व ॥४७॥

उदाराणि चिह्नानि राजोचितानि
श्रुतं धारयस्युच्चकै राजमानी ।
न जानासि किं भूतले हिन्दवीयाः
चिरात् केवलं दासतापात्रभूताः ॥४८॥

विजानीहि सिद्धान्तमेनं विमूढ
चिरं संस्मर त्वं तमान्तं नितान्तम् ।
इयं हिन्दुभूर्भोगभूरस्मदीया
जनाः काफिराः केवलं दासभूताः ॥४९॥

कठोरोग्रदण्डार्हं रे पर्वताखो
चिरादेव यत्तस्करागस्करोऽसि ।
तदाबद्धयाच्ञाञ्जलिः क्षान्तिहेतोः
झटित्यत्र कृष्णातटे मामुपेहि ॥५०॥

द्विः त्रिः पत्रमदो मदोद्धतरिपोराकर्ण्य कर्णन्तुदं
तेजस्वी सहसा बभूव स महारोषानलोद्दीपितः ।
जानन् किन्तु विपन्निपातविषमां कालस्य वक्रां गतिं
तत्कालं सुविवेकवश्यमकरोत् क्रोधोद्धतं स्वं मनः ॥५१॥
आप्तानां वचनानि तत्र सुधियां स्वश्रेयसाकाङ्क्षिणां
श्रुण्वन्नप्रकटीकृतात्मविकृतिर्भ्रूमात्रभङ्गैरपि ।
तान्यन्तर्निहितानि मातृवचनान्युच्चैरिवाकर्णयन्
धीरः काञ्चिदचिन्तयत् स कुटिलां साङ्ग्रामिकीं योजनाम् ॥५२॥

॥ इति श्रीशिवराज्योदये महाकाव्ये रिपुदूतागमनं नाम २३ सर्गः समाप्तः ।

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये २४ तमः सर्गः ॥

### शिवदूतप्रयाणम्

ततो दिनद्वयेनैव कृष्णाजिमनु तं ययौ ।
प्रतापदुर्गाद् वर्षिष्ठः कश्चिदानतविग्रहः ॥१॥
महाबलेश्वरारण्यं निबिडोन्नतपादपम् ।
विचित्रपुष्पस्तबकप्रोच्छ्वसद्गन्धमादनम् ॥२॥
गन्धासक्तमहाव्यालश्वसनाकृष्टमारुतैः ।
मधुमत्सुमनोगुच्छोच्चालिताखिलषट्पदम् ॥३॥
तुङ्गवल्मीकशिखरस्थितबर्हिभयाकुलैः ।
अन्तर्निलीनभुजगैर्निरुद्धश्वासमारुतम् ॥४॥
गूढप्रसर्पन्नकुलोच्छिन्नमारुण्डसर्पकम् ।
चित्रकागमनाशङ्कात्वरमाणमृगाकुलम् ॥५॥
प्राचीनवृक्षवल्कान्तःकीटाक्रन्दनकर्कशम् ।
मारीचास्वादवाचालशुकजल्पितमञ्जुलम् ॥६॥
अतिशीतमरुत्स्पर्शैः प्रस्फुरद्रदनच्छदम् ।
मुहुर्घट्टितदन्तालीसम्भूतमृदुनिक्वणम् ॥७॥
जगाहे स तदश्रान्तमक्षुण्णपथदुर्गमम् ।
मनुष्यवाह्यमध्यास्य गिर्याक्रमणवाहनम् ॥८॥
पथि यान्तं तमालोक्य नमन्तो गह्वरौकसः ।
भक्त्या सभाजयामासू रामरामेति वादिनः ॥९॥
अभाषमाणः प्रायेण चिन्तामौनमिवाश्रितः ।
पृच्छति स्म क्षणं मन्दं गन्तव्याध्वानमुत्सुकः ॥१०॥
क्षीणेक्षणं क्षणश्रान्तं स कृष्णाजिस्तमब्रवीत् ।
भो पन्ताजिमहाभाग शिबिरं नस्तदीक्ष्यताम् ॥११॥
दूरादेव विभाव्यन्ते शतशस्ते मतङ्गजाः ।
नभःपथपरिभ्रष्टाः पयोदा इव भूगताः ॥१२॥
विभान्ति पवनालोला ध्वजा मरकतत्विषः ।
गाहमाना इवाकाशं शुका रचितपङ्क्तयः ॥१३॥
रणोत्सुकास्तुरङ्गास्ते तुरुष्कविषयागताः ।
विकिरन्ति रजःस्तोमं खुराघातैर्मुहुर्मुहुः ॥१४॥
पर्यन्तभूरियं पूर्वं सकण्टकलतावृता ।
क्रमेलकैस्तैरास्माकैः सद्यो निष्कण्टकीकृता ॥१५॥
अमी च सैनिका वीराश्चिरात् संग्राममलोलुपाः ।
दूराच्चरन्तो वीक्ष्यन्ते पिपीलकगणा इव ॥१६॥

Scanned by CamScanner

सेनाचराणां सर्वेषां युग्मपादचतुष्पदाम् ।
ध्वनिरस्पष्टवर्णोऽयं हुंकार इव जृम्भते ॥१७॥
तैलेषूत्क्वथ्यमानानां गन्धोऽयं घ्राणतर्पणः ।
पलाण्डुलशुनाद्यानां वायुना विप्रकीर्यते ॥१८॥
दक्षिणापथसाम्राज्याधीश्वरस्याखिलं बलम् ।
सुदुष्करप्रतीकारं ज्ञायतामत्र केन्द्रितम् ॥१९॥
सेनापतिरसावस्य शिबिरस्य महाबली ।
प्रतिक्षणं प्रतीक्षेत ममाद्यागमनं ध्रुवम् ॥२०॥
एवमाभाषमाणस्य रिपुप्रतिनिधेर्गिरः ।
अकौतुकोऽपि वृद्धोऽसौ सकौतुक इवाश्रुणोत् ॥२१॥
ततः क्रमेण सम्प्राप्तौ तावुभौ सपरिच्छदौ ।
राजधानीसमं भव्यं शिबिरं भूरिवैभवम् ॥२२॥
विनीतपथखेदं तं शिवप्रतिनिधिं ततः ।
प्रापयामास कृष्णाजिः शिबिराधिपतिं प्रति ॥२३॥
वयोऽतीतोऽपि विप्रोऽसौ शिवदूतो विशेषतः ।
शरणागतवत् सद्यस्तं मुहुर्मुहुरानमत् ॥२४॥
अनन्यसदृशं प्रह्वभावमालम्ब्य कृत्रिमम् ।
दूताङ्गुलिविनिर्दिष्टमभजन्निजमासनम् ॥२५॥
प्रकृत्यानतकायोऽपि पुनरानतमस्तकः ।
अपराधीव सन्तस्थौ तस्य सेनापतेः पुरः ॥२६॥
देहधारीव विनयोऽहंकारस्य तनूभृतः ।
वृद्धोऽसावफझुल्लस्य पुरः स्फुटमभासत ॥२७॥
ततः पप्रच्छ कृष्णाजिमफझुल्लः स्मयादिव ।
कः कस्य किमभिप्रायः कुतस्त्योऽयं जरद्गवः ॥२८॥
तदाकर्ण्यैव वृद्धोऽसावुत्तिष्ठन्नतविग्रहः ।
भालाद् भुवं भुवो भालं मुहुरस्पृशदादरात् ॥२९॥
उवाच स स्वरक्षीणो जगदेकमहाबलिन् ।
स्थविरो भवदग्रेऽयं प्रेषितः शाहसूनुना ॥३०॥
उपायनमिदं किञ्चित् पुरस्कृत्यार्पयत्यसौ ।
पत्रं कृपालवाकाङ्क्षी स भवन्मित्रपुत्रकः ॥३१॥
दासो भोसलवंशस्य मौलोऽहं बोकिलान्वयः ।
गोपीनाथतनूजन्मा पन्ताजिरिति संज्ञितः ॥३२॥
यदिदं शाहपुत्रस्य पत्रमत्र समर्पये ।
भवन्तो हि दयावन्तो भवन्तु तदवेक्षणे ॥३३॥

इत्युक्त्वार्पितमादाय पत्रमुच्चैरवाचयत् ।
स्वामिनोऽग्रे स कृष्णाजिः संस्कारस्वच्छया गिरा ॥३४॥

अगणितगुणशालिन् सिंहसामर्थ्यधारिन्
सकलरिपुविदारिन् सूर्यचण्डप्रतापिन् ।
विहतमतिरनेकागस्करो बालकोऽयम्
अभिलषति भवत्तो तात नर्ते क्षमायाः ॥३५॥

प्रखरतरकृपाणोच्छिन्नदुर्दान्तशत्रु-
स्फुटितवपुरुदीर्णासृक्परिक्लिन्नभूमे ।
न खलु न खलु जातो वाऽथ जायेत कश्चिद्
भवदुरुतमकीर्तिं यः समर्थः प्रमार्ष्टुम् ॥३६॥

पितृसख! भवदीयाद् दर्शनाद् वञ्चितोऽस्मि
चिरमहमतिदूरे पर्वतारण्यवासी ।
समुदितमिव मन्दं हन्त मे भागधेयं
स्वयमिह निकटं यद् ग्रामभागादिदानीम् ॥३७॥

गिरिधरणिसमुद्रारण्यदुर्गाः समग्राः
मम वशमिव याता ग्रामका ये च केचित् ।
ननु भवदधिराज्यान्तर्गतांस्तत्त्वतस्तान्
स्वयमहमुपहारीकर्तुमीहेऽत्र गेहे ॥३८॥

मम वसतिपदं यत् तत् तु यौष्माकमेव
निजसदनमुपेतुं कस्य नात्राभिलाषः ।
समभिमतपितृव्ये दुर्लभातिथ्ययोगे
भवति गृहमुपेते स्यान्महोऽभूतपूर्वः ॥३९॥

करितुरगपदातीनात्मनीनान् समस्तान्
उपवहतु भवान् मत्प्रार्थनां मानयित्वा ।
सुखमिह भवदीये शीतवाते प्रदेशे
मदनुचरकृतां तेऽप्यर्हणां प्राप्नुवन्तु ॥४०॥

यदपि हि भवदन्तःप्रीतिदं भोग्यजातं
तदखिलमिह यावच्छक्ति सम्पादयामि ।
निजसदनमुपेते प्राकृतेऽप्यस्मदीया
विदधति खलु पूजां किं पुनः स्वे पितृव्ये ॥४१॥

इति शृण्वत एवास्य शिवपत्रं प्रसेदुषः ।
इङ्गितज्ञः पुरस्तिष्ठन् वृद्धः प्राञ्जलिरब्रवीत् ॥४२॥

क्षम्यतामिदमेतन्मे वीरशार्दूल जल्पितम् ।
स्वामिलेखे स्थिते वाचो भृत्यस्याप्रस्तुताः खलु ॥४३॥
तथापि हृद्गतं किञ्चिल्लेखनानर्हमात्मनः ।
स्वामिना मयि निक्षिप्तं तदहं वक्तुमुत्सहे ॥४४॥
विजापुरीयसाम्राज्यच्छत्रदण्ड ! महाबलिन् ।
पत्रं प्रदीर्घमप्यन्तर्भावं नाविष्करोत्यलम् ॥४५॥
या भक्तिर्याऽथवा श्रद्धा पत्रेऽस्मिन्नन्वसूच्यत ।
तत्सहस्रगुणा नूनं स्वामिनो हृदि वर्तते ॥४६॥
प्रकृत्यैव न धीरोऽसौ युद्धभीरुर्विशेषतः ।
अनारतमतो दुर्गानाश्रित्यायुर्निनीषति ॥४७॥
तदीयानुचरंमन्या वन्या धाष्टर्यं प्रकुर्वते ।
तुदत्येव महापापं तदन्तस्तस्य सन्ततम् ॥४८॥
हन्त ! मासद्वयात् पूर्वं भार्या तस्य दिवंगता ।
ततः प्रभृति दुःखार्तः स कष्टं खलु जीवति ॥४९॥
न मौक्तिकं न माणिक्यं न स्वर्णं न महाधनम् ।
मनो रमयते तस्य भग्नाशस्य कथञ्चन ॥५०॥
वित्तजातं परित्यज्य दूरं जिगमिषत्यसौ ।
गङ्गातीरं घनारण्यं वा हिमालयगह्वरम् ॥५१॥
गाढदुःखतया कंचित् स्वयं द्रष्टुं न वाञ्छति ।
निजेऽपि सद्मनि प्रायः पारक्ये हन्त किं पुनः ॥५२॥
दिदृक्षति स्म वर्षादौ स भवन्तमुपेत्य च ।
कुण्ठितः किन्तु हन्तासौ प्रावृषा भूरिवर्षया ॥५३॥
यो नदीमातृकः कश्चिद् योऽथवा देवमातृकः ।
पितृपैतामहो भागस्तं सर्वं दातुमिच्छति ॥५४॥
किन्तु तद् भवतः पत्रं दृष्ट्वा रोषप्रदर्शकम् ।
प्रवेपतेतरामन्तर्नित्यं प्रकृतिकातरः ॥५५॥
तत् कृपासागरः श्रीमान् विस्मृत्यागांसि सर्वथा ।
निजदर्शनपात्रत्वं सुहृत्पुत्रं नयन्तु तम् ॥५६॥

इत्येवमादिभिरनेकविधैर्वचोभिः
वंशीस्वरैरिव मनोहरमन्त्रगर्भैः ।
द्रागाहितुण्डिकसमः स्थविरः स धीमान्
शत्रुं भुजङ्गममिवात्मवशं निनाय ॥५७॥

॥ इति श्रीशिवराज्योदये महाकाव्ये शिवदूतप्रयाणं नाम
२४ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये २५ तमः सर्गः ॥

## अफझुल्लव्यामोहः

स वृद्धवाक्यव्यामूढशेमुषीको बलोद्धतः ।
म्लेच्छसेनापतिः शीघ्रमग्रे प्रस्थातुमैहत ॥१॥
सर्वानाकार्य सेनाङ्गधुरीणान् सहकारिणः ।
सोल्लासं सहसैवोच्चैर्निजगाद निजं मतम् ॥२॥
अत्युत्तुङ्गं दुराक्रम्यमाक्रम्य गिरिकाननम् ।
महाबलेश्वराख्यं तां प्रवेक्ष्यामि जयावलिम् ॥३॥
सर्वथा दुष्प्रवेशासावरण्यानीति कथ्यते ।
यैः कैश्चिदपि ते सर्वे मता मेऽरण्यपण्डिताः ॥४॥
कपयः काफिराणां चेल्लङ्घयन्ति महाम्बुधिम् ।
तत् किं नायमरण्यानीं लङ्घयेत् पुरुषोत्तमः ॥५॥
शरणागतकल्पं तं मन्नामश्रवणादिव ।
शत्रुं धृत्वाऽथवा बध्वा हरिष्यामि विजापुरम् ॥६॥
अपराजितपूर्वस्य शत्रोर्लीलापराजये ।
एक एवाद्वितीयोऽहं शक्तोऽत्र धरणीतले ॥७॥
सेयं ममोज्ज्वला कीर्तिर्भविष्यत्यधिकोज्जला ।
विना युद्धं विजित्यैनं शाहसुनुं हरिष्यतः ॥८॥
तत् समारभ्यतामुच्चैः सम्पर्याणमहोत्सवः ।
विनैवाजिं यदस्माभिः शिवाजिः खलु निर्जितः ॥९॥
पिबन्तु सैनिकाः सर्वे यथेच्छं मदिरासवम् ।
नृत्यन्तु वेश्या गायन्तु बन्दिनो मत्पराक्रमम् ॥१०॥
काफिराणां हि परितः शिबिरं यानि कानिचित् ।
मन्दिराणि विभज्यन्तां लघूनि च महान्ति च ॥११॥
यावदिच्छं निहन्यन्तां गावो भोज्यार्थमात्मनः ।
प्रसन्नोऽहं विना युद्धं शिवाजिर्यत् पराजितः ॥१२॥
सत्वरोष्ट्राधिरूढास्ते जयवार्ताहरा मम ।
राजधानीं द्रुतं यान्तु पूर्णपात्रं हरन्तु च ॥१३॥
जयसम्मदमत्तं मे मनस्त्वरयतीव माम् ।
स्वयं वृत्तमिदं वक्तुं सोत्कण्ठां राजमातरम् ॥१४॥
प्रसेदुषो नृपालस्य मुखपद्माद् विनिःसृताः ।
सहस्राशीर्गिरः श्रोतुं मध्येराजसभं तथा ॥१५॥

अगृहीत्वा परं शत्रुं बन्दिग्राहमपेक्षितम् ।
इच्छन्नपि न गच्छामि ह्येकाकी स्वामिसम्मुखम् ॥१६॥
अहो पुण्यमहो पुण्यं हिन्दुदैवतनाशनम् ।
यत् तद्भक्तोऽपि दुर्दान्तो विना युद्धं विजीयते ॥१७॥
अहो भाग्यमहो भाग्यं साम्राज्यस्य ममापि च ।
उत्तिष्ठमाना लीयन्ते शत्रवो यस्य सत्वरम् ॥१८॥
अहो सौख्यमहो सौख्यं निर्बद्धवपुषो रिपोः ।
भग्ननालमिवाम्भोजं म्लानं मुखमवेक्ष्यते ॥१९॥
इत्येवमफझुल्लस्य श्रुत्वा सम्मदजल्पितम् ।
धीरा अनुचराः केचिदब्रुवन् विनयानताः ॥२०॥
वीरोत्तम तवानन्ददानन्दोऽस्माकमुच्चकैः ।
सेवकानां प्रमोदाय मोदो हि स्वामिनः सदा ॥२१॥
कस्तवाद्भुतवीर्यस्य तुलामर्हति भूतले ।
स्वयं शरणतां यान्ति शत्रवो यस्य दुर्मदाः ॥२२॥
तवाशक्यप्रतीकारं विज्ञायाक्रमणं पुरा ।
स्वयमात्मानमाबध्य सोऽम्बरः शरणं ययौ ॥२३॥
तथैवायं भयग्रस्तः शिवाजिर्गिरिमूषकः ।
नाश्चर्यं यदि सम्प्राप्तः स्वयं हि शरणं तव ॥२४॥
यस्मिन्नेव क्षणे सूर्यः स उदेतुं प्रवर्तते ।
क्षणशः कणशस्तस्मिंस्तमसा हि विशीर्यते ॥२५॥
विजिगीषोर्बलाढ्यस्य प्रमत्ता अपि शत्रवः ।
स्वयमात्मानमाघ्नन्ति प्रद्रवन्ति नमन्ति वा ॥२६॥
किन्तु शीघ्रातिशीघ्रं चाप्यारादपि यियासुना ।
कर्दमे चान्धकारे च नाधेयः सहसा पदः ॥२७॥
अधिराजो हि धूर्तानां शिवाजी रिपुरेष ते ।
मायावी कपटी चेदृङ् न भूतो न भविष्यति ॥२८॥
यदि सत्यं प्रभीतोऽसौ सर्वस्वमपि दित्सति ।
स्वयमभ्येत्य तत् कर्तुं कुतो जिह्रेति निस्त्रपः ॥२९॥
नाद्यावधि श्रुतो दृष्टश्चैतादृक् शरणागतः ।
यः शरण्यं स्वयं गन्तुं बिभेति न तु लज्जते ॥३०॥
अरण्यानी च सा तादृग् गर्तगुल्मदुराक्रमा ।
यत्रालं चरितुं शाखामृगा वा शिवसैनिकाः ॥३१॥
एवं सम्भाषमाणेषु तेषु वृद्धः स आययौ ।
पुनरभ्यर्थनां काञ्चिद् वक्तुं सेनापतिं प्रति ॥३२॥

Scanned by CamScanner

नैसर्गिकं विनम्रत्वं कृत्रिमानतिविभ्रमैः ।
सहस्रगुणितं कुर्वन् स प्राह नतविग्रहः ॥३३॥
विजापुरीयसाम्राज्यमहारथधुरन्धर !
भवद्भ्रातृव्यसन्देशात् पुनरस्मि समागतः ॥३४॥
भवादृगतिथेः सम्यक् सपर्यार्थं स वाञ्छति ।
क्रेतुं रत्नानि भूयांसि रात्निकेभ्यः कुतश्चन ॥३५॥
सुवर्णरत्नालङ्कारवणिजो बहवः खलु ।
भवत्सेनाचरा दृष्टा मया सञ्चरताऽत्र ते ॥३६॥
तानहं नेतुमिच्छामि भवदाज्ञावशंवदः ।
पितृव्यपूजालङ्कारान् भ्रातृव्योऽसौ विचेष्यति ॥३७॥
तत्तथा प्रार्थितं तस्य वृद्धस्याकर्ण्य हर्षितः ।
सतिरस्कारमैक्षिष्ट दृप्तोऽसौ हितवादिनः ॥३८॥
पृष्ठमास्फाल्य वृद्धस्य साट्टहासं जगाद सः ।
अफझुल्लः प्रसन्नोऽयं तथैवास्तु यथेच्छसि ॥३९॥
तदीयानुमतिप्राप्त्या तुष्टात्मा स्थविरो हि सः ।
मुहुर्मुहुर्नमस्कृत्य निर्जगाम यथागतम् ॥४०॥
हितोपदेशिनः सर्वान् धिक्कर्तुं पुनरब्रवीत् ।
शूराणामुपदेशाय न षण्ढाः खलु पण्डिताः ॥४१॥
निवर्तध्वमितो मूढा सद्य एव ममाग्रतः ।
वृद्धः सखाऽयं मे ब्रूयाद् यत् तदेव करिष्यते ॥४२॥
जानामि कातराः प्रायः कातरत्वं हृदि स्थितम् ।
संक्रामयन्ति धीरेषु स्वरोगं रोगिणो यथा ॥४३॥
तदहं भीरुवाक्यानि मन्त्रतन्त्रयुतान्यपि ।
नाकर्णयितुमिच्छामि गीतानि बधिरो यथा ॥४४॥
मूर्खो भीतः स मे शत्रुः कथमत्रागमिष्यति ।
भीतोऽप्याखुर्बिडालस्य स्वयमायाति किं मुखे ? ॥४५॥
तत् प्रयातुमितः शीघ्रमाकाङ्क्षामि जयावलिम् ।
संवर्धयितुमत्युच्चैरात्मनो विजयावलिम् ॥४६॥
प्रयाणात् पूर्वमानन्दोत्सवोऽत्रैव प्रवर्तताम् ।
उत्सवेन महोत्साहो निरुत्साहेषु जायते ॥४७॥
चिरादेकत्र वास्तव्यादलसत्वं विजृम्भते ।
अलसत्वविलोपाय ह्यलं खलु महोत्सवः ॥४८॥
बलं प्रबलमभ्येति निर्बलत्वं विनाऽऽहवम् ।
सेनाधिपतयस्तस्मान्मादृशा हि युयुत्सवः ॥४९॥

Scanned by CamScanner

युद्धाभावे युयुत्साऽसौ पूर्यते विजयोत्सवैः ।।
आरम्भेऽन्ते हि युद्धस्य कर्तव्या विजयोत्सवाः ।।५०।।
राजधानीं स नीयेत यदा बद्धो रिपुर्मम ।
अभूतपूर्वो जायेत तत्राप्यन्यस्तदोत्सवः ।।५१।।
विजापुरीया वक्ष्यन्ति शिवाजिं वीक्ष्य बन्दिनम् ।
गाधते मूर्खपुत्रोऽयं दुरन्तां पितृपद्धतिम् ।।५२।।
मुस्तफेन पिता बद्धो मूढस्यास्य पुरा यथा ।
धन्योऽफझुल्लो येनायं पुत्रो बद्धोऽधुना तथा ।।५३।।

इत्येवं बहुविधजल्पनाविकल्पैः
आत्मानं स्वयमतितुष्टुवेऽफझुल्लः ।
लोकेऽस्मिन् नियतिहतस्य पूरुषस्य
धीरादौ प्रतिपदमेति वैपरीत्यम् ।।५४।।

।। इति श्रीशिवराज्योदये महाकाव्ये अफझुल्लव्यामोहो नाम
२५ तमः सर्गः समाप्तः ।।

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये २६ तमः सर्गः ॥
## व्यूहरचना

ततः शिवाजिमाबद्धुं सजीवं वाऽपजीवितम् ।
द्रढिष्ठनिश्चयः क्रूरोऽफझुल्लोऽसौ पुरो ययौ ॥१॥
गिरिप्रदेशसञ्चारानभ्यासात् तस्य सैनिकाः ।
पदे पदे स्खलन्तोऽपि सम्प्रचेलुः पुरः पुरः ॥२॥
स्खलतां तुरगोष्ट्राणां करिणां च विशेषतः ।
हेषाक्रन्दनचीत्कारैम्बरं व्यापि कर्कशैः ॥३॥
कूपकुण्डसरिद्धाराविहीने तत्र कानने ।
तृषार्तैः पशुभिर्लीढा अन्योन्यस्वेदबिन्दवः ॥४॥
गवेषमाणाः सोत्कण्ठं जललेशमितस्ततः ।
तृषार्ताः सैनिकाः सर्वे लिलिहुर्निजसृक्कणीः ॥५॥
दुरारोहं दुराक्रम्यमत्युच्चैर्गिरिकाननम् ।
विगाहमानं श्रान्तं तद् बलं बलवतामपि ॥६॥
जलाशयसमीपस्थं जटिलारण्यमध्यगम् ।
शिबिरस्थानमभ्येत्य सैनिकास्ते विशश्रमुः ॥७॥
तेषां सुखोपभोगार्थमातिथ्यार्थं च सर्वशः ।
भोग्यं भोज्यं च बहुधा शिवादेशादकल्प्यत ॥८॥
चिरात् क्षुधाऽतिमात्रं ते व्याकुला म्लेच्छसैनिकाः ।
भृशघस्मरभावेन ह्यनुचक्रुर्बकासुरम् ॥९॥
पानीयमपिबन् केचिदतिमात्रं तृषातुराः ।
तानाश्चर्यवदैक्षन्त पानशौण्डाः क्रमेलकाः ॥१०॥
विश्रान्तं तत्र सेनानीमफझुल्लं तदा ययौ ।
शिवादेशादसौ दूतो वयोऽतीतः प्रियंवदः ॥११॥
मुहुर्मुहुः प्रणम्यैनं विनयातिशयादिव ।
कथयामास वृत्तान्तं वृत्तज्ञः स यथोचितम् ॥१२॥
जगाद च स्वसामर्थ्यविश्वस्तं तं विवेकवान् ।
वीरवर्य मम स्वामी बिभेति भवतो भृशम् ॥१३॥
भवद्दर्शनलाभार्थी स स्वयं चिरकालतः ।
हन्त तं प्रतिबध्नाति तदीयं कातरं मनः ॥१४॥
सत्कार्येऽपि प्रवृत्तस्य प्रतीपं चेद् भवेन्मनः ।
स पराधीनवत् प्रायः कर्ता कार्यान्निवर्तते ॥१५॥

अतः स मन्मुखेनैतत् प्रार्थयत्येकमेव वः ।
यदितः कृपया तत्र श्रीमद्भिरभिगम्यताम् ॥१६॥
पतनेयमिहैवास्तु सदातिथ्यैश्च तुष्यतु ।
विश्राम्यतु सुनिश्चिन्तं का चिन्ता विषये स्वके ॥१७॥
अध्यास्य शिबिकायानं श्रीमद्भिः शस्त्रशालिभिः ।
स्वयमभ्येत्य तद्गेहं दर्शनं तस्य दीयताम् ॥१८॥
सेवकानां द्वयं वाऽथ त्रयमावश्यकं यदि ।
तत्र यातु सुखेनैव श्रीमता सह शस्त्रभृत् ॥१९॥
दशाऽन्येऽप्यनुगच्छन्तु सैनिकाः शस्त्रपाणयः ।
प्रत्येकं येषु शक्तः स्यात् पराजेतुं शताधिकान् ॥२०॥
विजापुरीयसाम्राज्यशिरस्त्राण ! महाबलिन् ।
ते कुर्वन्तु भवत्त्राणमिति मूर्खोचितं वचः ॥२१॥
यथाक्रमं ते तिष्ठेयुर्बाणप्रक्षेपणान्तरे ।
बलवन्तो न वाञ्छन्ति स्थानं समबलैः समम् ॥२२॥
कातरत्वान्मम स्वामी खड्गं धत्ते दिवानिशम् ।
तत् खड्गालङ्कृतः प्रायो दर्शनार्थं स एष्यति ॥२३॥
भीरोस्तदस्तु खड्गोऽसौ कटिस्थो वा करोद्धृतः ।
न जातु जायते भीरौ शस्त्रयोगेन शूरता ॥२४॥
भवदीया इवायान्तु तदीया दश सैनिकाः ।
एकैकशस्ते तिष्ठेयुर्बाणप्रक्षेपणान्तरे ॥२५॥
भवदातिथ्यसत्कारोचितः सत्पटमण्डपः ।
उपत्यकायां स्वावासदुर्गस्य स्वामिना कृतः ॥२६॥
यद्यदारण्यकायत्तं मण्डपानां प्रसाधनम् ।
तत् तत् सर्वं समायोजि स्वयं तेन सकौशलम् ॥२७॥
सुरम्ये मण्डपे तस्मिन् प्रागस्तु श्रीमदागमः ।
पश्चादसौ यथाकालं दर्शनार्थमुपेष्यति ॥२८॥
श्रीमतां परिचर्यार्थं तत्रायातु नरद्वयम् ।
नैकाकिनो हि श्रीमन्तः यान्ति क्वापि कदाचन ॥२९॥
सेवकद्वयमागच्छेत् स्वामिनाऽपि समं तथा ।
प्रयोजनं न चेत् किञ्चित् न तन्मण्डपमाविशेत् ॥३०॥

---

आग्रहायणिके शुक्लसप्तम्यां गुरुवासरे ।
मध्यन्दिनेऽस्तु भवतोश्चिराकाङ्क्षितमेलनम् ॥३१॥

Scanned by CamScanner

मेलने ।
गतायुरहमाशासे भवतोरत्र मेलने ।
*निरपायं शिवं सर्वलोकस्यास्य प्रियं सदा ॥३२॥
निःशङ्कमिदमाकर्ण्य शिवदूतस्य भाषितम् ।
प्रतिशुश्राव धीरोऽसौ सर्वमेव तदीहितम् ॥३३॥
मेने च येन केनापि प्रकारेण पुरःस्थितम् ।
रिपुमेनं विनिर्बध्य वक्ष्यामि नृपमातरम् ॥३४॥
तदशङ्कमिदं सर्वं समये समयोचितम् ।
स स्वीचक्रे महाशक्तिस्तिमिङ्गल इवामिषम् ॥३५॥
शिवाजिश्च तदा काले कुर्वन्नाजिनियोजनम् ।
एकान्ते मन्त्रयाञ्चक्रे सुहृद्भी रणपण्डितैः ॥३६॥
कांश्चिज्जयावलीदेशाच्छादिनीं सोऽतिभीषणाम् ।
विगाहितुमरण्यानीं सङ्ग्रामार्थमदीदिशत् ॥३७॥
अपरान् गिरिसञ्चारगूढाध्वानं सुदुर्गमम् ।
निरोद्धुमादिशत् सर्वं हन्तुं शत्रुं पलायितम् ॥३८॥
अन्यानाज्ञापयामास वृक्षशाखासु गूहितुम् ।
संकेतध्वानमाकर्ण्य शत्रुवर्गेषु कूर्दितुम् ॥३९॥
इतरानादिशन्नानाच्छद्मरूपैः प्रसर्पितुम् ।
उदन्तजातं विज्ञातुं रिपुसेनागतं द्रुतम् ॥४०॥
नेताजिप्रमुखाः सर्वे शिवसैन्यधुरन्धराः ।
यथादेशं यथाकालं तस्थुरास्कन्दनोत्सुकाः ॥४१॥
यथा यथा सा निकषा निश्चिता तिथिराययौ ।
शिवराजचमूव्यूहो ययौ स्थैर्यं तथा तथा ॥४२॥
सा तिथिः कालकन्येव प्रेतनाथवशंवदा ।
निमिषे निमिषे नूनं तत्त्वरे कार्यसिद्धये ॥४३॥
मृत्योरखण्डिताज्ञस्य विशेषाज्ञेव सा तिथिः ।
ससैन्यमफझुल्लं तं निजायत्तमिवाकरोत् ॥४४॥
अस्तंगतायां पूर्वस्यां तिथौ षष्ठ्यां स भावुकः ।
धर्मकर्म समारेभे यतो धर्मस्ततो जयः ॥४५॥
राजोपाध्याय-सम्प्रोक्तैः श्रुतिमन्त्रैरखण्डितम् ।
रुद्राभिषेकं विदधौ भक्त्येकाग्रेण चेतसा ॥४६॥

---

* सर्वलोकस्य प्रियं शिवं (शिवराजं) सदा निरपायम् आशासे इत्यन्वयमुखेन हृद्गतः श्लिष्टार्थो व्यज्यते ॥

Scanned by CamScanner

जातीचम्पकपद्मानि बिल्वपत्राणि भक्तितः ।
ॐ नमः श्रीशिवायेति जपन्नार्पयदानतः ॥४७॥

जगौ श्रीशङ्कराचार्यैरचितं मधुरस्वरम् ।
शिवमानसपूजायाः स्तोत्रं भक्तिरसायनम् ॥४८॥

विदधौ च परापूजां ध्यानसम्पुटितेक्षणः ।
आत्मन्यात्मानमुत्पश्यन् राजयोगी हि कोऽप्यसौ ॥४९॥

तं कर्तुमन्यथाकर्तुं समर्थं खलु लीलया ।
चिरादाराध्य विश्वेशं कथयामास काङ्क्षितम् ॥५०॥

देवाधिदेव सचराचरविश्वनाथ !
सद्धर्मरक्षणकृते कृतनिश्चयाय ।
त्वद्भक्तिमात्रपरशक्तियुजे शिवाय
दासाय देहि भगवन् जयमेव नित्यम् ॥५१॥

॥ इति श्रीशिवराज्योदये महाकाव्ये व्यूहरचना नाम
२६ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये २७ सर्गः ॥
## शिवप्रयाणम्

अथाफझल्लः स्मयदूषतोऽसौ स्वहस्तबद्धं रिपुमीहमानः ।
प्रतापदुर्गं प्रति संप्रयातुं दिनोदयादेव भृशोत्सुकोऽभूत् ॥१॥
स प्रातराशं मधुमद्यपूर्णं गोमांसभोजी सहसा समाप्य ।
सेनाविभागाधिकृतः समस्तान् निजाधिवासे द्रुतमाजुहाव ॥२॥
तेष्वागतेष्वाहितसम्मदेषु स्वकार्यसिद्धावपसंशयेषु ।
मुहुर्मुहुः प्रस्फुटगूढहासः स वीरमानी गिरमुज्जगार ॥३॥
अद्यागतोऽसौ दिवसश्चिरेण प्रतीक्षितो यो हि मयाऽऽतुरेण ।
यदर्थमत्यन्तमचिन्तयध्वं यूयं च सर्वे निजधामकामाः ॥४॥
अद्यापराह्णे तमरिं शिवाजिं तुरङ्गमारुढमपि प्रसह्य ।
संदृष्टमात्रं स्वकरेऽवबध्य युष्मत्समक्षं स्वयमाहरामि ॥५॥
किंवा मदालोकनभीतभीतं पुरःस्थितं तं परिकम्पिताङ्गम् ।
कण्ठे वितस्त्या सहसाऽवगृह्णन् उत्क्षिप्य निक्षिप्य विनर्तयामि ॥६॥
प्रणामहेतोर्नतमस्तको वा भवेदसौ चेन्मम सम्मुखीनः ।
पृष्ठेऽञ्जसा तस्य तदैव हन्यां प्राणापहर्त्रीं निजवज्रमुष्टिम् ॥७॥
रीतिं स्वजातेरथवानुसृत्य मत्पादसंस्पर्शमसौ चिकीर्षन् ।
जायेत चेदानतपूर्वकायः पुनर्न चोत्स्थास्यति तस्य कायम् ॥८॥
क्षमामसौ याचितुमात्मबाहू प्रसार्य चेदेष्यति मत्पुरस्तात् ।
आक्षिप्य वेगादुभयौ भुजाभ्यामुत्पाटयिष्यामि हि मूलतस्तौ ॥९॥
किं वा मदाश्लिष्टतनोरमुष्य खर्वस्य मूर्धानमखर्वशक्त्या ।
कुक्षौ विनिष्पेष्य झटित्यहं तं मूर्च्छान्धकूपे खलु पातयामि ॥१०॥
आरादसौ दृष्टिपथं मदीयं कुतश्चिदायास्यति चेद् विमूढः ।
तीव्रासिपुत्रीं कटिपट्टगूढां क्षेप्तास्मि तद्-वक्षसि तन्निमेषे ॥११॥
एवं स मत्तो मदिरातिरेकात् सहावभावं बहुधा प्रजल्पन् ।
हसन्मुहुस्तानधिकारिणोऽपि प्रहासयामास विवेकहीनान् ॥१२॥
दुर्भागधेयाहतशेमुषीका यथेच्छमापीय मधूनि तत्र ।
उत्प्रेक्षमाणा विजयोत्सवं तं विजापुरे भाविनमारमंस्ते ॥१३॥
ज्ञात्वा प्रयाणावसरं तदानीमाज्ञापयत् तेषु महाबलाढ्यान् ।
पर्याणकालोचितवस्त्रशस्त्राण्याधाय मत्पार्श्वमुपेत चेति ॥१४॥
स चात्मदेहे लघुपर्वताभे वासांसि सौवर्णमृगाङ्कितानि ।
कस्तूरिकागन्धमनोहराणि दधौ निगूढच्छुरिकाणि वीरः ॥१५॥

उष्णीषमाधाय निजाधिकारोचितं शिरस्युज्ज्वलरत्नशोभि ।
आलोकितुं स्वीयमुदाररूपं स दर्पणाग्रे स्थितवान् मुहूर्तम् ॥१६॥
स दुष्टबुद्धिः सहसाट्टहासं कुर्वन्मुहुर्दर्पणसम्मुखस्थः ।
आज्ञापयामास च सैनिकानां सहस्रमायातु मया सहेति ॥१७॥
वीराः सहस्रं धृतभीषणास्त्राः शिरस्त्रसन्नाहसुगुप्तकायाः ।
उद्धूनयन्तश्चरणप्रहारैर्भुवो रजःस्तोममदभ्रमायन् ॥१८॥
निस्साणढक्कापणवानकानां निर्ह्रादमुच्चै रणतूर्यकाणाम् ।
विजृम्भमाणं सहसा निशम्य द्रागाययौ वीतभयः स एव ॥१९॥
तस्याफझुल्लस्य महार्हवेशं महाप्रभावं च भृशं प्रशंसन् ।
स वाक्पटुः सस्मितनर्मभाषी जगाद बद्धाञ्जलिरानताङ्गः ॥२०॥
सहस्रसिंहप्रखरप्रभाव वीराग्रगण्य प्रथितोरुकीर्ते ।
अनीकिनीयं विधृतास्त्रशस्त्रा समुद्यता यातुमितः किमर्थम् ? ॥२१॥
एकाकिनं चापि भवन्तमेकं यो द्रष्टुमीष्टे न हि भूरिभीरुः ।
शस्त्रास्त्रसन्नद्धसहस्रवीरपरीतमीक्षेत कथं समक्षम् ? ॥२२॥
आयातु स युष्मत्समयानुसारं श्रीमन्त आयान्तु च तद्वदेव ।
अनीकिनीदर्शनजातभीतिः न जातु गेहात् स बहिर्निरीयात् ॥२३॥
सम्पद्यमानं सुचिरेण साध्यं विपद्यते चेल्लघुनो निमित्तात् ।
विवेकिना तद्विविधप्रयत्नैः हर्तव्यमेवेति हि नीतिरीतिः ॥२४॥
प्रवीर युष्मद्भुजदण्डवीर्यं भेत्तुं क्षमं यद् गजगण्डपिण्डम् ।
पदातिभिः संशयहेतुभूतैः अलं तदेभिर्बलिभिः समस्तैः ॥२५॥
तन्मानयिष्यन् बहु वृद्धवाक्यम् अनागतिं चापि रिपोर्विशङ्क्य ।
इतो निवर्तध्वमिति स्ववीरान् प्राह स्म सर्वानपि सोऽभिमानी ॥२६॥
क्षणान्निवृत्तेषु ततः स तेषु चतुर्नृवाह्यं चतुरस्रयानम् ।
अध्यास्य कामं गमनोत्सुकोऽभूत् स्वकार्यसिद्धिं द्रुतमाप्तुकामः ॥२७॥
तमन्वगच्छन्नधिकारिणोऽपि कृष्णाजिमुख्याः समयानुसारम् ।
येषामसाधारणशक्तिमत्वाद् बण्डाभिधानोऽभवदग्रयायी ॥२८॥
वृद्धः स तैः साकमभिप्रतस्थे विलोक्य सर्वं स्वमतानुकूलम् ।
दध्यौ च भाग्योदयमुत्प्रसन्नः शिवस्य सद्धर्मधुरन्धरस्य ॥२९॥
अथातिवेलं कुलदेवताया ध्याने मनः स्वं प्रणिधाय भक्त्या ।
प्रस्थानकालं समया समीक्ष्य शिवोऽपि पूजामुपसञ्जहार ॥३०॥
सवत्सधेनूनि सकाञ्चनानि सधान्यराशीनि सभूषणानि ।
दानानि भूयांसि स दानशीलः भक्त्या यथेच्छं द्विजसाच्चकार ॥३१॥



Scanned by CamScanner

नतेन मूर्ध्ना जगृहे च तेषाम् अवन्ध्यवाचां हृदयप्रकीर्णाः ।
दीर्घायुरारोग्यजयप्रदात्रीः शुभाशिषो मन्त्रमयीरगण्याः ॥३२॥
भुक्त्वा च नैवेद्यगतं पवित्रं दध्योदनं किञ्चन पूतभोजी ।
आचामदल्पाल्पमनेकवारं गङ्गादितीर्थोपहृतं च तोयम् ॥३३॥
व्यायामसंस्कारदृषत्कठोरे दधौ शरीरेऽपि स रक्षणार्थम् ।
सूक्ष्मं दृढायःकवचं सुगूढं स्वदेहगुप्तिः प्रथमा हि नीतिः ॥३४॥
ततः शरच्चन्द्रमरीचिजाललसद्धिमानीधवलं सुवासः ।
कौषेयमत्यन्तमृदु प्रकृत्या दधौ स्वदेहे कवचद्रढिष्ठे ॥३५॥
काश्मीरजोन्मिश्रिततोयबिन्दूत्संसिञ्चनापादितकान्तकान्ति ।
वासो वसानस्तदतीव शुभ्रं स पारिजात्यां सुषमां जिगाय ॥३६॥
शिरस्त्रसंरक्षितशीर्षभागे बबन्ध चोष्णीशमतीव चारु ।
यस्मिन् स माणिक्यमणिप्रकाशो विलोलमुक्तास्तबकोऽतिरेजे ॥३७॥
कपाटवक्षस्यभिमानतुङ्गे प्रवालशोणीकृतमौक्तिकालीम् ।
नैसर्गिकीं सत्त्वरजःप्रवृत्तिं प्रदर्शयन्तीमिव संबभार ॥३८॥
म्लेच्छाधमानामतिघोरकृत्यैः संधुक्षमाणस्य नितान्तमन्तः ।
क्रोधानलस्येव हि धूम्रलेखा श्मश्रुप्रवृद्धिर्वदने विरेजे ॥३९॥
सुश्यामलश्मश्रुणि कान्तवक्त्रे रराज तत् कुण्डलयुग्ममच्छम् ।
नीलाम्बुदाच्छन्ननभोविभागे मन्दं विगाहीव बलाकयुग्मम् ॥४०॥
जीवाभिधानेन सुहृद्वरेण पात्रोपनीता च्छुरिका विषाक्ता ।
न्यधायि गूढं सहसा भुजत्रे रहस्यवार्तेव सुगोपनीया ॥४१॥
आभूषणं व्याघ्रनखानुकारि करे सुगूढं बिभरांबभूव ।
अरौ पुरस्तादसुरायमाणे नृसिंहसादृश्यमिवाधिगन्तुम् ॥४२॥
कृपाणिमेकेन दधत् करेण ह्यन्येन सत्पट्टिशमुग्रधारम् ।
आलोकयामास निजस्वरूपम् आदर्शबिम्बे विमले हृदीव ॥४३॥
नवस्वराज्यप्रलयोद्यतस्य क्रौर्यप्रसिद्धस्य रिपोरमुष्य ।
संपर्कहेतोर्बहिरापतन्तं शिवं सखायः परितः प्रतीयुः ॥४४॥
प्रेमादरात् गद्गदिकावरुद्धवचःप्रसाराः मुहुरुच्छ्वसन्तः ।
प्रणामनम्राः गलदश्रुधारा एकैकशस्ते शिवमूचुरेवम् ॥४५॥

"स्वामिन्! प्रसीद सदयो भव मय्यनन्ये
त्वत्पादपूजनसमर्पितजीवभावे ।
रुष्टोऽसि किं प्रणतदासजने स्वकीये
कृच्छ्रे प्रयासि यदितः स्वयमेकलस्त्वम् ॥४६॥

भ्रूभङ्गमात्रमथवा तव दृङ्‌निपातं
निर्हेतुकस्फुरणमप्यमुना मया हि ।
मत्वाऽनिशं खलु निदेशमलङ्घनीयं
किं किं न दुर्घटमकारि न देव कार्यम् ॥४७॥

भूयस्सु सत्सु वचनस्थितकिङ्करेषु
संकेततोऽपि हि तृणीकृतजीवितेषु ।
न स्वामिनो विदधति स्वयमल्पमात्रम्
ऊरीकरोषि किमु कर्म गरिष्ठमेतद् ? ॥४८॥

प्रब्रूहि देव हृदयस्थितमात्मनीनं
यत् किञ्चिदस्ति तव वाञ्छितमत्र कार्यं ।
यत् साधनीयमतिदुष्करमप्यहं तत्
प्राणव्ययेन सकलं खलु साधनवानि ॥४९॥

यासि प्रसह्य नरराक्षसमीक्षितुं तं
दुर्योधनं कपटकर्मपटुं त्वमेकः
अस्माभिरत्र विकलैरिव देव तावद्
औत्कण्ठ्यमात्मनि कथं खलु संनियम्यम् ॥५०॥

एतावता हि समयेन कदापि राजन्
उल्लङ्घिता तव मनागपि नो मयाज्ञा ।
हा हन्त किन्तु मम विह्वलमद्य चेतः
प्रोल्लङ्घ्य तामनुसरेति तुदत्यजस्रम् ॥५१॥

सर्वेऽपि ते स्वामिपदारविन्दे
नत्वा नमोवाकमनेकवारम् ।
बाष्पप्रवेगात्यवरुद्धकण्ठा
ययाचिरे स्वानुगमाभ्यनुज्ञाम् ॥५२॥

सुहृद्वराणां प्रणयार्णवं तम्
उल्लङ्घितुं नूनमशक्नुवानः ।
निसर्गधीरः स कृपाकटाक्षैः
परामृशंस्तान् सकलानुवाच ॥५३॥

विजानीथ कृच्छ्रं सखायः समस्तं
विजानामि हार्दं च यौष्माकमुच्चैः ।
सुधीभिस्तु संघर्षकाले दुरन्ते
स्वकर्तव्यमेवानुपाल्यं कठोरम् ॥५४॥

Scanned by CamScanner

प्रणामाः इमे सन्तु मे वः समस्तान्
इमे चापरे मातरं प्रापणीयाः ।
पतत्वेष कायो ममाद्यारियोगे
स्वराज्यं परं त्रायतां हिन्दवीयम् ॥५५॥

शतघ्नीध्वनिः श्रोत्रमेयाद्यदैव
तदैवारिसेनाङ्गसंहारसत्रम् ।
समारभ्यतामत्र सर्वत्र वीरा
अविश्रान्तमावेशपूर्वं प्रचण्डम् ॥५६॥

दिवं जन्मदातुर्युपेते तदीयं
व्रतं विन्दते धर्मतः पुत्र एव ।
मृतश्चेदहं सङ्गरेऽस्मिन्निदानीं
सुतायार्प्यतामुग्रवीरव्रतं मे ॥५७॥

ममैकाकिनोऽभूज्जिजा जन्मदात्री
परं सर्वथा साऽस्य राष्ट्रस्य धात्री
तदाज्ञानुसारं यथापूर्वमेव
स्वधर्माधिराज्यं हि संवर्धनीयम् ॥५८॥

न सम्मानकामो न वा वित्तलोभो
न च स्वार्थमोहो न शक्त्युन्मदो वा ।
मनस्यस्तु वो राष्ट्रसेवाव्रतानां
सखायः कदाचित् कुतश्चित् कथञ्चित् ॥२९॥

इति कथमपि सद्विवेकवाक्यैः
प्रणयमयान् सुहृदोऽनुयातुकामान्
स्वयमरिगमनत्त्वरस्तदानीं
भृशमुपदिश्य शिवोऽग्रतः प्रतस्थे ॥६०॥

॥ इति समाप्तोऽयं शिवप्रयाणं नाम सप्तविंशति-तमः सर्गः ॥
॥ आषाढे वदि चतुर्थ्यां तिथौ १८८८ शाके ॥
(११ जुलै १९६०)

Scanned by CamScanner

# ॥ श्रीशिवराज्योदये महाकाव्ये २८ तमः सर्गः ॥

## सभामण्डपः

ततोऽफझुल्लः शिबिकाधिरूढः मध्याह्नकाले प्रययौ सवेगम् ।
प्रतापदुर्गाध उपत्यकायां नवोरकार्यां नयनाभिरामाम् ॥१॥
स्थले स्थलेऽरण्यपथे सुरम्ये दासास्तदाज्ञापरिपालनार्थम् ।
शिवाज्ञया तस्थुरतीवनम्रा वृक्षा इवोच्चैः फलभारवन्तः ॥२॥
केऽप्यन्वरुन्धन्नतिदूरदेश्यं पुरातनं नूतनपुष्पगन्धिम् ।
द्राक्षासवं पातुमपीतपूर्वं राजाधिराजैरपि दुर्लभो यः ॥३॥
अन्येऽनुनिन्युः सकृदेव भोक्तुं पीयूषमाधुर्यरसोत्तराणि ।
अलौकिकास्वादसुगन्धवन्ति गोमन्तकीयाम्रफलानि तानि ॥४॥
केचिद् ददुर्नागरुकोत्तमानां विदर्भजानां भुवनश्रुतानाम् ।
दलानि सम्यग् दलितानि तस्मायदृष्टपूर्वाणि विजापुरेऽपि ॥५॥
देशान्तरायात-मुदाडिमानां बीजानि माणिक्यवदुद्रुचीनि ।
तस्मै स्फुरद्राजतशुभ्रशुक्तिक्लृप्तेन पात्रेण ददुश्च केचित् ॥६॥
कादम्बरमिष्टरसं च केचित् सुपक्वजम्बीररसानुषिक्तम् ।
पानीयमानीय च नारिकेलफलोद्भवं केचन दातुमैच्छन् ॥७॥
तस्यासुरीं घोरतमां बुभुक्षाम् अपक्वमांसाशनमात्रशाम्याम् ।
यथावदुत्तर्पयितुं विनीतैः सम्प्रार्थितः कैश्चिदसौ तदानीम् ॥८॥
तन्त्रीमृदङ्गप्रमुखैः सुतूर्यैः श्रोत्राभिरामध्वनिभिः सहावम् ।
नृत्यन्त उच्चैर्नटनर्तकानां गणा यथास्थानमतोषयंस्तम् ॥९॥
सुखोपभोगैर्विविधैः प्रपूर्णे वनेऽपि तस्मिन्नगरायमाणे ।
विन्दन् महानन्दमसौ प्रकामं सुखेन तं मण्डपमाससाद ॥१०॥
बाह्यां स्फुरत्तोरणलोलमालाचञ्चत्पताकादिभिरुन्मिषन्तीम् ।
विचित्रशोभां पटमण्डपस्य पश्यन् मुहुर्भूरि विसिष्मियेऽसौ ॥११॥
दृष्ट्वा बहिर्द्वारमनेकवर्णा रङ्गावलीकल्पितचित्ररेखाः ।
कलानभिज्ञोऽपि गुणज्ञमानी तत्कौशलं सुष्टुतवान् मुहूर्तम् ॥१२॥
आदिश्य वीरान् दश रक्षिणः स्वान् साकं समेतान् समयानुसारम् ।
स्थातुं यथास्थानकमप्रमादं स मण्डपान्तः प्रविवेश धीरम् ॥१३॥
तमन्वगच्छंस्त्रय एव येषां बण्डाभिधानो हि तदङ्गगोप्ता ।
कृष्णाजिरालेखनपत्रपाणिः शिवस्य दूतः स च कम्प्रकायः ॥१४॥
तमुच्चकैर्मण्डपमन्तरङ्गे काश्मीरजोर्णाकटिकीर्णभूमिम् ।
विचित्रचीनांशुकसद्वितानं पाश्चात्यदेश्योत्तमचित्रवन्तम् ॥१५॥
सुवासितं विश्रुतकान्यकुब्जप्रदेशगन्धद्रवसिञ्चनेन ।
धूपायितं द्राविडचन्दनेन पश्यन् स आश्चर्यरसे ममज्ज ॥१६॥

Scanned by CamScanner

व्यात्ताननान्याहृतचित्रकाणां परिस्फुरत्कृत्रिमलोचनानि ।
स्तम्भेषु पश्यन् सुनिवेशितानि रौद्रप्रियोऽसौ नितरां जहर्ष ॥१७॥
माणिक्यमुक्तामणिलम्बकानां प्रभाभिरभ्याहतनेत्रतेजाः ।
सविस्मयस्तान्यसकृत् कथञ्चित् पस्पर्श रत्नानि स मत्सरीव ॥१८॥
मिलन्मिलिन्दानि मरन्दवन्ति मनोज्ञगन्धीनि सरोरुहाणि ।
विचित्रगुच्छाकृतिगुम्फितानि विलोलयामासुरमुष्य नेत्रे ॥१९॥
आसन्दिकाः काश्चन दन्तिदन्तविनिर्मितास्तत्र बृहत्प्रमाणाः ।
व्याघ्रत्वगाच्छन्नसुखासनाश्च पश्यन् मुहुर्विस्मितवान् स धीरः ॥२०॥
स स्फाटिकान्युज्ज्वलकान्तिमन्ति मैरेयपात्राण्यतिचित्रितानि ।
विलोक्य तेभ्यः स्पृहयांबभूव तथा न तत्रत्यमधुद्रवेभ्यः ॥२१॥
अक्षोट-बादाम-लवङ्ग-शुष्कद्राक्षानवाङ्कोल-फलप्रपूर्णम् ।
प्रफुल्लपद्माकृति हैमपात्रं फलानपेक्षोऽपि मनाग् ददर्श ॥२२॥
विलोक्य ताम्बूलकरङ्कमेकं हंसाकृतिं रत्नसुवर्णक्लृप्तम् ।
अन्यं मयूरप्रतिमं विचित्रं स शिल्पिनः कौशलमस्तुवीत ॥२३॥
वस्तूनि सर्वाण्यपि सुन्दराणि यथाप्रदेशं विनिवेशितानि ।
विशेषतो तानि महार्हरत्नान्यालोक्य वृद्धं चकितः स आह ॥२४॥
महत्तर ! ब्रूहि वनेचरेण त्वत्स्वामिना वित्तविवर्जितेन ।
कुतो नु संप्राप्तमिदं समस्तं राजाधिराजैरपि दुर्लभं यत् ॥२५॥
पृथ्वीतलेऽस्मिन् न विजापुरीयसभालयाभं क्वचिदस्ति रम्यम् ।
यस्मिन् महर्द्धिर्विजयापुरस्य चकास्ति पूर्वं परिलुण्ठितस्य ॥२६॥
तत्रापि पात्राणि हिरण्मयानि राजन्ति रत्नान्यथवासवानि ।
किन्त्वत्र लोकेऽहमलौकिकानि यथा तथा तत्र न लोकितानि ॥२७॥
तदीषदीर्षाकलुषं तदीयं वचो निशम्यैव स इङ्गितज्ञः ।
निर्दन्तवक्त्रस्फुटदट्टहासास्फुटां कथञ्चिद्गिरमुज्जगार ॥२८॥
अहो महोदारविभूतिपात्र ! लक्ष्मीविलासालय ! भाग्यशालिन् ।
चकास्ति यद्यत् कमनीयमत्र किं नास्ति तत्तद् भवदीयमेव ॥२९॥
महल्लकाः पर्वतदुर्गसद्मान्येताः भुवः सस्य-विशेषरम्याः ।
यत् किञ्चिदप्यर्जितसञ्चितं वा मत्स्वामिनस्तद् भवदीयमेव ॥३०॥
यदि स्वयं दास्यमसौ भजेत भावत्कमुत्सृष्टनिजाधिकारः ।
तत्तस्य सर्वं द्रविणं यदेतत् किं नास्ति नूनं भवदीयमेव ॥३१॥
पिबंस्तदीयं तदतीव हृद्यं श्लक्ष्णं वचो मोहनमन्त्रकल्पम् ।
विहस्य भूयः स निजोरुदघ्नाम् आसन्दिकां काञ्चिदलंचकार ॥३२॥
चिरायमाणं शिवमुद्विभाव्य स उच्चकैरुत्कलिकाकुलात्मा ।
बभाण वृद्धं किमहो कियन्तं कालं विधेयाऽत्र मया प्रतीक्षा ॥३३॥

Scanned by CamScanner

वार्धक्यनम्रः कटिलग्नपाणिः सचिन्तवत् तं स्थविरः स ऊचे ।
मन्ये महाराज कथञ्चिदर्वाक्कालं नु जातो भवदागमोऽत्र ॥३४॥
स्वामी हि मे निश्चितकर्मकालातिपातमद्धा सहते न जातु ।
फल्गूनि कर्माण्यपि कर्मदक्षः सुनिश्चितेऽसौ समये करोति ॥३५॥
प्रायेण सम्प्रस्थित एव स स्यात् तथापि तस्मै प्रहिणोमि दूतम् ।
विलम्बमानं तमसौ कथञ्चित् भवन्निदेशात् त्वरयेत सद्यः ॥३६॥
इत्यूचिवानेव स मन्दमक्षिसङ्कोचसंज्ञामकरोदशब्दम् ।
यामीक्षमाणः क्षण एव तस्मिन् पार्श्वस्थितः किङ्कर उज्जगाम ॥३७॥
निवृत्य शीघ्रं स्थविरस्य कर्णे स मन्दमन्दं निजगाद किञ्चित् ।
श्रोतुं यदीषत् कथमप्यतीव समुत्सुकोऽभूत् स तदाफल्लुलः ॥३८॥
ह्रिया सभीत्येव महत्तरोऽसौ कथञ्चिदस्पष्टगिरं जगाद ।
हं हो महावीर न वक्तुमीशे स्वस्वामिनः कातरतामपाराम् ॥३९॥
भवत्सहायोऽयमतुल्यशक्तिः शरीरगोप्ताऽत्र समीप एव ।
कृपाणपाणिः स्थित इत्यवेत्य भीस्तस्य चेतः स्पृशतीव गूढम् ॥४०॥
एकान्त एकाकिनमेकोऽत्र समीहते द्रष्टुमसौ समक्षम् ।
विपत्तिमूढा शरणागता हि शरण्यमेकान्त अहो भजन्ते ॥४१॥
तदेष वीरो बहिरस्तु तावद् यावद् भवद्भिः स करोति चर्चाम् ।
भवन्मनीषामनुसृत्य नूनं सर्वस्वमन्ते रह एव दद्यात् ॥४२॥
अभ्यर्थनैषा समयेऽसमेऽस्मिन् सुहृत्सुतस्येति निभालनीया ।
इत्येतदेकं जगदेकवीर ! वृद्धोऽर्थयेऽहं प्रणतो भवन्तम् ॥४३॥
वस्त्रान्तराच्छन्नसुतीव्रशस्त्रं संस्मृत्य स्वं बाहुबलं च घोरम् ।
अहंयुरह्नाय मुदाभ्यनन्दत् स प्रार्थनां तामविरोधमेव ॥४४॥
स्वदेहगुप्तौ कवचायमानं बण्डाभिधं तं प्रबलं स्वदासम् ।
स्थातुं बहिर्मण्डपमत्यदूरे सस्नेहहासं स हि निर्दिदेश ॥४५॥

इत्थं शिवेन रणनीतिविशारदेन
कौटिल्यतन्त्रमवलम्ब्य जयावहं तत् ।
संस्थापितः स्वरिपुरात्मवशे ससेनः
कृष्णेन कालयवनः स पुरा यथैव ॥४६॥

विज्ञाय व्यपगतदेहरक्षकं तं
दुष्टारिं निजवधलोलुपं क्षणेन ।
वेशान्तःकवचशिरस्त्रशस्त्रनद्धः
दुर्गाधस्त्वरितगतिः शिवः प्रतस्थे ॥४७॥

इति श्री-वर्णेकरकुलोत्पन्नभास्करात्मज-महाकवि-श्रीधर-विरचिते
॥ श्रीशिवराज्योदये महाकाव्ये सभामण्डपो नाम
अष्टाविंशति-तमः सर्गः समाप्तः ॥

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये २१ सर्गः ॥
## अफझुल्लवधः

अथोपकार्यां पुरतोऽफझुल्लः ददर्श कञ्चित् सविधे समेतम् ।
नात्युन्नतं नातिकृशं युवानं प्रशान्तनिश्चिन्तसुवक्त्रमुद्रम् ॥१॥
उष्णीषतुङ्गाग्रविलम्बिमुक्तागुच्छं च फेनाच्छदुकूलवेशम् ।
विशालभालालिखितेन्दुलेखं समुन्नतोरःस्फुरदेकहारम् ॥२॥
आजानुबाहुं ककुदुन्नतांसं प्रसन्नशार्दूलविशालनेत्रम् ।
स्तम्भस्थिरग्रीवमखर्वदीर्घश्मश्रुप्रवृद्धचस्फुटगण्डभागम् ॥३॥
आयान्तमालक्ष्य हि तं युवानम् अबोधितश्चाप्यवजग्मिवान् सः ।
तथापि पप्रच्छ तमग्रदूतम् अप्येष आयाति शिवाजिरेव ॥४॥
ससम्भ्रमोऽसौ स्थविरो हि यावत् तमोमिति व्याहरति स्म वाचम् ।
तावत्स निर्मुक्तमृगेन्द्रगामी तन्मण्डपद्वारमुपाससाद ॥५॥
परस्परं तत्क्षण एव ताभ्याम् अन्योन्यमास्फारितलोचनाभ्याम् ।
हसन्मुखाभ्यां विचलद्भुजाभ्याम् आलोकितं कृत्रिमसम्मदाभ्याम् ॥६॥
निजासनादुत्थितवान् सवेगं स्नेहादिव स्राक् परिरब्धुकामः ।
प्रसार्य बाहू चलितः पुरस्ताद् ऊचे शिवं म्लेच्छगिराऽफझुल्लः ॥७॥
जाने बिभेषि त्वमतीव मत्तो जहीहि भीतिं हि निजात् पितृव्यात् ।
त्वद्भीतये चेन्मम खड्ग एष निस्सार्यतेऽस्मिन् क्षण एव दूरम् ॥८॥
उक्त्वेति खड्गं कटिपट्टबद्धम् उन्मुच्य कृष्णाजिकरेऽर्पयत् सः ।
अन्तर्हितां राजकृपाणिकां तां बाढं स्मरन् तीक्ष्णरसाक्तधाराम् ॥९॥
स त्यक्तबाह्यासिममुं शिवाजिम् ऊचे स्फुरद्रोषकठोरवाचा ।
सतर्जनं भर्त्सयितुं मदान्धः भीमं जरासन्ध इवाप्त-मृत्युः ॥१०॥
किं वीक्षितं पत्रमदो मदीयं पूर्वं मया यत्प्रहितं त्वदर्थे ।
तथापि नैवानमितं शिरस्तन् न क्षम्यमेतत् तव साहसिक्यम् ॥११॥
विज्ञाय मामुद्यतमाक्रमार्थं कः को न भीत्या शरणं प्रयाति ।
भीतोऽसि नूनं त्वमरण्यवासी शरण्यमभ्येहि विजापुरेशम् ॥१२॥
श्रुत्वैव तत् तस्य मदोद्धतस्य वचः स्वसामर्थ्यमदात्तरौक्ष्यम् ।
तमब्रवीत् सौम्यगिरा शिवाजिः शुचिस्मिताकेकरनेत्रपद्मः ॥१३॥
आजन्मनो नूनमहं बिभेमि श्रीरामचन्द्रादतिपूजनीयात् ।
तथैव पापाचरणादधर्म्यात् नैवान्यतो जातु कुतोऽपि मर्त्यात् ॥१४॥
भवन्तमाबाल्यत एव जाने विजापुराधीश्वरदास्यदीनम् ।
वनेचरोऽप्यस्मि हि देश-धर्म-स्वातन्त्र्यनिष्ठो जगदीशदासः ॥१५॥

तस्माद् विजानातु भवान् ममेदं शिरोऽभिमानस्थिरमुन्नतं च ।
नर्ते हि पित्रोरथवेश्वरस्य पदाब्जतोऽन्यत्र नतं नमेच्च ॥१६॥
वाक्यं तदाकल्पितधैर्यगर्भम् अरुन्तुदं दुःश्रवशब्दभावम् ।
श्रुत्वा कथञ्चिद् व्यथितोऽप्यतीव जहास धीरं स उदञ्चितास्यः ॥१७॥
जगाद चनं कपटे पटीयान् असौ सुदूराततबाहुदण्डः ।
नूनं प्रसन्नोऽस्मि तवाद्य धैर्याद् आयाहि मां सिंह परिष्वजस्व ॥१८॥
महोदरं पीनकरं प्रचण्डं प्रमत्तगन्धद्विपभीमकायम् ।
पुरस्सरन्तं तमवेक्ष्य धीरः शिवः पुरस्तात् प्रचचाल तद्वत् ॥१९॥
अहो महामोहविवेकयोर्वा तमार्कयोः कालियकृष्णयोर्वा ।
तथा तयोर्मण्डपमध्यभागे सङ्घट्टनं संजघटे तदानीम् ॥२०॥
धर्मो ह्यधर्मेण नयोऽनयेन सुसंयमः क्रोधभरेण किंवा ।
नराकृती राक्षसमूर्तिनेव शिवोऽफझुल्लेन तदावलग्नः ॥२१॥
विशालकायः स महाबलाढ्यः धृत्वा शिवाजिं निजबाहुपाशे ।
येते विनिष्पीडयितुं प्रवेगात् कक्षान्तरस्थं च शिरस्तदीयम् ॥२२॥
तत्स्पर्शलेशाच्च मनाक्कठोरात् विज्ञाय तस्येङ्गितमाशु दुष्टम् ।
स जागरूको विनिगूहितां स्वां तीव्रासिपुत्रीं बहिरुच्चकर्ष ॥२३॥
वामेन स व्याघ्रनखाख्यशस्त्रं दधच्च सव्येन कृपाणकं तत् ।
बभौ शिवाजिः प्रकटोग्रभावः सनन्दकः श्रीनरकेसरीव ॥२४॥
करं च तस्यापसरन्तमीषत् संविद्य संश्लेषणबद्धकायः ।
स हन्त लक्षांशनिमेष एव महोदरं तस्य रिपोर्ददार ॥२५॥
विद्धोदरोऽसौ कटिपट्टगूढां निष्कृष्टवानात्मकृपाणिकां ताम् ।
यावच्च तावच्चपलेन वेगात् निःपातितो भूमितले शिवेन ॥२६॥
स्वशोणितक्लिन्नसमस्तकायः मुहुर्बहिःप्रोच्छलदन्त्रखण्डः ।
स वज्रिवज्राहतिखण्डिताङ्गो भूभृद्वदुच्चैर्नितरां रराट ॥२७॥
कथञ्चिदुत्थापितपूर्वकायः चक्रन्द हा हन्त विलुण्ठितोऽस्मि ।
दुर्मूषकं वृश्चत वृश्चतैनं हा मूषकेणाद्य हतोऽस्मि सिंहः ॥२८॥
तदाभ्यधावत् सहसा सरोषं कृष्णाजिरुत्खड्गकरः प्रवेगात् ।
स्वस्वामिघातप्रतिशोधहेतोर्निहन्तुकामः शिवमन्धकाभः ॥२९॥
प्रकोपरौद्रोऽपि शिवस्तदानीं नैसर्गिकोदात्तविवेकवित्तः ।
स्मरन्निजां क्षत्रियजातिरीतिं क्रोधान्धबुद्धिं तमुवाच विप्रम् ॥३०॥
गोब्राह्मणत्राणधृतव्रतस्य ममापि घाताय कृपाणपाणिः ।
भो! ब्राह्मण! त्वं विहतात्मधर्मः किमाततायीव समुद्यतोऽसि ॥३१॥
अपेहि दूरं विजहीहि घोरं दुरुद्यमं मत्प्रतिकूलमेवम् ।
अराति-पक्षाश्रितमप्यकस्मात् न ब्राह्मणं कञ्चन जातु हन्मि ॥३२॥

Scanned by CamScanner

शिवेन साक्षादरिमर्दनेन प्रबोध्यमानोऽपि स नष्टबुद्धिः ।
रोषाभिभूतोऽत्वरतोद्धृतासिः स्वमृत्युमालिङ्गितुमेव नूनम् ॥३३॥
प्रबोधनान्ते पदमेकमेव पुरःसरन्तं समवेक्ष्य मूढम् ।
महातरस्वी रणपण्डितोऽसौ तं ब्राह्मणं ब्रह्मपदं जिघाय ॥३४॥
क्षणे च तस्मिन्नफझुल्लदेहगोपायिता क्रुद्धभुजङ्गघोरः ।
बण्डाभिधोऽक्रूर्ददरालशस्त्रः शिवाङ्गभङ्गाय करालवक्त्रः ॥३५॥
जीवाभिधानेन यथार्थनाम्ना शिवस्य जीवेन बहिश्चरेण ।
जीवातवे स्वामिन आत्मखड्गाघातात्तदैवाकृत सोऽपजीवः ॥३६॥
तदाफझुल्लस्य कलेवरं तद् विद्धोदरं प्रस्त्रवदस्रधारम् ।
संवाह्य कैश्चिन्मृतकल्पमारात् चक्रे कथञ्चिच्छिबिकाधिरूढम् ॥३७॥
तद्देवशत्रोर्वपुरुह्यमानं दृष्ट्वैव सम्भाजिरिति प्रसिद्धः ।
शैवः प्रवीरः शिबिकाहराणां विच्छिन्नवानेकपदे पदानि ॥३८॥
सकण्ठविच्छेदममुष्य शत्रोः कृत्वा शिरो राहुनिभं करालम् ।
उपानयत्स्वामिनमेकवीरं तद्वीर्यलक्ष्मेव जगत्प्रदर्श्यम् ॥३९॥
तत्रोपकार्यां परितो नियुक्ता आरक्षिणश्चोभयपक्षयोस्ते ।
विमर्दमन्तः सहसा प्रतर्क्य घनाघनं संगरमारभन्त ॥४०॥
तदैव दुर्गे नियते हि काले महान्छतघ्नीध्वनिरुज्जगार ।
सह्याद्रिणा नूनमुदीर्णशत्रुप्रणाशतृप्तेन कृतोऽट्टहासः ॥४१॥
महाध्वनिं तं प्रतिनादतुङ्गं श्रोतुं तदाऽलं खलु नो बभूव ।
अरातिसेनोत्सवगीतनृत्यमैरेयपानाहतचेतना सा ॥४२॥
आकल्यतस्तुङ्गतरुप्रशाखाविशालपाषाणतलावलीनाः ।
स्थले स्थले त्यक्तसमस्तचेष्टाः शैवाः प्रवीराः समरातुरास्ते ॥४३॥
क्षणे क्षणे निश्चितपूर्वमद्धा प्रतीक्षमाणा ध्वनिमेनमेव ।
क्षुधातुरव्याघ्रकदम्बकल्पाः श्रुत्वैव तं ते भृशमुज्जगर्जुः ॥४४॥
जयोऽस्तु ते श्रीतुलजे भवानि जयोऽस्तु शम्भो तव रोहिडेश ।
जयोऽस्तु मातुः सततं जिजायाः जयोऽस्तु ते श्रीशिवधर्मवीर ॥४५॥
जयोऽस्तु रामस्य रघूत्तमस्य श्रीरामदासस्य गुरोर्जयोऽस्तु ।
जयोऽस्तु ते विट्ठलपाण्डुरङ्ग सदा तुकाराममुनेर्जयोऽस्तु ॥४६॥
जयोऽस्तु नित्यं शिवशासनस्य हिन्दुस्वराज्यस्य चिरं जयोऽस्तु ।
जयोऽस्तु धर्मस्य सनातनस्य जयोऽस्तु राष्ट्रस्य च भारतस्य ॥४७॥
सगर्जमेवं धृतभल्लखड्गाः तरस्विनस्तत्वरिरे तदा ते ।
आस्कन्दितुं शात्रववाहिनीं ताम् अमोघपाता इव रामबाणाः ॥४८॥

Scanned by CamScanner

यो यः प्रवीरो बत यत्र यत्र पपात वेगादधिशत्रुयोधम् ।
स स क्षणादेव हि तं तमद्धा चकर्त चिच्छेद ददार घोरम् ॥४९॥
कुतो नु मृत्योरयमग्रदूतसङ्घोऽवतीर्णो विजयोत्सवे नः ।
इत्याकुला यावदितस्ततस्ते प्रैक्षन्त तावन्निहता बतासन् ॥५०॥
कश्चित् स्वखड्गं कटिकोशगूढं निष्कर्षति स्मेषदरिं निहन्तुम् ।
तावत् स्वमुष्टिं भुजदण्डयोगाद् वियोजितां भूमितले ददर्श ॥५१॥
कश्चित् स्वकोदण्डमतिप्रचण्डं विधातुमिच्छन् सहसाततज्यम् ।
यावत् समुत्तिष्ठति तावदेव पपात भूमाववलूनमूर्धा ॥५२॥
कश्चिद् द्विषद्वेध्यमधिज्यधन्वा विच्छेत्तुकामो द्रुतमप्रमादम् ।
न्यमीलयद्दक्षिणमक्षि यावत् तावत्तदीयं बिभिदे हि वामम् ॥५३॥
पश्यन् मुहुः पृष्ठगतं स्वशत्रुं पुरः पुरः कश्चिदखण्डवेगः ।
पलायमानो मृतिभीतिमूढः पपात नीचः क्वचिदग्रगर्ते ॥५४॥
कश्चित् तुरङ्गं द्रुतमारुरुक्षन् वामं पदं पल्ययने निधाय ।
अन्यं मनागुत्क्षिपति स्म यावत् तावत् तमुच्छिन्नमपश्यदग्रे ॥५५॥
ससम्भ्रमः कश्चन मृत्युभीतेः स्वं भावयन् शत्रुपरीतमेव ।
निमीलिताक्षो भ्रमयन् कुठारम् अजीघनद् भूरिश आत्मनीनान् ॥५६॥
विच्छिन्नपादोऽवलुठन् धरण्यां जिजीविषुर्दूरमपेतुमिच्छन् ।
निकृत्तबाहुं तु पलायमानं निरीक्ष्य दिद्वेष तदीयभाग्यम् ॥५७॥
विलूनबाहुर्बहु तुद्यमानः प्रत्यग्रशस्त्रव्रणितेषु गृध्रैः ।
तद्वारणेऽशक्त उवाच मूढैः किं हस्तभिन्नं न हि भिन्नमङ्गम् ॥५८॥
निरन्तरं शोणितनिस्रवेण प्रक्षामकण्ठा यवना निकामम् ।
भूमौ लुठन्तो निजलूनगात्रक्षरद्द्रवेणैव हि तृप्तिमापुः ॥५९॥
कश्चिद् विसंज्ञो मदिरातिरेकाद् पश्यन् विमर्दं हसति स्म भूयः ।
लत्ताप्रहारेण निपात्यमानः उच्चैररोदीत् खरघोररावम् ॥६०॥
शस्त्रेण कश्चिन्निशितेन दीर्घं श्मश्रु स्वकीयं स्वयमेव तष्ट्वा ।
निर्म्लेच्छलक्ष्मा खलु जीवितेच्छुः जयः शिवाजेरिति संजुघोष ॥६१॥
सवेगखड्गाहतिखण्डितानि रक्ताक्तशीर्षाण्युपरि भ्रमन्ति ।
छायामये तत्र घनान्धकारे ह्यलातचक्रप्रतिमानि रेजुः ॥६२॥
विच्छिन्नशीर्षाणि कलेवराणि चञ्च्वावधृत्योड्डयितुं सयत्नाः ।
गृध्रा बृहत्पक्षधृतोऽपि भारात् नोत्पेतुरुच्चैर्नरदेहदघ्नम् ॥६३॥
जीवन्मृतान् कांश्चन भूमिशय्यान् प्रक्षामकण्ठानुदितार्तरावान् ।
तृप्ताः स्वभक्ष्यस्य तथापि लुब्धा दंष्ट्रासु धृत्वा चकृषुः शृगालाः ॥६४॥

Scanned by CamScanner

तस्मिन्नरण्ये घनवृक्षषण्डे ह्यजस्रगाढान्धतमिस्रघोरे ।
निम्नोन्नताध्वानमनीक्षमाणा दिवान्ध्यमापुः प्रपलायमानाः ॥६५॥
वृक्षेषु गुल्मेषु सकण्टकेषु बासांसि भूयांसि पलायितानाम् ।
दृढं निषक्तानि विलोक्य वीरा मार्गं विदाञ्चक्रुरपेक्ष्यमाणम् ॥६६॥
केचिद् विमर्दान्तरलब्धवर्णा निलीयमाना यवनप्रवीराः ।
अन्येन दृष्टा निजसैनिकेन हताभिमाना मृतिमन्वभूवन् ॥६७॥
रणाङ्गणे तत्र नियुध्यमानैस्तथा रजःस्तोम उपर्युदीर्णः ।
यथा तमुद्वीक्ष्य मयूरयूथैः केका निजावासवनेऽभ्युदीर्णाः ॥६८॥
ग्रावाण उच्चैरतिकृष्णवर्णा लिप्ता भृशं शात्रवशोणितेन ।
आश्यानरक्ता प्रहरेण रेजुः मनःशिलावत् परितः प्रकीर्णाः ॥६९॥
म्लेच्छध्वजास्ते हरिता विशालाः निःपातितास्तत्र रणाङ्गणे हि ।
क्लिन्नाश्चिरं लोहितमांसपङ्के विवर्णतामापुरदर्शनीयाम् ॥७०॥
तुरङ्ग-मातङ्ग-महर्षभोष्ट्राः निजान्नियन्तॄननवेक्षमाणाः ।
ववल्गुरुद्दामतया समन्ताद् वन्या इवान्ये पशवः सजात्याः ॥७१॥
वस्त्राणि चित्राणि बहूनि शस्त्राण्यस्त्राणि धान्यानि धनानि चैव ।
दुष्टारिभिर्लुण्ठितसञ्चितानि शिवप्रवीरैर्निजसात्कृतानि ॥७२॥
पराक्रमस्यावसरे बतासन् शिवस्य योधाः खलु पत्तयस्ते ।
सर्वे बभूवुः प्रहरान्तरेण निजारिवाहोष्ट्रगजाधिरूढाः ॥७३॥
ध्वस्तारिसैन्ये रणभूमिभागे परस्परं ते शिवपक्षयोधाः ।
मयाऽरयः पञ्चशतं निकृत्ताः त्वया कियन्तः परमित्यपृच्छन् ॥७४॥
असंख्यविच्छिन्नतनुप्रसूता रणाङ्गणे रक्तनदी वहन्ती ।
शिवप्रदेशाक्रमणोद्यतानाम् अलम्बुषेवाभवदुन्मदानाम् ॥७५॥

शाके भूवसु-भूतभूमिगणिते मार्गेऽर्धमासे सुदि
सप्तम्यां गुरुवासरे सुविदिते मध्याह्नतः संततम् ।
एवंभूतमभूतपूर्वमरिविध्वंसं समाप्याखिलं
व्याघ्रास्त्रं स्वयमेव सौम्यमभवत् श्रीश्रीशिवप्रेरितम् ॥७६॥

॥ इति श्रीशिवराज्योदये महाकाव्ये अफझुल्लबर्हणो नाम
एकोनत्रिंशत्तमः सर्गः समाप्तः ॥

Scanned by CamScanner

# ॥ श्रीशिवराज्योदये महाकाव्ये ३० तमः सर्गः ॥

## मातृसन्तोषः

अथोरेरफझुल्लस्य कृत्तं देवद्रुहः शिरः ।
स्त्रीकृतं शिवराजेन सुहृदोपायनीकृतम् ॥१॥

विचित्रपञ्जरान्तस्तन्निधाय प्रेषितं द्रुतम् ।
युद्धवृत्तान्तजिज्ञासु मातरं प्रति सत्वरम् ॥२॥

युद्धवार्ताहरः शत्रोः शिर आदाय निर्ययौ ।
पुत्रचिन्ताज्वलत्प्राणां जिजां राजगडास्थिताम् ॥३॥

स्ववक्त्रस्फुटदानन्दावेदितं स जयाश्रवम् ।
रिपुमूर्धानमुद्घाटय विना वाचमघोषयत् ॥४॥

देवद्रुहः पुत्रहन्तुर्भर्तृमानोपमर्दिनः ।
शिरः स्वपुत्रप्रहितं दृष्ट्वा सा शान्तिमन्वभूत् ॥५॥

न्यक्कृताः पीडिताः साध्व्य महिला अबला अपि ।
पापिनो ध्वंसमिच्छन्ति प्रतिशोधफलास्पदम् ॥६॥

तन्मुण्डमफझुल्लस्य सघृणं वीक्ष्य सा क्षणम् ।
प्राह रामायणी नीतिर्हते शत्रौ वलम्ब्यताम् ॥७॥

मरणान्तानि वैराणि देहिनामिह संसृतौ ।
हतस्यापि रिपोर्देहे धर्मकृत्यं हि युज्यते ॥८॥

अतः शरीरमेतस्य मुण्डमेतच्च दुर्भगम् ।
म्लेच्छाचारानुरोधेन ससम्मानं निखन्यताम् ॥९॥

यत्र स्थाने शिवेनायं देवद्रोही विदारितः ।
तत्रैव चिरमेतस्य चैत्यं लोकोऽवलोकताम् ॥१०॥

ये चान्ये बहुमानार्हाः समरे पञ्चतां गताः ।
तेषां वीरोचिताः शीघ्रं क्रियन्तामुत्तरक्रियाः ॥११॥

न हि शाश्वतिकोऽस्माकं द्वेषः केनापि सर्वथा ।
जीवताऽपि मनुष्येण किं पुनर्विगतासुना ॥१२॥

बन्दिग्राहं गृहीतास्युर्द्विषन्तो ये च केचन ।
निर्वैमनस्याः कर्तव्याः साधुवृत्त्यैव तेऽखिलाः ॥१३॥

स सन्देशमिमं तस्या वीरमातुर्दयामयम् ।
शिवमावेदयांचक्रे जननीशब्दचातकम् ॥१४॥

Scanned by CamScanner

तं धर्म्यतममादेशं मातुराकर्ण्य धार्मिकः ।
अन्वतिष्ठद्यथादिष्टं सुपुत्रो मातृदैवतः ॥१५॥
हतावशिष्टा ये वीराः शात्रवीया युयुत्सवः ।
बन्दिग्राहं गृहीतांस्तान् स्वयं सान्त्वयितुं ययौ ॥१६॥
प्रकृत्यैव हि सद्वीरा निर्वैराः सकले जने ।
न मनागपि विद्वेषं दधते जातु दुर्बले ॥१७॥
प्रक्षुब्धा अपि दौरात्म्यन्निष्कारणविरोधिनाम् ।
तदाश्रितेषु नैष्ठुर्यं नानिमित्तं प्रयुञ्जते ॥१८॥
रणदुल्लश्च झुंझारोऽम्बरश्च सपरिच्छदम् ।
पुत्रावप्यफझुल्लस्य प्राप्नुवन् रणबन्दिताम् ॥१९॥
शिवाजिः स्वयमायाति स्वान् प्रतीत्यवगह्यते।
सामूहिकं शिरश्छेदमुत्प्रैक्षन्त हि बन्दिनः ॥२०॥
यथा यथा स निकषा पदात् पदमुपागमत् ।
तथा तथोच्चकैस्तेषां प्राणा गन्तुमिवोद्यताः २१॥
उत्तारलोचनाः सर्वेप्युपांशु दृढमस्मरन् ।
क्षणमस्मृतपूर्वं तं जगदीशं दयाघनम् ॥२२॥
नूनं दयाधनः साक्षात् पुरतस्तैर्विलोकितः ।
शिवरूपेण तान् सर्वान् प्रेम्णालिङ्गितुमागतः ॥२३॥
तान् पृथक्पृथगाश्लिष्यन् स सौहार्देन दौहृदान् ।
समक्रामयदौदार्यं ध्रुवं तेष्वात्महृद्गतम् ॥२४॥
यदाश्लेषेण सेनानीस्तेषां निष्प्राणतां गतः ।
तदाश्लेषेण ते सर्वे लब्धप्राणा इवाभवन् ॥२५॥
प्रदीप्तविक्रमः पूर्वं पश्चात् कारुण्यसंप्लुतः ।
शिवाजिः स हि तैर्मेने तडिद्वानिव तोयदः ॥२६॥
तत्परामर्शमात्रेण निर्धूताखिलकल्मषैः ।
द्विषद्भिरपि तैर्जज्ञे सुवीराणां महात्मता ॥२७॥
तदकारणशत्रुत्वमफझुल्लस्य निष्ठुरम् ।
महात्मनाऽमुना स्मृत्वाऽखिद्यन् केचन बन्दिनः ॥२८॥
पलायांचक्रिरेऽरण्ये फाजलाङ्कुश-याकुताः
खानोपाधिभृतश्चान्यौ मुसाहसनसंज्ञकौ ॥२९॥
जयावली-महारण्यभूपालपदलोलुपः ।
मोरेवंश्यः प्रतापश्च क्वचन स्वं निजुह्नुवे ॥३०॥

Scanned by CamScanner

सुल्तानप्रमुखाश्चान्ये रिपुपक्ष-धुरन्धराः ।
दिशो जगृहिरे भीत्या गावो भग्नधुरा इव ॥३१॥
पलायनप्रवीणेषु तेषु खण्डोजिनामकः ।
विखण्डित-शरीराशः घोरारण्यान्तरं ययौ ॥३२॥
तं पश्चात्तापनिर्दग्धमपि स्वशरणागतम् ।
न चक्षमे शिवो नीचं स्वराज्यपथकण्टकम् ॥३३॥
अग्रहस्ताङ्घ्रिमाच्छिद्य तदीयं तमदण्डयत् ।
येन विद्रोहिणः सर्वे राष्ट्रधर्ममवागमन् ॥३४॥
अथात्मजयशोलाभप्रसन्नतममानसा ।
जिजा संयोजयामास कविता-गायनोत्सवम् ॥३५॥
अज्ञानदासनामानमाशुकाव्यविशारदम् ।
कविमामन्त्रयामास जयानन्दवती सती ॥३६॥
बाजि-कान्होजि-नेताजि-तानाजि-प्रमुखांस्तथा ।
सङ्ग्रामसुहृदः सर्वान् वीरानामन्त्रयत् स्वयम् ॥३७॥
आलम्बनविभावा हि नूनं वीररसस्य ते ।
स्वविक्रमकथाकाव्यं श्रोतुकामाः समामिलन् ॥३८॥
ततो मातृद्वितीये श्रीशिवराजे समागते ।
जयघोषैः प्रवीराणां दध्वनुः सह्यकन्दराः ॥३९॥
स राजमातुरादेशं मूर्ध्ना सम्मान्य सत्कविः ।
प्रतापदुर्गसङ्ग्रामगीतं गातुं प्रचक्रमे ॥४०॥
कवेरङ्गुलिनिर्घातैस्ताड्यमानः पदे पदे ।
मुरजो मुखरीभूतो नूनं काव्यानुगायने ॥४१॥
प्रचलत्तर्जनीस्पर्शैस्तारतारतरं स्वरम् ।
तन्त्रीपङ्क्ती रणन्तीव रुद्रवीणाऽभवत्तदा ॥४२॥
सुगीतं गायता तेन काव्यनायकसम्मुखम् ।
चञ्चत्पदं महाराष्ट्री ताण्डवं खलु शिक्षिता ॥४३॥
अनलंकारहृद्यं तत्काव्यं वीररसोत्तरम् ।
सोल्लासमुच्चकैर्गायन् कवी रसमयोऽभवत् ॥४४॥
येषां येषां हि नामानि कवितागुम्फितान्यसौ ।
उज्जगावुच्चकैस्तेषु शिवो रत्नान्यवाकिरत् ॥४५॥
वीरमाता जिजा तत्र हर्षास्राप्लुतलोचना ।
पपौ स्वपुत्रस्तोत्रं तत् कर्णीकृतकलेवरा ॥४६॥

न भूता न भविष्यन्ति मातरो हि जिजानिभाः ।
पुत्रविक्रमसुस्तोत्रकाव्यपीयूषतर्पिताः ॥४७॥
अमृतं नामृतं नूनं क्षीरसागरसम्भवम् ।
मातॄणां गुणवत्पुत्रस्तोत्रं हि परमामृतम् ॥४८॥
वात्सल्यरससंभूत-स्फीतगद्‌गदिकाकुला ।
तत्काव्यश्रवणादाप सा सद्यः परनिर्वृतिम् ॥४९॥
स्वस्तोत्रमिति न प्रीतः प्रीतः कविगुणैः परम् ।
गुणगृह्यः शिवः स्वर्णाभरणं कवये ददौ ॥५०॥
शिवसम्मुखमुद्‌गीतं तत् सुकाव्यं रसोत्कटम् ।
जगुर्बाला युवानश्च ग्रामे ग्रामे गृहे गृहे ॥५१॥
विजापुरीया दिल्लीया यवनाः शिवशत्रवः ।
रणोदन्तेन निर्दान्ता मन्त्रेणेव भुजङ्गमाः ॥५२॥
इति प्रखरविक्रमोज्ज्वलं प्रबलशत्रुनिर्दालनो-
द्‌भवं शिवयशश्चिरं कविवरैः सहस्राधिकैः ।
असंख्यकविताकथाप्रवचनेषु गीतं मुदा ।
स्वयं स्फुरति भारती नरवरस्तवोद्‌गायने ॥५३॥

॥ इति श्रीधर भास्कर वर्णेकर–विरचिते शिवराज्योदये महाकाव्ये
मातृसन्तोषो नाम त्रिंशः सर्गः समाप्तः ॥

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये ३१ तमः सर्गः ॥

अथ विजापुरराजसभान्तरे रणकथाश्रवणोत्सुकचेतसः ।
नरपतिं परितो हि महाजनाः सममिलन् विजयस्थिरनिश्चयाः ॥१॥
स नृपतिः स्फुटसुस्मितविस्मितोच्छ्वसितनेत्रमुवाच लसन्मुखः ।
किमनिमित्तमिहाद्य समागता उत वगच्छथ युद्धजनश्रुतिम् ॥२॥
बहुतिथेषु दिनेषु गतेष्वपि श्रुतिपथं न च दृष्टिपथं तथा ।
समरवार्तमुपागतमुत्तमं तदधुना मन उत्कयतीव मे ॥३॥
बत कुतोऽपि चिराय कथञ्चन श्रुतिपथं न जनश्रुतिरागता ।
यदफझुल्लशिवाजिसमागमे समभवत् कुतुकास्पदमद्भुतम् ॥४॥
स समरं प्रति याति यदा यदा विहितशत्रुनिबर्हणनिश्चयः ।
निगडनद्धकराघ्रिमरिं हठात् स्वयमुपाहरतीह तदा तदा ॥५॥
रिपुशिरः स्वकरेण मदोन्नतं नमयतीह मदीयपदे बलात् ।
गदयति स्फुटमेनमसौ मुहुर्बत विजापुरवैभवघोषणाम् ॥६॥
मम खलूत्सुकमद्य मनो भृशं छलयितुं मदरिं गिरिमूषकम् ।
तमफझुल्लनिबद्धकराङ्घ्रिकं चरणयोरवनामितमस्तकम् ॥७॥
यदि शिवाजिरसौ मदमोहितः न नमयेत् स्वशिरः पदयोर्मम ।
तदफझुल्लकराभिहतिर्बलात् मदमदश्च सहैव विनामयेत् ॥८॥
सपरिहासमिति प्रतिजल्पति यवनभूभृति बालमतौ भृशम् ।
श्रुतिपथं सहसाऽपतदुच्चकैः श्रवणदारणदारुणरोदना ॥९॥
स्थगितमेकपदे नृपभाषितम् अधिकृता हसितं च विमूर्च्छितम् ।
प्रबलसंभ्रमघूर्णितलोचनाः समभवन् सकला विकला इव ॥१०॥
प्रतिनिमेषमसौ भयदध्वनिः शिशुयुवस्थविरार्तरवोद्भवः ।
प्रववृधे परितो नृपमन्दिरं नृपतिहृद्वदकम्पत यत तदा ॥११॥
किमविशन्नगरे हतराक्षसी धृतभयंकरभीतकलेवरा ।
उत कथंचिदकम्पत मेदिनी किमथवाऽऽपतितः पृथुपर्वतः ॥१२॥
इति विकल्पितविह्वलबुद्धयो नृपतितत्सुहृदः परिशुश्रुवुः ।
यदफझुल्लबली निहतो रणे प्रविहता निखिला च वरूथिनी ॥१३॥
ददृशिरे पुरतस्तदनु स्फुटं त्रिचतुरः पुरुषा दुरवेक्षणाः ।
मलिनशीर्णविदीर्णकुवाससोः व्रणितगात्रगलद्रुधिरद्रवाः ॥१४॥
नृपतिना ससदस्यगणेन ते निकटगा अनिमेषमवेक्षिताः ।
परिचिता अपि नैव विजज्ञिरे ह्यतितरां विकृताकृतयो नराः ॥१५॥

तदनु कश्चन तेष्ववदन्नृपं नरपतेऽङ्कुश एष नमाम्यहम् ।
अयमुपस्थित एष च फाजलः पितृवधाधिविनिर्ज्वलितान्तरः ॥१६॥
हसन एष उपेति रुदन्मुखोऽयमपरश्च मुसा मुषिताङ्गकः ।
विनिहता स्म इमे निजपाप्मना न तु मृतास्तव पुण्यबशात् परम् ॥१७॥
अहह हन्त कथं बत कथ्यतां स पृतनाधिपतिस्तव मानितः ।
निजवशं गमितः खलशत्रुणा ह्युदरदारममारि शिवाजिना ॥१८॥
प्रलयवातसुदुर्धररंहसा रिपुबलेन तदैव लघीयसा ।
प्रहृत एव विजापुरवाहिनी कठिनसह्यगिरौ परिचूर्णिता ॥१९॥
वयमिमे परिदारितविग्रहा अपि तु दिष्टसुरक्षितजीविताः ।
इह समापतिताः पतिताखिलस्वसुहृदामिव भौतपिशाचकाः ॥२०॥
दिशमिमां प्रति च त्वरतेऽधुना स मरहट्टचमूपतिरुन्मदः ।
प्रतिपदं प्रहरन् हतभागिनो रणनिवृत्तविजापुरसैनिकान् ॥२१॥
दहति लुण्ठति मन्थति कृतन्ति मृधति कूर्दति वृश्चति हन्ति वा ।
अधिपथं यदमुष्य हि दृक्पथं पतति हन्त विजापुरवैभवम् ॥२२॥
शृणुम एति स चात्र विजापुरे विभवजातमरिः परिलुण्ठितुम् ।
यदि विशेन्नगरे प्रहरान्तरे न तदवेहि महीश महाद्भुतम् ॥२३॥
भृशमरुन्तुदयेति गिरा नयन् स निजमङ्कुशनाम यथार्थताम् ।
नरपतेश्च सदस्यगणस्य च प्रकृतिनिष्ठुरमन्तरदारयत् ॥२४॥
समरदुर्घटनाश्रवणाहताखिलशरीरमनोमतिशक्तयः ।
नरपतिप्रमुखा भयविह्वला ददृशुरापतितं नगरस्पृशम् ॥२५॥
कृतनतिः स यथाविधि भूभुजे कुशलवार्तमुवाच दरस्मितः ।
नरपते! मरहट्टचपतिः निववृते सहसैव यथागतम् ॥२६॥
भयनिमित्तमतो रिपुमूलकं किमपि नाद्य नरेश विजापुरे ।
निगदतेत्यमुनैव पुरोऽपरः समवलोकि चरो विपिनेचरः ॥२७॥
स निजसव्यकरेण मुहुः स्पृशन् नतशिरा धरणीं च ललाटकम् ।
प्रतिपदं स्खलिताक्षरमूचिवान् यदजयत् करवीरपुरं शिवः ॥२८॥
नगरखर्वटखेटपुराणि च तव तदाक्रमणाध्वनि यान्यपि ।
युधि निपात्य सचन्द्रकला ध्वजाः झटिति तेन हठादिव जिग्यिरे ॥२९॥
अतिविचित्रचरित्रमरेस्तव श्रुतिपथं नृप हन्त समागतम् ।
परि पुरि प्रतिचत्वरमुच्चकैः जनगणैर्यदगीयत भक्तितः ॥३०॥

१८ खलः शत्रुः इति कर्मधारयपदो वक्तुरभिप्रायः परं खलाः शत्रवो यस्येति बहुव्रीहिपरः वास्तविकोऽर्थः ॥

स्थविरबालशिशूनथवाऽङ्गनाः क्वचन न च्छलयन्ति मनागपि ।
न विजयेऽपि पिबन्ति तथा सुराम् अतिविचित्रगुणाः शिवसैनिकाः ॥३१॥
भवति हस्तगतं खलु कुत्रचित् यदि पवित्रकुराणममुष्य च ।
श्रुतिपुराणसमं बहुमन्यते प्रतिनिवर्तयते च सुधार्मिकम् ॥३२॥
श्रुतमिदं च पुरात्र विजापुरे नतसमस्तसदस्यशिरस्यपि ।
नृपसदस्यपभीः स किलैकलः शिशुवया न ननाम निजं शिरः ॥३३॥
नगरचत्वर एव च सत्वरं ललितमूर्तिरपि प्रखराक्रमः ।
अतिकरालतनोरपि गोहनो विकटशस्त्रधरं करमाच्छिनत् ॥३४॥
अथ कदाचन संयति कुत्रचित् अनवधानवशाच्छिवसैनिकैः ।
शशिमुखी विधृता यवनाङ्गना भयवती गुरुपेटकसंस्थिता ॥३५॥
शिवसमक्षमसावबला बलात् तदनु हन्त कथञ्चिदनीयत ।
स तु युवापि सुसंयमितेन्द्रियः किमपि दिव्यमुवाच सुभाषितम् ॥३६॥
भवति! किन्नु बिभेषि सुतान्निजात् त्वमसि मे जननी खलु धर्मतः ।
प्रथममेतदवेहि मम व्रतं यदखिला महिलाः खलु मातरः ॥३७॥
यत इहागमितासि कुतश्चन जननि! तत्र निवर्तितुमर्हसि ।
मदनुयायिजनस्य कुचेष्टितं प्रथममेतदवेहि तथान्तिमम् ॥३८॥
इति निगद्य वचः परमादरं स्वकुलरीतिमनु प्रतिपूजिताम् ।
पतिगृहं विससर्ज यवीयसीं बत शिवाजिरमूं यवनाङ्गनाम् ॥३९॥
अभयवाक्यमितीदमकल्पितं नृप! शिवोक्तमसावधिशृण्वती ।
पुलककुड्मलिताङ्गकवल्लरी प्रमुदिता समभाषत सुन्दरी ॥४०॥
नरतनुं श्रयते भगवानिति यदनिशं हि श्रुतं बहुधा मया ।
तदधुना तव पुण्यचरित्रतो मनुजदेव! परिस्फुटतां गतम् ॥४१॥
विजय एतु सदा तव दासताम् अखिलभूतिरुपेतु च वश्यताम् ।
तव पवित्रयशोभिरिदं जगत् धवलतां भजतामकलङ्किताम् ॥४२॥
भुवनमण्डलमण्डनमुज्ज्वलं शिव भवन्निभमत्र परत्र वा ।
न खलु जात्वभवन्न भविष्यति विमलशीलमहाद्युतिभास्वरम् ॥४३॥
सकलमङ्गलभावपरिप्लुतं मम मनो यदु भावयतेऽधुना ।
तदनिशं पुरुषोत्तम! गीयतां तव चरित्रमिहाखिलसज्जनैः ॥४४॥
इति चरित्रमरेस्तव भूपते कविजनः परितो बहु गायति ।
पवनलोलसरोजवनश्रियं किरति यच्चलमूर्धसु शृण्वताम् ॥४५॥
स खलु विष्णुरयं पुरुषाकृतिः चरति लोकहिताय शिवाख्यया ।
इति धिया तमिमेऽखिलहिन्दवः सुदृढभक्तिजुषः समुपासते ॥४६॥

वनचरस्य चरस्य गिरं तथा निजरिपुस्तुतिमात्रपरायणाम् ।
हृदयमर्मनिघातपटीयसी स कथमप्यशृणोद्यवनाधिपः ॥४७॥
क्रथितगात्रगलद्रुधिरद्रवाः नृपसखा विकला इव तत्र ये ।
चरगिरा च तया खलु मेनिरे विषमिव व्रणमर्मसु सिञ्चितम् ॥४८॥
कथमयं रिपुवह्निरितस्ततःप्रसरदर्चिरनन्यनियन्त्रितः ।
प्रशममेकपदे खलु नीयताम् इति महाधिरमून् हृदयेऽदहत् ॥४९॥
वार्तां तां शिवराजविक्रमयशश्चारित्र्यरोचिष्मतीं
श्रावं श्रावमसावतप्यत भृशं राज्ञो विमाता शुचा ।
रुग्णान्तःकरणा विवर्जितवती दैनंदिनं भोजनम्
कं नूनं न दुनोति दुःश्रवतरा प्रोत्कर्षवार्ता रिपोः ॥५०॥

**इति श्री. भा. वर्णेकर–विरचिते**
**श्रीशिवराज्योदये महाकाव्ये ३१ तमः सर्गः समाप्तः ॥**

## ॥ श्रीशिवराज्योदये महाकाव्ये ३२ तमः सर्गः ॥

अथातो पितृसंहारदुःखनिर्दग्धचेतनः ।
फाझलो मृतकल्पोऽसौ न स्वगेहाद् बहिर्ययौ ॥१॥
स्वप्नेष्विव दिवानक्तं सर्वस्वध्वंसभीषणम् ।
प्रतापदुर्गसंहारं तमपश्यत् क्षणे क्षणे ॥२॥
दीर्यमाणोदरस्योच्चैराक्रन्दः पितुरन्तिमः ।
ददार हृदयं तस्य श्रूयमाणः कुतश्चन ॥३॥
स मांसभोजी कवलं कथञ्चन मुखे धृतम् ।
भुञ्जानः सहसा मेने पित्रामिषमिवाशितम् ॥४॥
जलपानेऽप्यनीहोऽसौ शुष्ककण्ठः पिबञ्जलम् ।
तत्रापश्यत् पितुर्मूर्तिं सरोषां प्रतिबिम्बिताम् ॥५॥
स्वीयामपि प्रतिच्छायां दर्पणे प्रतिबिम्बिताम् ।
पश्यन् ददर्श स भ्रान्तः पितरं पुरतः स्थितम् ॥६॥
दिवं गतं स्वपितरं दर्शं दर्शमितस्ततः ।
विमृश्य बहुधा मेने स आत्मानं दिवंगतम् ॥७॥
तमेवंभूतमुद्भ्रान्तमफझुल्लात्मजं तदा ।
संसान्त्वयितुमायातो दुःखार्तो रुस्तुमाभिधः ॥८॥
स्मारं स्मारं गुणांस्तस्य मृतस्य परमाद्भुतान् ।
उभौ तौ चिररात्राय मिथो रुरुदतुर्भृशम् ॥९॥
रुस्तुमः क्षीणशोकोऽसौ निजमाधिं ततोऽब्रवीत् ।
दुःखितो दुःखितं प्रायो ब्रवीत्येव निजव्यथाम् ॥१०॥
हन्त हन्त हतो बन्धो त्राता मम पिता तव ।
तत् तुल्यमेवानाथत्वमावयोरुभयोरपि ॥११॥
ब्रवीमि किमभाग्यस्य मम त्राणं न केवलम् ।
दुर्हृदा लुण्ठितं सर्वं वित्तं स्थावरजङ्गमम् ॥१२॥
राजापुरं कारवारं करहाटं विसापुरम् ।
करवीरं च विख्यातं हा हा हन्त गतं मम ॥१३॥
गिरिदुर्गः स पर्णालो दुर्जयोऽब्दशतैरपि ।
त्रिभिरेव दिनैस्तेन पिशाचेनात्मसात्कृतः ॥१४॥
अक्षौहिण्याऽप्यजय्यास्ते मदायत्ता विनिर्जिताः ।
दुर्गा वसन्तमत्स्येन्द्रवर्धनास्तेन लीलया ॥१५॥

Scanned by CamScanner

सप्ताहत्रितयेनैव त्वत्पितुर्निधनोत्तरम् ।
विजापुरीयं साम्राज्यं तृतीयांशं क्षयं गतम् ॥१६॥
पुर्तुगीजा वलन्द्रेजास्तथाङ्ग्लाश्च फरांशिसाः ।
मुद्गलास्तेऽपि दिल्लीयाः शिवाद् बिभ्यति साम्प्रतम् ॥१७॥
विजापुरेऽत्र सर्वत्र यवन्यो हृतबान्धवाः ।
आक्रन्दन्ति चिरादुच्चैः सोरस्ताडं गृहे गृहे ॥१८॥
सा च तेजस्विनी सम्राण्माताऽस्माकं पितामही ।
महीमेवाधिशेते हा न भुङ्क्ते न पिबत्यपि ॥१९॥
मक्कां जिगमिषत्यद्धा तत्र कायं जिहासति ।
न तिष्ठासति देशेऽस्मिन् बलिनो ह्यत्र काफिराः ॥२०॥
प्रकृत्या दुर्बलः सम्राड् गरीयस्याऽनयाऽपदा ।
भग्नचेता न शक्नोति विधातुं वा विकल्पितुम् ॥२१॥
तदुत्तिष्ठ नरव्याघ्र क्रुधं भज शुचं त्यज ।
गर्ज गर्ज महोत्साहं भीषणां रणघोषणाम् ॥२२॥
कर्तास्मि तव साहाय्यमहमामरणं रणे ।
जिगीषां पूरयिष्यावो निर्हतस्य पितुस्तव ॥२३॥
इत्यूचिवान् रुस्तुमोऽसौ फाझलेन समं गतः ।
दुर्योधनाभं राजानं द्रौणिनेव कृपोऽकृपः ॥२४॥
तं पराभवनिर्विण्णमश्रुक्लिन्नेक्षणं नृपम् ।
उभयौ तौ ववन्दाते सजयोद्घोषणं रहः ॥२५॥
उवाच रुस्तुमो राजन् रुदित्वा खलु मा शुचः ।
द्विषतः प्रतिषेधाय खल्वलं बलमावयोः ॥२६॥
कपटेन वशीभूतो गजोऽप्येति पराभवम् ।
पराजयेऽफझुल्लस्य निदानं कपटं रिपोः ॥२७॥
अदत्त्वावसरं कर्तुं कापट्यं रिपवेऽधुना ।
आवामाबध्य वाहत्यानयावस्तं पुरस्तव ॥२८॥
करवीरमितो गत्वा जित्वा पर्णालपर्वतम् ।
शिवाजिमत्रानेष्यावो विनिर्बद्धकराङ्घ्रिकम् ॥२९॥
यत्र यत्र ध्वजास्तेन हठात् स्वीयाः प्ररोपिताः ।
तं तं प्रदेशं धक्ष्यावः सघोषागारमन्दिरम् ॥३०॥
यो यस्तव रिपोर्नाम मनाक् सादरमुच्चरेत् ।
तस्य तस्य हठाज्जिह्वोच्छेदं कुर्याव निर्दयम् ॥३१॥

Scanned by CamScanner

शत्रुध्वंसैककामस्य यः कामो न प्रपूरितः ।
अफझुल्लस्य वीरस्य पूरयिष्याव सांप्रतम् ॥३२॥

दशसाहस्रसंख्याकं चतुरङ्गं नवं बलम् ।
दीयतामाधिपत्ये नौ रिपुध्वंसाय सत्वरम् ॥३३॥

तदैवोद्घोषयामास राजा स विजयातुरः ।
सेनाधिपत्यमुभयोस्तयोर्भाविनि सङ्गरे ॥३४॥

प्रतापदुर्गसंग्रामोच्छिन्नगात्रा अपि क्रुधा ।
केचन प्रतिशोधार्थं पुनः सैन्ये समामिलन् ॥३५॥

गजोष्ट्रवाहभूयिष्ठा शतघ्नीशतभीषणा ।
प्रतस्थे जयकामार्ता विजापुरवरूथिनी ॥३६॥

सैनिकाः कृत्रिमोत्साहास्तेषु नैके पदे पदे ।
शिवस्य रणसामर्थ्यं स्मारं स्मारं चकम्पिरे ॥३७॥

श्रुत्वा श्व-घूकारावं वा दृष्ट्वा मार्जारमग्रतः ।
युद्धं शशङ्किरे केचिदुदर्कध्वंसकारणम् ॥३८॥

तेषामुद्दीप्यमानोऽपि भेरीदुन्दुभिताडनैः ।
नोद्दिदीपे रणोत्साहो वह्निरार्द्रेन्धनैरिव ॥३९॥

श्रुत्वा नक्तं श्वापदानामपि सञ्चारशब्दनम् ।
शिवसैनिकसम्पातमुत्प्रेक्षांचक्रिरे परे ॥४०॥

सैनिकास्ते बहिःशूराः परमन्तर्भयाकुलाः ।
व्याघ्रकृत्त्यावृता मेषा इवागच्छन् रणाध्वना ॥४१॥

अथ स्वाविक्रमाक्रान्तपर्णालगिरिमास्थितम् ।
शिवमावेदयाञ्चक्रुश्चराः पर्यन्तसञ्चराः ॥४२॥

महाराज समायाता निकटे रिपुवाहिनी ।
करवीरं महालक्ष्मीपीठमाक्रंस्यतेऽचिरात् ॥४३॥

श्रुत्वैव तन्महावीरो निश्चकर्ष कटिस्थिताम् ।
भवानीं प्रलयाभ्रान्तर्विद्युल्लेखाप्रभास्वराम् ॥४४॥

बभाण प्रावृडारम्भाम्भोदगम्भीरया गिरा ।
सन्नद्धा मम सर्वेऽपि युद्धार्थं वीरबाहवः ॥४५॥

तदैव तमुपाजग्मुः सुहृदस्ते रणोत्सुकाः ।
आकर्ण्य वाचिकं वेगात् प्लवङ्गा इव राघवम् ॥४६॥

ताडिताध्मात-पटह-ढक्का-शंखानकोद्भवैः ।
प्रणादैः शिववीराणां शत्रवोऽन्तश्चकम्पिरे ॥४७॥

शशङ्किरे च विध्वंसं पुरो ध्रुवमुपागतम् ।
पलायनोचिताध्वानं केऽपीक्षाञ्चक्रिरेऽभितः ॥४८॥

रुस्तुमः स महाधीरस्तत्सर्वमपि तर्कयन् ।
विजापुरीयसाम्राज्य-जयध्वनिमघोषयत् ॥४९॥

घोराक्रमप्रतीकारव्यूहे यावत् स्ववाहिनीम् ।
स संयोजयते तावत् परीतः शिवसैनिकैः ॥५०॥

शिवाजिः स्वयमायातीत्यवगत्य कुतश्चन ।
मेनिरेऽकालसंवर्तं रिपवः पुर आगतम् ॥५१॥

निलिल्यिरे गर्तगुल्मकोटरान्ध्रुषु केचन ।
पलायांचक्रिरे केचित् त्रपयन्तो मृगानिव ॥५२॥

अन्ये च बहवः शूरास्तत्क्षणं स्विन्नमूर्तयः ।
विजज्ञिरे द्रवीभूय धैर्यं निर्गलितं निजम् ॥५३॥

अन्तराकुण्ठितश्वासा महाभीत्याऽथ केचन ।
अशक्ताः पुनरुच्छ्वासे गतप्राणा इवाभवन् ॥५४॥

स्वं स्वं वेध्यमभिद्रुत्य नेताजिप्रमुखास्तदा ।
युद्धमारेभिरे वीराः शत्रुसैन्यभयङ्करम् ॥५५॥

तां खड्गवल्लरीं दीप्रां कृतान्तस्येव सोदरीम् ।
सम्भ्रामयन् शिवः साक्षाद् रुस्तुमं हन्तुमापतत् ॥५६॥

जिगीषुरपि सेनानीर्म्लेच्छानां स महाबली ।
चिक्षेप चक्षुषी भीत्या जिजीविषुरितस्ततः ॥५७॥

ददर्श दूरे निर्यातं निर्वासितमिवाहवात् ।
पुत्रं तमफझुल्लस्य फाजलं मित्रमात्मनः ॥५८॥

प्राणत्राणचणं मत्वा तमध्वानं सुहृद्गतम् ।
स दुधाव क्षणे तस्मिन् भीतिसंवृद्धरंहणः ॥५९॥

रिपून् पलायमानांस्तान् जम्बूकानिव कातरान् ।
व्याघ्रा इवान्वधावंस्ते शैवा वीरास्तरस्विनः ॥६०॥

पृष्ठानुलग्नवीराणां मृगयूणामिवात्मनि ।
शस्त्राघातमपैक्षन्त श्रान्ता म्लेच्छाः पदे पदे ॥६१॥

दयनीयां दशां तेषामरीणामपि दर्शिवान् ।
दीनबन्धुरुवाचोच्चैः शिवाजिर्निजबान्धवान् ॥६२॥

अलं हत्वा भयग्रस्तान् निजारीन् शशकानिव ।
दयां दीनेषु कुर्वन्ति धर्मवीरा द्विषत्स्वपि ॥६३॥

Scanned by CamScanner

लीलोल्लङ्घितसह्याद्रिशिखराणामपि क्षणात् ।
तेषामभूद् दुरुल्लङ्घ्या शिवाज्ञा वाङ्मयार्गला ॥६४॥

वीरास्ते हृतरिपवः पलायमानान्
त्यक्त्वारीन् द्रुतमभितः शिवं परीयुः ।
सोऽप्येतान् प्रियतमबान्धवान् समस्तान्
सच्चक्रे बहु कटकैश्च कुण्डलैश्च ॥६५॥

शाके रत्नशरर्तुभास्करमिते माघे दशम्यां वदि
नीत्वा शूर्पणखामिवातिविकृतिं तां शात्रवीं वाहिनीम् ।
तद्वक्त्रेण पराक्रमं स्वमतुलं प्रख्यापयन् भूभुजे
युद्धाह्वानमिवाकरोत् पुनरपि स्वातन्त्र्यवीरः शिवः ॥६६॥

इति श्री. भा. वर्णेकर विरचिते
श्रीशिवराज्योदये महाकाव्ये ३२ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

# ॥ श्रीशिवराज्योदये महाकाव्ये ३३ तमः सर्गः ॥

अथागतान् स्वानधिकारिणो जनान् पराजयोत्सादितमानविक्रमान् ।
विलोकयन् क्लिन्नविलोचनो नृपो विषादविध्वस्तमनोरथोऽभवत् ॥१॥
न तेषु कश्चिद् गलिताङ्गकेष्वलं बभूव वागुच्चरणे मनागपि ।
परन्तु तन्मौनवमीवदत् स्फुटं परन्तपत्वं हि शिवस्य दुस्सहम् ॥२॥
नरेशमाता च यदाऽशृणोदसौ दुरन्तमत्यन्तमुदन्तमीदृशम् ।
क्षणे क्षणेऽकल्पत सा स्वमूर्धनि प्रहारमुग्रद्रुघणस्य दुर्धरम् ॥३॥
पुनस्त्रिमासेन महापराजयं सुदुःश्रवं बन्धुमुखेन शृण्वती ।
विजापुरीया जनता हि यावनी ममज्ज साश्चर्यविषादकर्दमे ॥४॥
गृहे गृहे रुग्णशिरःकराङ्घ्रिकान् निविद्धपृष्ठांश्च रणाङ्गणागतान् ।
चिकित्समाना भिषजोऽनुमेनिरे शिवाजिसेनाचरशस्त्रतीव्रताम् ॥५॥
विदारिताङ्गस्रुतभूरिशोणितः पराहता रुस्तुमफाझलादयः ।
मलीमसीभूतयशःश्रियोऽपि ते बभुर्हि रक्तक्षयपाण्डुरा इव ॥६॥
पुरे समग्रे प्रतिचत्वरं क्षणं समामिलद्भिः पुरुषैः परस्परम् ।
कथा विचित्राः कथयाम्बभूविरे शिवाजिसाङ्ग्रामिकयुक्तिसम्भवाः ॥७॥
स्थले स्थले खेलनलोलबालकाः शिवाजियुद्धान्यनुचक्रुरुद्धतम् ।
अदर्शि तत्रापि जनैरनारतं जयो नितान्तं शिवपक्षनैष्ठिकः ॥८॥
निषिध्यमाना अपि राजपूरुषैः स्त्रियो निजक्षेत्रियकर्मसंरताः ।
जगुः सुगीतं मुहुरुच्चकैर्भृशं शिवाजिविक्रान्तचरित्रपावनम् ॥९॥
नृपः स निर्दग्धमहामनोरथः विनष्टसाम्राज्यसुरक्षणैषणः ।
विचिन्तयामास रहः सदैकलः शिवं कथञ्चिद् ग्रसितुं प्रतापिनम् ॥१०॥
तमेवमुत्सन्नसमस्तकाङ्क्षितं शयानमुन्निद्रमशान्तिविह्वलम् ।
विजापुरेशं प्रति कश्चिदाययौ नतोत्तमाङ्गं चर आन्ध्रदेशतः ॥११॥
स सादरं तं दरभीतिभागिव नरेशमभ्येत्य च पत्रमार्पयत् ।
तदा तदादाय कथञ्चिदुत्सुकः स्वयं स राजा पठितुं प्रचक्रमे ॥१२॥
राजाधिराज ! दासोऽहं त्वत्सेवैकपरायणः ।
जौहरौ नामधेयेन सिद्दीवंश्यो वशंवदः ॥१३॥
सहस्रकृत्वो नत्वा त्वां प्रार्थये किञ्चिदीप्सितम् ।
कृपासागर वाग्बिन्दुर्हृदये स निधीयताम् ॥१४॥
कर्नूलनगरे ह्यस्मिन्नान्ध्रपर्यन्तसंस्थिते ।
चिरं साम्राज्यसेवायां मयायुः सफलीकृतम् ॥१५॥
आशासे मम सेवेयं स्वामिनो विदिता भवेत् ।
किं किं न खलु जानन्ति राजानश्चारचक्षुषः ॥१६॥
तथापि हन्त दासेऽस्मिन् सेवाधर्मपरायणे ।
नैव क्षिप्तः क्षणं स्वामिन् कटाक्षः स कृपामयः ॥१७॥

Scanned by CamScanner

नाकारि जातुचिद्राजन्नहमादेशभाजनम् ।
विषमे विषये क्वापि रिपुराक्रम्यतामिति ॥१८॥
त्वत्सेवार्जितसामर्थ्यौ स्फुरन्तौ मेऽनिशं भुजौ ।
दुष्करे क्वापि सङ्ग्रामे विजेतुं रिपुमुन्मदम् ॥१९॥
प्रस्फुरत्तीव्रधारो मे करवालः पिपासति ।
विजापुरीयसाम्राज्यशत्रोः कस्यापि शोणितम् ॥२०॥
पूर्वं मयापराद्धं चेत् सहसाऽनवधानतः ।
तत्पश्चात्तापदग्धं मामवगच्छ दयानिधे ॥२१॥
तवादेशमनु क्षिप्रं चरणौ समुपाश्रये ।
कस्मिंश्चिद्दुष्करे कार्ये मां महीश नियोजय ॥२२॥
क्षणाच्च पत्रं पठतो महीपतेः मनःपटे सन्ततचिन्तनाकुले ।
समाविरासीत् सहसा नराकृतिः सुदृष्टपूर्वाऽपि चिराय विस्मृता ॥२३॥
चिरादनभ्यञ्जनरूक्षकुन्तला प्रवर्धितश्मश्रुररालदन्तुरा ।
दृढाधरौष्ठा पृथुखर्वनासिका प्रदीर्घतिर्यग्भ्रुकुटिर्भयंकरा ॥२४॥
सुपुष्टगात्रेष्ववयसोपकल्पिता ज्वलन्महाङ्गारमयीव नेत्रयोः ।
प्ररुष्टसर्पं श्वसितेऽनुकुर्वती स्मृताऽमुना सा खलु जौहराकृतिः ॥२५॥
सुदुर्धरं वीर्यममुष्य निस्तुलं रिपुन्दमं संगरकर्मकौशलम् ।
क्षणेन संस्मृत्य विजापुरेश्वरो विषण्णचेतस्यपि हर्षमन्वभूत् ॥२६॥
दिदृक्षुरेनं सहसैव जौहरं स्वकार्यसिद्धिक्षमघोरविक्रमम् ।
द्विजं तदामन्त्रणपत्रसंगतं तिमाजिसंज्ञं प्रजिघाय भूपतिः ॥२७॥
स राजपत्रं तदवाप्य जौहरो द्रुतं प्रतस्थे नृपदर्शनोत्सुकः ।
तमन्वगात् कालकुरूपभीषणा श्मशानवात्येव तदीयवाहिनी ॥२८॥
स वीरमानी बहुमानितः स्वयं सुदुर्लभोपाधिपदेन भूभुजा ।
महार्हरत्नाभरणैश्च सत्कृतः सुजीवितं धन्यममन्यतात्मनः ॥२९॥
तथोपकारार्जितजीवितं नृपं स्वविक्रमैस्तोषयितुं समुत्सुकः ।
अनन्यसाध्यं करणीयमात्मना निदेशमाकर्णयितुं चकाङ्क्ष सः ॥३०॥
तदिङ्गितं साध्ववधार्य भूपतिः हसन्मुखः प्राह निजं मनीषितम् ।
वनेचरोऽद्यावधि यो न निर्जितः त्वया शिवाजिः स बलिष्ठ ! जीयताम् ॥३१
गजोष्ट्रवाहास्त्रविशेषदुर्धरा वरूथिनी नस्तव किङ्करीभवेत् ।
समग्रकोशं धनधान्यपूरितं यथेच्छमुच्छोषय कार्यपूर्तये ॥३२॥
अगण्यसंख्या रणकर्मनिष्ठुराः पदातयः शस्त्रकलाविशारदाः ।
मदाज्ञया त्वच्चरणानुगामिनः भवेयुरद्यप्रभृति प्रतापवन् ॥३३॥
तदैव ते रुस्तुमफाझलादयः पराहताः प्राक्तनसङ्गरेषु ये ।
व्रणाङ्किताङ्गेषु निबध्य पट्टकान् पुनः ससेनाः समरार्थमुद्यताः ॥३४॥

विजापुरान्तः सततं प्रचारिणा चरेण केनापि शिवस्य धीमता ।
उदन्तजातं सकलं यथास्थितं निविश्य चावेदितमञ्जसा शिवम् ॥३५॥
स युध्यमानो मिरजेऽन्यशत्रुणा निरस्तविश्रान्तिसुखः शिवस्तदा ।
झटित्युपेतः परणालसंज्ञितं सुदुर्जयं पर्वतदुर्गमुत्तमम् ॥३६॥
स शार्वरीनाम-नवीनवत्सरोदयाह्नि पर्णालगिरिं समाश्रयत् ।
वसन्तकालोदितपञ्चमस्वरैः तमभ्यनन्दन्निव मत्तकोकिलाः ॥३७॥
इतस्ततः शत्रुबलैरनारतं नियुध्यमानाः सकलाः स्वबान्धवाः ।
तदैव सन्देशहरैः ससैनिकं निजान्तिकं संगमयांबभूविरे ॥३८॥
समामिलन् सत्वरमेव सर्वतः शिवस्य संग्रामसखा महाबलाः ।
यदास्थितोऽसौ गिरिदुर्ग उन्नतः सुराश्रियो मेरुरिव व्यराजत ॥३९॥
उपाययौ तेषु महाप्रतापवान् सुहृत् स बाजिः प्रभुवंशशेखरः ।
जरद्गवोऽप्यूज्ज्वलरौद्रलोचनः क्रुधा निधक्ष्यन्निव देववैरिणः ॥४०॥
स्थले स्थले तत्र गिरौ दुराक्रमे वितन्द्रिका रक्षिगणाः स्थिरीकृताः ।
यदीक्षणैर्निर्निमिषैरसौ गिरिः तदा सहस्राक्ष इव व्यराजत ॥४१॥
कृषिक्षमेऽल्पीयसि चापि भूतले समूपिरे धान्यकणा नृपोषणाः ।
व्ययोन्नजातस्य सुसञ्चितस्य च नियन्त्रितो भाविविपत्तिदर्शिना ॥४२॥
निदाघकालं जलशोषणक्षमं प्रवर्धमानं क्षणशो निरीक्ष्य सः ।
लघूदपानानि पुरातनान्यपि सुशोधयमास विशेषयत्नतः ॥४३॥
तृणं च पर्णं च बुसं च पत्रकं कडंगरं सर्वविधं पशूचितम् ।
कणप्रमाणं मरुताऽपि बाहितं सुदूरदृश्वा हि शिवो न चक्षमे ॥४४॥
निसर्गतः संगरकर्मपण्डितान् अपि स्वकीयानखिलान् सुहृज्जनान् ।
अखण्डिताभ्यासविधौ न्ययोजयद् असंख्यशत्रून् सहसा विघातितुम् ॥४५॥
न्यषेधि सर्वत्र निशीथिनीषु च प्रदीपिकानां ज्वलनं मनागपि ।
प्रकाशनं तत्र चकार पर्वते प्रदीप्ततेजः खरचन्द्रहासगम् ॥४६॥
दृढाः शतघ्न्योऽनलगोलवर्षिकाः विरोपिता दुर्गतटेषु सर्वतः ।
पुरस्सरन्तीं रिपुपक्षवाहिनीं दिधक्षवो या दहनास्त्रमातरः ॥४७॥
खगैर्मृगैश्चापि कथञ्चनारयः विनाशरन्ध्रं जनयन्ति यत्नतः ।
अतो निरुद्धप्रसराः कृता ध्रुवं खगा नभस्तः पशवश्च भूमितः ॥४८॥
नवस्वराज्यं स्वभुजार्जितं शिवः सुरक्षितुं वर्धयितुं च तत्परः ।
अहर्निशं निर्निमिषं समन्ततः स्वयं निरैक्षिष्ट समस्तचेष्टितम् ॥४९॥
एवंप्रायैर्दुर्गरक्षाभ्युपायैः पर्णालोऽसौ दुर्जयो यः प्रकृत्या ।
नीतोऽत्यन्तं दुर्जयत्वं शिवेन दुष्टारातिध्वंसपुण्यव्रतेन ॥५०॥

**इति श्री. भा. वर्णेकर विरचिते**
**श्रीशिवराज्योदये महाकाव्ये ३३ तमः सर्गः समाप्तः ॥**

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये ३४ तमः सर्गः ॥

शिवः पर्णालदुर्गेऽसौ वसन् गुप्तिसुरक्षिते ।
दद‍र्श ग्रस्यमानाभं सहसा मित्रमण्डलम् ॥१॥
स्वच्छे चाकाशपटले प्रलयाम्बुदभीषणम् ।
कालिमानं दुरालोकं क्षितिजादिव निःसृतम् ॥२॥
रजस्तोममयो दूराज्जृम्भमाणः स कालिमा ।
जग्रसे क्रमशः सर्वं सौरं तेजः समन्ततः ॥३॥
रजःपटलसंलीनं रविबिम्बं तदाबभौ ।
सुसह्यतेजःप्रसरं सन्तप्तायसपिण्डवत् ॥४॥
वर्धमानेन रजसा तमसेव क्षणादिव ।
विलुप्तकल्पं विदधे भास्वन्मार्तण्डमण्डलम् ॥५॥
दिवाऽपि तिमिरग्रस्तं नूनं जगदभूत्तदा ।
कल्पितः कल्पनाशून्यैरकालजलदोदयः ॥६॥
चारावेदितवृत्तान्तो विजज्ञौ तत्क्षणं शिवः ।
तं तमःस्तोममुद्यन्तं रिपुसेनारजोभवम् ॥७॥
स मन्दसुस्मितं प्राह सुहृदोऽभ्याशवर्तिनः ।
अकालकालिमा ह्येष नूनं धूम्रोऽरिकोपजः ॥८॥
अस्मद्राज्यं स्फुलिङ्गाभं निर्वापयितुमागता ।
विजापुरीयसाम्राज्यसेनाकादम्बिनी ध्रुवम् ॥९॥
तस्यैवं वदतोऽभ्याशे चरः सत्वरमागतः ।
श्रद्धया परया नत्वा वार्तां वक्तुं प्रचक्रमे ॥१०॥
महाराज ! महापत्ती राक्षसीव क्षुधातुरा ।
राज्यमस्माकमत्यल्पं ग्रसतीव समन्ततः ॥११॥
भवद्विक्रमभीतेन विजापुरमहीभुजा ।
प्रेषितं प्रार्थनापत्रं दिल्लीशाय जिगीषवे ॥१२॥
एकीभूताविवेदानीं तौ परस्परवैरिणौ ।
हिन्दूनां हि विघाताय म्लेच्छानामेकपक्षता ॥१३॥
बलाढ्यो मातुलस्तस्य दिल्लीशस्य परंतपः ।
शाहिस्ताखान इत्याख्यो दक्षिणाशाधुरन्धरः ॥१४॥
स भागिनेयसन्देशमधिगम्य मदोद्धतः ।
सपादलक्षवीराणां सेनया सह निःसृतः ॥१५॥

स्वनामधन्या विक्रान्ताः शतशोऽथ सहस्रशः ।
 म्लेच्छा विविधदेशीयास्तमेव समुपासते ॥१६॥
हिन्दवीयाश्च बहवः स्वार्थमात्रपरायणाः ।
 परदास्यहृतस्वत्वा म्लेच्छसेनाङ्गतां गताः ॥१७॥
राजव्याघ्री पण्डितेति दिल्लीशेनातिमानिता ।
 वैदर्भी विधवा काचित् सावित्री किन्तु नामतः ॥१८॥
हन्त साऽप्यशुभे कार्ये हिन्दुराज्यविनाशने ।
 स्वचमूचक्रमादाय वीरम्मन्या समागता ॥१९॥
केचिद्भोसलवंशीयाः केचिद् यादववंशजाः ।
 हन्त हन्तुं निजं राज्यं तेऽपि म्लेच्छैः सहोद्यताः ॥२०॥
गजैरुष्ट्रैर्हयैर्वाह्या उद्वमद्वह्निगोलकाः ।
 संस्वरन्ते शतघ्न्यस्ताः नूनमग्न्यस्त्रमातरः ॥२१॥
मन्दिराणि निपात्यन्ते भज्यन्ते देवमूर्तयः ।
 गोमातरो निहन्यन्ते धृष्यन्ते सत्कुलाङ्गनाः ॥२२॥
वेदग्रन्थाः विदह्यन्ते पीड्यन्ते वैदिकद्विजाः ।
 परिलुण्ठितसर्वस्वा निर्वास्यन्ते कृषीवलाः ॥२३॥
न स ग्रामो विनिर्दग्धं गृहं यत्र न कस्यचित् ।
 गृहं नो तच्छिरश्छिन्नं यत्र हन्त न कस्यचित् ॥२४॥
मीनवद् व्याकुलाः सर्वेऽप्यर्भकाः पयसा विना ।
 तृणादिना विना गावो मनुष्या ह्यशनैर्विना ॥२५॥
सर्वंकषं च दुर्भिक्ष्यं सर्वप्राणिविशोषणम् ।
 प्रसृप्तमस्मत्सौराज्ये ह्यालर्कमिव दुर्विषम् ॥२६॥
स्त्रीषु बालेषु वृद्धेषु व्याधितव्याकुलेष्वपि ।
 दयां न कुर्वते म्लेच्छा मृत्युदूता हि तेऽधमाः ॥२७॥
हाहाभूताः प्रजाः सर्वा देव! त्राणं विना तव ।
 परित्राणाय लोकानां वीर्यं ते वज्रपञ्जरम् ॥२८॥
पीड्यमानप्रजादुःखविह्वलीभूतचेतना ।
 लोकमाता जिजादेवी स्वप्रजाजनवत्सला ॥२९॥
प्रोत्साह्य नरशार्दूलान् सह्याद्रिवनचारिणः ।
 आकस्मिकैरवस्कन्दैः सा तर्जयति वैरिणः ॥३०॥
दुराक्रमाऽपि शत्रूणामसंख्येया वरूथिनी ।
 वित्रास्यतेऽस्मद्वीराणां वृकयुद्धपराक्रमैः ॥३१॥

तथापि चण्डशक्तिः सा त्वरमाणा पुरात् पुरम् ।
विश्रान्तेव विनिर्ग्रस्य त्वत्प्रियं पुण्यपत्तनम् ॥३२॥
म्लेच्छसेनापतिः पापः स दिल्लीपतिमातुलः ।
दूषयत्यधुना देव पवित्रं सदनं तव ॥३३॥
भवद्वास्तव्यसम्पूते भवने लोहितद्युतो ।
हन्तोत्स्फुरति गर्वेण हरितो यवनध्वजः ॥३४॥
यत्रागीयन्त सामानि भूदेवैर्ब्रह्मवादिभिः ।
तत्राऽश्लीलानि गीतानि वेश्याः कूजन्ति साम्प्रतम् ॥३५॥
यत्रार्तिक्यैस्त्वया पूजा दत्ता मङ्गलमूर्तये ।
क्रव्याद्भिर्यवनैस्तत्र कृतं सर्वममङ्गलम् ॥३६॥
भुसुरा यत्र सच्छीला असेवन्त भृशं सुरान् ।
असुरास्तत्र सेवन्ते यवनास्तेऽधुना सुराम् ॥३७॥
दुष्टारिग्राहनिर्ग्रस्तमनन्यशरणं जनम् ।
सुसमर्थः परित्रातुं हरिरेको भवान् भुवि ॥३८॥
न केवलं भवन्तं ते प्रतीक्षन्ते हि मानवाः ।
ध्यायन्ति नूनं देवास्ते निस्पन्दीकृतविग्रहाः ॥३९॥
तत्प्रस्थानमितस्तत्र क्रियतां देव सत्वरम् ।
देवद्रुहस्ते वीक्षन्तां भवान्यास्तेज उज्ज्वलम् ॥४०॥
इत्थं प्रार्थयमाने हि चरे तस्मिन्नजृम्भत ।
स रजःस्तोभसम्भूतः कालिमा परितो गिरिम् ॥४१॥
साङ्ग्रामिका गजा वाहा मद्यमत्ताः सहस्रशः ।
चीत्काररहेषानिर्घोषैः पर्णालमुदनादयन् ॥४२॥
गोग्रीवाघण्टिका नेदुः कलक्वणितमञ्जुलम् ।
रणदुन्दुभयो भूयो रेणुरत्यन्तकर्कशम् ॥४३॥
पत्तयः सादिनो वीराः स्वपक्षजयघोषितैः ।
प्रतिध्वनन्तं पर्णालं निन्युर्वाचालतामिव ॥४४॥
खेटकाः खर्वटा ग्रामाः पर्वतं परितोऽखिलाः ।
भीतिग्रस्तैर्जनैस्त्यक्ता व्याप्ता म्लेच्छाधिकारिभिः ॥४५॥
नानाकाराश्चित्रवर्णाः शतशः पटमण्डपाः ।
सैनिकानां निवासार्थं निरमीयन्त सत्वरम् ॥४६॥
दुर्गरक्षानियुक्तेषु वीरेष्वन्यतमस्तदा ।
शिवं विदितवृत्तान्तं वृत्तान्तं पुनरब्रवीत् ॥४७॥

Scanned by CamScanner

महाराज ! निरुद्धाः स्मो दुर्गेऽस्मिन्नरिसेनया ।
इतो गन्तुमिहागन्तुमन्यतः खल्वसम्भवम् ॥४८॥
नचिरादेव वर्षेयुः सर्वतो वह्निगोलकान् ।
शतघ्न्यः शतशः शत्रोर्दुर्गेऽस्मिन्नुच्चकैरपि ॥४९॥
तमावरमणवृत्तान्तं शृण्वन्नपि शुचिस्मितः ।
शिवाजिरब्रवीन्मन्द्रं निजधैर्यमिवोद्गिरन् ॥५०॥
रुन्धन्तु शत्रुभूता मे म्लेच्छा वा भूतराक्षसाः ।
संरोद्धुं भगवद्भक्तं समर्थः को नु भूतले ॥५१॥
वर्षतु प्रलयाग्निर्वा दिधक्षुरिव भूतलम् ।
स भवानीकृपासिक्तं न दग्धुं तृणमप्यलम् ॥५२॥
कोणे कोणे नियुक्ता ये दुर्गप्रान्तेषु रक्षिणः ।
अप्रमत्ता निरीक्षन्तां ते सर्वमरिचेष्टितम् ॥५३॥
यतो यतो निपात्येरन् शत्रुभिर्वह्निगोलकाः ।
तत्र तत्र प्रतीकारः क्रियतां द्विगुणोत्कटः ॥५४॥
बाणक्षेपान्तरे शत्रोर्यो वा को वा चरिष्यति ।
स तत्रैव निहन्तव्यो दृष्टमात्रो भुजंगवत् ॥५५॥
धैर्यमालम्ब्यतां चित्ते सुमेरुगिरिसुस्थिरम् ।
नाधीराणां सहायार्थं त्वरते परमेश्वरः ॥५६॥
पारतन्त्र्यमहापापं परिध्वंसितुमुद्यतान् ।
करुणा जगदीशस्य त्रायते महतो भयात् ॥५७॥
इत्थं समस्तसुहृदां गिरिसंस्थितानाम्
उद्भाव्य धैर्यमचलं विपदो विरोद्धुम् ।
दुष्टारिसैन्यदृढपाशमथो विभेत्तुं
निध्यायति स्म हृदि किञ्चिदसौ शिवाजिः ॥५८॥

**इति श्री. भा. वर्णेकर विरचिते शिवराज्योदये महाकाव्ये**
**३४ तमः सर्गः समाप्तः ॥ ११—४—६१**

Scanned by CamScanner

# ॥ श्रीशिवराज्योदये महाकाव्ये ३५ तमः सर्गः ॥

## कूटप्रयोगः

अथ स्वपुत्रं रिपुसैन्यपाशनिबद्धमाकर्ण्य चराननेन ।
समाश्रिता राजगडं चिराय जिजातिचिन्ताज्वलिता बभूव ॥१॥
अहर्निशं सा कुलदेवतायाः प्रपन्नलोकार्तिविभञ्जनायाः ।
निरन्तरध्याननिमग्नचित्ता जिजाऽभवन्मूर्तिमतीव भक्तिः ॥२॥
दृढं निरुद्धापि च देहलीशप्रचण्डसेनाक्रमणः समन्तात् ।
सा पुत्रनिर्मोचनचिन्तनार्ता स्वयं रिपावाक्रमितुं चकाङ्क्ष ॥३॥
सङ्ग्रामशूरेषु शिवस्य मित्रेष्वभ्याशमागच्छतु कश्चिदेकः ।
यस्तत्र पर्णालगिरेः समन्ताद् आक्रम्य भिन्द्यादरिसैन्यपाशम् ॥४॥
विचिन्तयन्तीति जिजा कदाचित् पुरःस्थितं प्रैक्षत वीरवर्यम् ।
नेताजिमत्युज्ज्वलशौर्यराशिं सिद्दी-हिलालानुसृतं विनम्रम् ॥५॥
तं विक्रमार्कं विपदन्धकारे दृष्ट्वा चिरेणाभ्युदितं ह्यकस्माद् ।
अस्तं गतास्तत्क्षण एव नूनं तदन्तरस्था निखिला विकल्पाः ॥६॥
अयं पराक्रम्य महातरस्वी विच्छिद्य शत्रून् सहसैव शीघ्रम् ।
असंशयं मोचयिता सुतं मे दिनैस्त्रिभिर्वाऽथ चतुर्भिरेव ॥७॥
संकल्पयन्तीति तमानमन्तं वीरं मनाक् क्रोधमिवोद्गिरन्ती ।
जिजाऽऽह नेताजिमुदग्रवीर्यं निर्भर्त्सयन्ती कटुतीव्रशब्दैः ॥८॥
न वेत्सि किं ते प्रणयी सखा वा राजाऽथवा मान्यवरः प्रणेता ।
शिवोऽवरुद्धो रिपुभिश्चिराय प्राणैः समं मे परनालदुर्गे ॥९॥
विलम्बमानस्य तवालसत्वं कर्तव्यवैमुख्यजमक्षमार्हम् ।
तनूजबन्धाकुलचेतनायाः ममान्तरङ्गं क्रथति प्रकामम् ॥१०॥
सुहृद्विपत्तिं स्वविपत्तिमेव प्रायः कुलीना गणयन्ति लोके ।
तवाऽन्यथा चेष्टितमीक्षमाणा त्वामन्यथैवाऽस्मि वितर्कयामि ॥११॥
त्वं सत्कुलीनो यदि तत्त्वतोऽसि गच्छाग्रतस्तत्र निमेषमात्रात् ।
नो चेद् गमिष्याम्यबलैकलाऽपि स्वपुत्रनिर्मोचनसंगराय ॥१२॥
स्वयं प्रविष्याधिरणं जवेन निर्मस्तकीकृत्य च जौहरं तम् ।
चिराददृष्टं रिपुपाशबद्धं विमोचयाम्यात्मजमात्मभूतम् ॥१३॥
इत्यातुरं तद्वचनं जिजाया निर्भर्त्सनादुःश्रवमात्तरौक्ष्यम् ।
शृण्वन्नकस्माद् व्यथितः स मेने विषाक्तभल्लाहतिमात्मनीव ॥१४॥
विद्धोऽपि हृन्मर्मणि तद्वचोभिः अक्षुब्धचेता स निसर्गधीरः ।
वृत्तं यथाभूतममुं निवेद्य ह्यारोपमात्मन्यपमार्ष्टुमैच्छत् ॥१५॥



Scanned by CamScanner

मातः क्षमस्वाल्पमिदं वचो मे महापराधस्य हि किंकरस्य ।
नापेक्षसे यत् खलु लेशमात्रं घोरेऽधुना पुत्रविपत्तिकाले ॥१६॥
मया न कर्तव्यपराङ्मुखेन नैवालसेनात्र कृतो विलम्बः ।
जातः स मे दुष्करयुद्धसाध्ये कार्येऽवलग्नस्य कथञ्चिदेव ॥१७॥
शिवप्रभोः शासनतः समस्तं तस्याफझुल्लस्य बलं निपात्य ।
संप्रस्थितोऽहं रिपुराजधानीं कर्तुं महाभीतिविपत्तिरुग्णाम् ॥१८॥
ततश्च दिल्लीपतिवाहिनीं ताम् अत्रासमन्तात् प्रसृतामगाधाम् ।
विच्छिन्नकूलां प्रचलन्महोर्मिं नदीमिवोल्लङ्घ्य समागतोऽस्मि ॥१९॥
यथागतं गच्छति दास एष तव क्षणेऽस्मिन्नविलम्बमेव ।
भुजंगभोगाभमरातिपाशं विच्छिद्य कर्तैव शिवं विमुक्तम् ॥२०॥
इत्यूचिवान् स प्रबलः प्रणम्य पदाब्जयोः श्रीशिवराजमातुः ।
विनिर्ययावाशिषमेतदीयां विलम्बहेतुं खलु मन्यमानः ॥२१॥
अथाचिराद् दौहृदसैन्यपाशविमुक्तमभ्यागतमात्मजं सा ।
उत्प्रेक्षमाणा जननी शिवस्य संग्रामवार्ताहरमैक्षताग्रे ॥२२॥
स राजमातुः पदयोर्निपत्य कथञ्चिदुद्भिन्नवचःप्रवृत्तिः ।
महात्रपानम्रशिरा उवाच विषण्णवक्त्रानुमितां प्रवृत्तिम् ॥२३॥
मातः स नेताजिरितोऽभिद्रुत्य पर्णालदुर्गं परितोऽरिसेनाम् ।
विदारयन्नप्ययशः प्रपेदे दुरन्तदुर्भाग्यनिरुद्धवीर्यः ॥२४॥
शिवैकनिष्ठस्य विधर्मिणोऽपि पुत्रो हिलालस्य युवा बलाढ्यः ।
प्रयुध्यमानो समराग्रभागे वीरोचितां सद्गतिमभ्युपेतः ॥२५॥
विच्छिन्नधैर्येव च तद्वधेन चमूर्हिलालस्य बत क्षणेन ।
प्रताड्यमाना रिपुशस्त्रपातैः बभूव वात्याहतधूलिकल्पा ॥२६॥
प्रतीक्षमाणो रिपुसैन्यभेदं स्वामी बहिर्यातुमनाः स बन्धात् ।
दुर्गाग्रतोऽपश्यदतीव दूरात् पलायितोत्थापितधूलिरेखाम् ॥२७॥
अकल्पिताभ्यागतमात्मसेनापराभवोदन्तममुं निशम्य ।
सा मेरुकल्पं निजधैर्यमुच्चैः मेने विषादाम्बुधिगाढमग्नम् ॥२८॥
अथात्मनिर्मोचनयुक्तिचिन्तानिमग्नधीर्धीरवरः शिवाजिः ।
वर्षर्तुमर्धक्षपितं विलोक्य सम्भाविनीमापदमैक्षतान्तः ॥२९॥
अभिन्नजीवान् सुहृदोऽल्पसंख्यान् अनल्पधीभक्तिविवेकवीर्यान् ।
मन्त्रोचिते सद्मनि रात्रिकाले स युक्तितः संगमयांचकार ॥३०॥
तेष्वागतोऽसौ प्रभुवंशकेतुः बाजिर्विपत्सागरवज्रसेतुः ।
गङ्गाधराख्यः कुटिलो द्विजन्मा तथाऽपरस्त्र्यम्बकभास्कराह्वः ॥३१॥
वितानवह्निप्रतिमेषु तेषु त्रिषु प्रदीप्ताननकान्तिमत्सु ।
स्वातन्त्र्यसङ्ग्रामसुदीक्षितोऽसौ शिवः स्वयं मन्त्रहविर्जुहाव ॥३२॥

तदैव रात्रौ शिवमभ्युपेतो वनेचरः कोऽपि चरोऽतिगूढम् ।
मन्दस्मितोद्भिन्नतमिस्रजालो यः स्वामिकर्णे निजगाद किञ्चित् ॥३३॥
श्रुण्वन् वचस्तस्य वनेचरस्य चिराय चिन्तास्तमितस्मितोऽपि ।
शिवः स्मितोत्फुल्लविशालनेत्रः स्वभूषणैस्तं समलंचकार ॥३४॥
अथापरेद्यूः रिपुसैनिकास्ते चिराय चैकत्र निवासखिन्नाः ।
दुर्गस्य कोणे क्वचिदेकमीषद् उद्घाटितं द्वारमलोकयन्त ॥३५॥
ततो बहिर्गच्छददृष्टपूर्वं निरीक्ष्य दूराच्च मनुष्ययुग्मम् ।
आश्चर्यभीहर्षसमाकुलास्ते ह्यन्योन्यमैक्षन्त विचित्रमुद्राः ॥३६॥
कृत्वाततज्यानि धनूंषि शीघ्रं मौर्वीसमारोपित-तीव्र-बाणाः ।
सुदूरवेधक्षमधन्विनस्ते प्रैक्षन्त तत् संकुचितैकनेत्राः ॥३७॥
ततश्च चिह्नं शरणागतानां तत्रोद्धृतं दृष्टिपथं प्रपेदे ।
यद् वीक्ष्य सर्वेऽपि विमुक्तचापं सहर्षगर्जं ननृतुः प्रमत्ताः ॥३८॥
क्षणादुदन्तः कुतुकावहोऽसौ तैलस्य बिन्दुर्बृहदम्बुनीव ।
पर्णालदुर्गं परितोऽरिसैन्ये विचित्ररूपः प्रससर्प सद्यः ॥३९॥
स जौहरो यावदिमां प्रवृत्तिं श्रुणोति सानन्दमतीव हृद्याम् ।
तावत् पुरोऽपश्यदुपस्थितं तत् मनुष्ययुग्मं विनतोत्तमाङ्गम् ॥४०॥
ततोऽब्रवीदेकतरोऽतिमन्दं गङ्गाधरोऽहं नरवीर ! विप्रः ।
नतेन मूर्ध्नार्पयते तवेदं पत्रं प्रणामेन समं शिवस्य ॥४१॥
सोल्लासमादाय तदर्पितं तत् सुहृद्वरान् श्रावयितुं हि पत्रम् ।
वर्णानभिज्ञोऽपि तु विज्ञमानी स्वयं पपाठ स्खलिताक्षरं सः ॥४२॥

इदं जौहरवीराय नमोवाकं प्रयाचते ।
शाहसूनुः शिवो नम्रः संस्मरन् जगदीश्वरम् ॥४३॥
पर्णालदुर्गं प्रत्येति वीरवर्यो भवादृशः ।
अवगत्येति जातोहं सहसा दर्शनोत्सुकः॥४४॥
राज्यलोभाभिभूतेन मयोच्छृङ्खलचेतसा ।
अपराधाः कृता पूर्वं तेऽरुन्धन्निव मां तदा ॥४५॥
भयेन चाल्पभाग्येन परिग्रस्तं मनो मम ।
भवत्कृपामहालाभाद् बत मामत्यवञ्चयत् ॥४६॥
पश्चात्तापावदग्धोऽहं श्रीमतः शुभदर्शनम् ।
नक्तमद्यैव वाञ्छामि स्वकल्याणाय केवलम् ॥४७॥
मत्कल्याणाय यत् किञ्चित् भवान् समुपदेक्ष्यति ।
हृत्कोशे रत्नवन्नित्यं धारयिष्यामि वीर तत् ॥४८॥
भूत्वा विजापुरेशस्य करुणालेशभाजनम् ।
को न विन्देत कल्याणं जगदीशस्य चाऽथ वा ॥४९॥

Scanned by CamScanner

मज्जन्तु मेऽपराधास्ते भवतो हृदयाम्बुधौ ।
वर्षन्तु करुणासान्द्राः कटाक्षा मयि भूभुजः ॥५०॥
श्रीमन् ! विजापुरेशस्य सुदुर्लभमनुग्रहम् ।
मयि कारयितुं शक्तो ह्येक एव भवान् भुवि ॥५१॥
तदनुग्रहपात्रत्वं प्राप्तुमुत्को ह्ययं जनः ।
स्वायत्तं भवदायत्तं मिथोऽद्यैव चिकीर्षति ॥५२॥

पत्रं पठित्वाऽधिगतं प्रमोदं विधातुकामो द्विगुणं तदीयम् ।
गङ्गाधरोऽसौ विनतोऽग्रजन्मा तादृक् पुनर्वाचिकमप्युवाच ॥५३॥
अहो महाभाग ! महीश्वरस्य कृत्वाऽप्रियं कः सुखमत्र शेते ।
कुपथ्यसेवीव नितान्तमन्तः पश्चात् तपत्येव नृपापकारी ॥५४॥
भुञ्जीत हालाहलमप्यसह्यं गाहेत वा व्याघ्रवनं प्रकामम् ।
न तु प्रमादादपि सौख्यकामी सम्राडपथ्यं विदधीत लोके ॥५५॥
अनाद्यनन्ते धरणीतलेऽस्मिन् काले च को नाम कदा क्व चाऽसौ ।
जातः प्रजायेत जनो महात्मन् नृपापकारी च सुखाधिकारी ॥५६॥
अस्मादृशैर्विप्रजनैर्नितान्तं सम्राड्विरोधादुपरन्तुमेव ।
प्रबोधितोऽप्युद्धतमित्रमन्त्राद् अपथ्यमद्धा कृतवान् रिपुस्ते ॥५७॥
तस्य प्रबोधस्य हि साम्प्रतत्वं सम्प्रत्यसौ हन्त विदांकरोति ।
विप्रोपदेशानवहेलयन्तस्तपन्ति पश्चाद् बलिनोऽपि नूनम् ॥५८॥
तद् वीरशार्दूल शिवस्य पत्रं सम्मान्यतां पर्वतमूषकस्य ।
खल्वत्र किञ्चित् खलु संशयित्वा स्थितोऽस्मि सत्यप्रतिभूर्द्विजोऽहम् ॥५९॥
निर्विण्णश्चिरमेकदेशवसतेस्त्रस्तो महावर्षणात्
हस्तप्राप्तमिवावगत्य सकलं प्राप्यं विना संगरम् ।
सेनानीः स जिगीषुरात्मसचिवैः सम्मन्त्र्य कालोचितं
स्वीचक्रे शिवराजपत्रलिखितामभ्यर्थनां जौहरः ॥६०॥
सैन्ये तत्र पुनश्च सम्परिसृता सेनापतेर्मण्डपात्
सा वार्ता शरणागतः शिव इति प्रत्येकमानन्दयत् ।
मन्वानाः कृतकृत्यतां प्रमुदिताः सर्वत्र पर्यभ्रमन्
स्वस्वस्थानमपास्य सैनिकगणाः प्रातर् विहंगा इव ॥६१॥

**इति श्री. भा. वर्णेकर-विरचिते**
**श्रीशिवराज्योदये महाकाव्ये कूटप्रयोगो नाम ३५ तमः सर्गः समाप्तः ॥**

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये ३६ तमः सर्गः ॥

# महासाहसम्

अथारिसैन्यविक्षोभं निजनीतिप्रयोजकम् ।
यथापेक्षं चरप्रोक्तं शृण्वन्नानन्दितः शिवः ॥१॥

स्वसखं च तदा प्राह सौहार्दैकनिदर्शनम् ।
प्रभुवंशमहारत्नं बाजिमाजिधुरन्धरम् ॥२॥

चरेण नक्तं ह्यः प्रोक्तं रन्ध्रस्थानमरातिषु ।
नीरन्ध्रमभितो दुर्गं स्रोतःप्रायं स्थितेष्वपि ॥३॥

मम कूटप्रयोगेण चेदानीं रिपुसैनिकाः ।
व्यामूढा इव चेष्टन्ते छिन्नसेनानुशासनाः ॥४॥

बहु नृत्यन्ति गायन्ति पिबन्तो मदिरां मुहुः ।
भक्षयन्ति यथाकामं सर्वेऽप्यानन्दतुन्दिलाः ॥५॥

न स्मरन्ति स्वकर्तव्यं गणनेतृनियोजितम् ।
स्मरन्ति गृहदाराणां सर्वे निर्गमनोत्सुकाः ॥६॥

अद्याषाढस्य मासस्य पौर्णिमासी शुभा तिथिः ।
पूर्णोऽपि लुप्तस्यादिन्दुर्नभस्यम्बुदमेदुरे ॥७॥

ज्यौत्स्नी चापि तमिस्रेव भवेदद्य निशीथिनी ।
तदद्यैव प्रयास्यामि दुर्गान्तरमितो ध्रुवम् ॥८॥

विशालदुर्गोऽस्माद् दुर्गाद् यः क्रोशे दशमे स्थितः ।
स मामाह्वयते नूनं सहवासाय मित्रवत् ॥९॥

नक्तमद्यैव गच्छेयं तत्रोल्लङ्घ्यारिवाहिनीम् ।
वसुदेवो महापूरां धैर्येण यमुनामिव ॥१०॥

यत् स्वधर्मपरित्राणसम्भवं पुण्यमुज्ज्वलम् ।
मम मूर्ध्नि स्थितं किञ्चित् तस्य दिव्यार्भकं यथा ॥११॥

तन्मामस्मान्महापूराद् रिपुसेनामथात् क्षणात् ।
हृदिस्थ ईश्वरो ब्रूते ध्रुवं संतारयेदिति ॥१२॥

स्वस्वामिनोऽतिपूज्यस्य तद् विज्ञाय मनीषितम् ।
महामनीषी श्रद्धावान् बाजिस्तं सहसाऽवदत् ॥१३॥

देव त्वया यन्निर्णीतं युक्तायुक्तविवेकिना ।
कस्तत्र मादृशो दोषं पश्येदत्यल्पबुद्धिभाक् ॥१४॥

Scanned by CamScanner

पूर्वमुलङ्घितोऽम्भोधिर्बलिना वायुसूनुना ।
न चित्रं तत्र पश्यामि सोऽगाद् यद् वायुवर्त्मना ॥१५॥
घोरा जलचरास्तत्र ये व्यालमकरादयः ।
न तेषां दृक्पथं प्राप्तो मारुतिर्यत् स खेचरः ॥१६॥
पर्णालपरिखीभूते रौद्रेऽस्मिन्नरिसागरे ।
रक्षिणः पर्यवेक्षन्ते चरतः कीटकानपि ॥१७॥
एतस्मिन् संकटे घोरे साहसं यच्चिकीर्षसि ।
तादृशं न कदा कोऽपि कृतवान् नो करिष्यति ॥१८॥
धीरवर्यस्य वीरस्य महासाहसगाहिनः ।
कस्तवाहं सहायाय किंकरश्चरणाश्रितः ॥१९॥
निःशस्त्रो निःसहायोऽपि धीमात्रसचिवो भवान् ।
अक्षौहिण्यापि शत्रूणामजय्यः खलु मे मतः ॥२०॥
साहसे परमेतस्मिन्नपूर्वे चाप्यनुत्तरे ।
पदानुसरणं कर्तुं देव ! दासोऽयमिच्छति ॥२१॥
भवच्चरणनिक्षेपोत्थितपङ्ककणैः प्रभो ।
तीर्थस्नानमहापुण्यं दासोऽयं सञ्चिचीषति ॥२२॥
आपच्चेदापतेत् काचिद् रिपुपक्षादकल्पिता ।
त्वदन्नपरिपुष्टोऽयं देहस्तत्रार्गलीभवेत् ॥२३॥
त्वमेव परमात्मा मे त्वद्वाणी मे परा श्रुतिः ।
त्वदर्थे जीवनं प्रेयः श्रेयश्च मरणं मतम् ॥२४॥
अनुमन्ये तपस्तीव्रं कृतं प्राक्तनजन्मसु ।
यदस्मिञ्जन्मनि प्राप्तं त्वच्छायाप्रायिकं वपुः ॥२५॥
तदिदानीं प्रभो याचे त्वन्निर्गमनवर्त्मनि ।
तमःप्राये क्षणं क्षीणज्योतिर्भावं प्रपद्यताम् ॥२६॥
शिवस्तां वाचमाकर्ण्य स्वामिभक्तिरसोत्कटाम् ।
वाच्यावाच्यविमूढोऽभूत् सुप्रत्युत्पन्नधीरपि ॥२७॥
अहो निर्मलशीलस्य पुण्यचारित्र्यशालिनः ।
स्वस्मिन्ननुत्तमां भक्तिं ज्ञात्वा देवोऽपि मुह्यति ॥२८॥
अहो साहसकर्तारः सन्ति केचन कुत्रचित् ।
दुर्लभाः किन्तु लोकेऽस्मिंस्तेषां स्वेच्छानुयात्रिकाः ॥२९॥
अनापद्यपि साहाय्यं विरलो हि चिकीर्षति ।
किं पुनर्दुर्मदाराति-प्रचुरायां महापदि ॥३०॥

तस्य भक्तिसमां शक्तिं तादृशीं च महाधृतिम् ।
विजानन् स शिवो धीमाननुजज्ञौ तदीहितम् ॥३१॥
निजाकाङ्क्षितसम्पूर्तिप्रसन्नास्यं तमब्रवीत् ।
नवीनसाहसारम्भसुप्रसन्नाननः शिवः ॥३२॥
नूनं भाग्यवती माता पिता च मम भाग्यवान् ।
यत्पुत्रेण सुहृत् प्राप्तस्त्वादृशः कोऽपि धैर्यवान् ॥३३॥
नूनं मित्र महाभाग्यो मादृशो नात्र भूतले ।
आपत्स्वग्रेसरा यस्य त्वादृशाः वीर्यशालिनः ॥३४॥
यामब्रवीः सखे वाचं सौहार्दहृदयंगमाम् ।
तयाऽहमधमर्णत्वं नीतोऽस्म्यामरणं ध्रुवम् ॥३५॥
मदन्तः सात्त्विका भावास्त्वद्वाचाऽङ्कुरिता हि ये ।
प्रत्युत्तरप्रयत्नेन ते वैकल्यमवाप्नुयुः ॥३६॥
सद्भावोदीरितां वाचं प्रतिवक्तुमुदीरिता ।
वाणी सद्भावगर्भाऽपि भवत्येवौपचारिकी ॥३७॥
तदलं मम भाषित्वा समयोऽयमपेक्षते ।
कण्टकाकीर्णमार्गेण बहिर्निर्गमनक्रियाम् ॥३८॥
सहस्रषट्कमस्माकं वीराणामत्र वर्तते ।
मामन्वेतु त्वया साकं तेषां षड्गुणितं शतम् ॥३९॥
साहाय्येनावशिष्टानां संरक्षन् दुर्गमुत्तमम् ।
विगृह्णीतारिभिर्धीरं धीरस्त्र्यम्बकभास्करः ॥४०॥
कृष्णवेशाः खड्गवन्तो यान्तु सर्वेऽनुयात्रिकाः ।
नृवाह्यं तेषु नेतव्यं केवलं वाहनद्वयम् ॥४१॥
वहन्ति पथिकाः प्रायः पाथेयं देहधारणम् ।
सुदुष्करे प्रवासेऽस्मिन् पाथेयं प्रभुचिन्तनम् ॥४२॥
श्वासार्थमपि पर्याप्तोऽवसरो दुर्लभोऽधुना ।
भोक्तुमन्नं जलं पातुं स लभेत कुतः पुनः ॥४३॥
निःश्वासमपि निःशब्दं कुर्वन्तोऽखण्डगामिनः ।
अश्वानीकप्रवेगेन यास्यन्त्यद्य पदातयः ॥४४॥
प्रायेण क्षुण्णमध्वानमध्वगा मार्गयन्ति ते ।
अद्य बुद्ध्यैव पन्थानमक्षुण्णं मार्गयामहे ॥४५॥
वर्जयन्ति प्रवासार्थं प्रायः सर्वे निशीथिनीम् ।
तामेव तिमिरग्रस्तां बहु मन्यामहे वयम् ॥४६॥

Scanned by CamScanner

यमाश्रयितुमिच्छामो निकटस्थमितो गताः ।
असौ विशालदुर्गोऽपि ग्रस्तः स्वातन्त्र्यशत्रुभिः ॥४७॥

सूर्यरावाभिधः कश्चित् सुर्वेवंशोद्भवोऽधमः ।
जसवंतसहायो यो दुर्गं तमधितिष्ठति ॥४८॥

यद्यपीतः प्रयास्यामः परिहर्तुमिहाहवम् ।
किन्तु तेन विना तत्र प्रवेशोऽपि सुदुष्करः ॥४९॥

तत् केवलं प्रवासार्थं नाद्य निर्गमनं हि नः ।
प्रवत्स्यामो ध्रुवं वीर ! संग्रामायैव तत्त्वतः ॥५०॥

तस्यामेव निशि प्रचण्डजलदक्लिष्टेऽपि तारापथे ।
प्रक्रान्तं विधुना निगूढगमनं वेगादिवैकाकिना ॥५१॥

तद् विज्ञाय च साहसातिरसिको दुर्लङ्घ्यगूढाध्वना ।
निष्चक्राम शिवोऽपि बाजिसहितः शीघ्रं यथा निश्चितम् ॥५२॥

**॥ इति श्रीशिवराज्योदये महाकाव्ये महासाहसो नाम ३६ सर्गः समाप्तः ॥**

Scanned by CamScanner

# ॥ श्रीशिवराज्योदये महाकाव्ये ३७ तमः सर्गः ॥

## शत्रुवञ्चना

अथार्धरात्रे घनवर्षसान्द्रे प्रतिध्वनत्स्फूर्जथुभीतभूते ।
मुहुःस्फुरद्वैद्युतभासि केचित् चेरुश्चरा जौहरवाहिनीयाः ॥१॥
पर्णालपर्यन्तभुविप्रभूतशिलोच्चयायां घनशैवलायाम् ।
पदे पदे भूरि परिस्खलन्तो यान्ति स्म ते विश्रमितुं निवेशम् ॥२॥
तेष्वाह कश्चिच्चर आत्मनैव पर्जन्यसंक्लिन्नसमस्तचैलः ।
अद्यान्तिमं पर्यटनं निशीथे श्वो यच्छिवाजिः शरणोन्मुखो नः ॥३॥
अन्योऽवदत् कश्चन रुग्णपादो गर्ताद्बहिर्निष्क्रमितुं सयत्नः ।
नातः परं कृच्छ्रमिदं सहिष्ये वशं प्रपद्येत रिपुर्यतः श्वः ॥४॥
इति ब्रुवाणा भ्रमणातिखिन्ना ध्वनत्सु मेघेष्वपि ते कथञ्चित् ।
तमिस्रगूढे घनगुल्मजालेऽशङ्कन्त धावन्नरयूथमारात् ॥५॥
निशम्य वाताहतवृक्षपर्णतालायमानं पदघातशब्दम् ।
रूक्षस्वरं तिष्ठत तिष्ठतेति श्रान्ताश्चरास्ते सकृदुज्जगर्जुः ॥६॥
साश्चर्यमालोक्यत तैः क्षणेन निजाग्रतो धीरतयोह्यमानम् ।
कराङ्गुलीगण्यजनानुयातं नृवाह्यमेकं चतुरस्रयानम् ॥७॥
नितान्तपर्जन्यतमिस्रघोरे कालेऽधुनारुद्धजनप्रचारे ।
को वाऽथ कोऽस्मिश्चतुरस्रयाने समुह्यतेऽनेन हि दुष्पथेन ॥८॥
अस्मिन् प्रदेशे न गताऽगता वा पिपीलिका चाऽपि न वीक्षिता या ।
आरक्षिभिः संततजागरूकैश्चारैस्तथास्माभिरतीवदक्षैः ॥९॥
इत्येवमाकर्ण्य चरस्य वाचं मूकायमाने सकले नृयूथे ।
उवाच कोऽप्यस्फुटमेकवाक्यं निःसम्भ्रमं सम्भ्रमकारणं च ॥१०॥
आषाढमासस्य हि पूर्णिमायां कुर्वन्ति भक्ता गुरुपादपूजाम् ।
तदद्य यात्येष तदर्थमेव राजाऽस्मदीयो गुरुपादनिष्ठः ॥११॥
संपद्यते सद्गुरुपादपूजा तावन्न सेवेत जलं कुतोऽन्नम् ।
राजाऽस्मदीयो ह्यत एव यामो वेगादमार्गेण विना विरामम् ॥१२॥
श्रुत्वाऽपि राजेति पदं द्विरुक्तम् अविश्वसन्तः श्रवणेन्द्रिये स्वे ।
भ्रमाभिभूताः सकलाश्चरास्ते मुहूर्तमात्रं स्थगिता बभूवुः ॥१३॥
नितान्तमाश्चर्यहतेषु तेषु चरेषु कश्चित् सहसा बभाण ।
प्रब्रूत सत्यं कतमः किमाह्वो भूयस्सु राजस्वयमत्र राजा ॥१४॥
अस्यां महाराष्ट्रभुवि प्रभूताः श्वसन्ति राजेत्ययथार्थसंज्ञाः ।
एकः परं जीवति तेषु राजा शिवाजिरित्युज्ज्वलनामधेयः ॥१५॥

स एव यातीत्यवदन्नकस्मात् सर्वेऽपि ते वाहनवाहकास्तान् ।
श्रुत्वैव तद्वाक्यममी समस्ताश्चराः स्वखड्गान् सहसोदकर्षन् ॥१६॥
ऊचुश्च तारस्वरमादिशन्तो ह्यवैधसञ्चारकृतो जनांस्तान् ।
अलं पदक्षेपमितो विधाय पश्चात् पुरो दक्षिणवामतो वा ॥१७॥
विजापुराधीश्वरवाहिनीया आरक्षिणः स्मोऽत्र चिरं चरन्तः ।
अवैधसञ्चारमहापराधान् जनान्निरोद्धुं हि धृताधिकाराः ॥१८॥
यद्येष राजा स शिवाजिरेव निरुद्ध आसीत् खलु योऽत्र दुर्गे ।
सेनापतिं प्रत्यविलम्बमेव तं नेतुमेते वयमुद्यताः स्मः ॥१९॥
तदत्र युष्माभिरिहैव सर्वैः यथास्थितं स्थेयमचेष्टमानैः।
वृत्तान्तमेनं द्रुतमेव तावत् सेनापतेः कर्णपथं नयामः ॥२०॥
कालेऽधुना कर्तुमकर्तुमत्र सैन्ये समर्थो हि स एक एव ।
यन्निस्सरेद् वाक्यममुष्य वक्त्रात् तदेव युष्मद्भवितव्यमद्य ॥२१॥
उक्त्वेति वाचं सहसा चरास्ते संकेतशब्दं परितो जगर्जुः ।
निशम्य तं चैकपदे समन्तात् प्रपेदिरे शस्त्रधराः प्रवीराः ॥२२॥
संरोध्य तैस्तान् नरयानवाहान् शिवाजिना चापि पलायमानान् ।
स्पशा अमी पङ्किलगर्तगूढपथेन सेनापतिमभ्यगच्छन् ॥२३॥
प्रबोधितोऽसाऽवतिगाढनिद्रा-सुखावमग्नः प्रतिहाररक्षैः ।
प्रमृज्य नेत्रे पुरतो ददर्श स्पशानमून् पङ्कविलीढचैलान् ॥२४॥
तत्सन्निधौ सत्वरमेत्य सर्वेऽप्येकस्वरं हर्षविकस्वराक्षाः ।
भू-शीर्षसंस्पर्शमतिप्रणम्य बन्दीकृतस्ते रिपुरित्यवोचन् ॥२५॥
प्रगाढनिद्रातिवशंगतोऽसावाकस्मिकं दृश्यमदो वचश्च ।
पश्यंश्च शृण्वन् क्षणमात्रमन्तर्मेने सुखस्वप्नमहं विलोके ॥२६॥
ततश्च नेत्रे परिमृज्य भूयः श्रोत्रे च निष्पीड्य भुजौ विधूय ।
जृम्भाभिरास्यं च विवृत्य सोऽथ जागर्तिमात्मन्यतिनिश्चिकाय ॥२७॥
पप्रच्छ चामूनतिहृष्टवक्त्रान् आश्चर्यवद् वीरवरः स भूयः ।
कः को रिपुर्मे क्व कदा कथं रे बन्दीकृतो ब्रूत सविस्तरं तत् ॥२८॥
ते प्रोचुरुच्चैः प्रकटाट्टहासाः सेनापते भूमितलेऽखिलेऽस्मिन् ।
एको हि शत्रुस्तव योऽत्र दुर्गे संकुण्ठितोऽद्यावधि सैन्यपाशे ॥२९॥
गच्छन्निशीथे चतुरस्रयानम् अध्यास्य गूढं नरवृन्दनीतम् ।
अस्माभिरव्याहतजागरूकैः वने निरुद्धः स शिवाजिरद्य ॥३०॥
श्रुत्वैव तद् वाक्यमपारहर्षप्रोत्तुङ्गकल्लोलविलोलचेताः ।
स तीव्रकादम्बरभूरिपानप्रमत्तवत् ताण्डवितं चकार ॥३१॥

उद्घोषयन्नुच्चतरस्वरेण नामानि चात्मप्रियबान्धवानाम् ।
स आह्वयामास तदैव सर्वान् बन्धून् निजानन्दमिवोपभोक्तुम् ॥३२॥
आकर्ण्य सन्देशममुष्य सर्वेऽप्याश्चर्यमग्ना इव बान्धवास्ते ।
अन्ये तथैवाधिकृताः प्रवीराः सेनापतेः सन्निकटेऽन्वधावन् ॥३३॥
प्रत्येकमाह स्म पुनः पुनश्च स जौहरो गर्वित एकवाक्यम् ।
जानीहि जानीहि मयाऽद्य बद्धः शिवाजिनामा गिरिमूषकोऽसौ ॥३४॥
त्वरध्वमस्मिन् क्षण एव सर्वेऽप्यानेतुमेनं द्रुतमस्मदग्रे ।
वनेऽवरुद्धः कपटे पटीयान् स निस्सरेदाखुवदाशु गर्ते ॥
फतेहखानो न तथाफझुल्लः न फाजलो वा न च कश्चिदन्यः ।
शशाक यं बन्धुमरिं कथञ्चित् स मेऽधुना हस्तगतः शिवाजिः ॥३६॥
जामातरस्मिन् क्षण एव याहि मसूद ! नूनं रिपुसूदनोऽसि ।
साम्राज्यशत्रुं प्रपलायमानं निर्बध्य मामानय रज्जुपाशैः ॥३७॥
आदेशमन्वेव हि जौहरस्य जामातृभूतः स मसूदनामा ।
आनेतुमग्रे श्वशुरस्य शत्रुम् अल्पेन सैन्येन समं प्रतस्थे ॥३८॥
तमोनिगूढे पथि भूरिपङ्के सशैवलग्रावणि गाढगर्ते ।
पदे पदे ते बहुधा स्खलन्तोऽप्ययुः पुरस्ताद् यवनाः सवेगम् ॥३९॥
विद्युद्विभाद्योतितमन्धकारे नृवृन्दमालोक्य च नातिदूरे ।
जगर्जुरुच्चैरखिलाः सहर्षं प्राप्ता वयं तिष्ठत तिष्ठतेति ॥४०॥
पलायमानं पथि सन्निरुद्धं शिवाजिमारक्षिभिरात्मनीनैः ।
समीपमभ्येत्य निरीक्ष्य भूयो मसूद आनन्दमनन्तमाप ॥४१॥
कादम्बिनीच्छादितपूर्णचन्द्रे तस्मिन्निशीथेऽल्पतरप्रकाशे ।
उष्णीषिणं श्मश्रुलमासनस्थं विलोक्य निश्चिक्युरमुं शिवाजिम् ॥४२॥
प्रतीक्षमाणं श्वशुरं प्रतीमं शिवाजिमाक्रष्टुमना मसूदः ।
तेनाऽध्वना कर्दमदुर्गमेण यथागमं मङ्क्षु पुनः प्रतस्थे ॥४३॥
यथा यथाऽसौ शिबिरे स्थितानां दृक्पातसीमानिकटे प्रपेदे ।
तथा तथा जौहरवाहिनीनां जयध्वनिर्व्योम्नि भृशं जजृम्भे ॥४४॥
प्राप्तः स्वहस्ते विजयोऽद्य साक्षात् शिवाजिरूपेण चिरेप्सितोऽसौ ।
मत्वेति सेनापतिना सहैव सर्वेऽपि योधाः ननृतुः सहर्षम् ॥४५॥
दृष्ट्वा पदक्षेपममुष्य पुंसः ह्यधीरवीरोचितमात्तशङ्कः ।
स जौहरस्तुच्छतया तमुच्चैः पप्रच्छ किं खल्वसि रे शिवाजिः ॥४६॥
उवाच मन्दं स युवाप्यभीतः शिवाजिरेवाऽस्मि निजेन नाम्ना ।
बद्धो वृथारक्षिजनैस्तु मूढैः वृत्त्या यतोऽहं खलु नापितोऽस्मि ॥४७॥

Scanned by CamScanner

प्रकोष्ठमालोक्य विलोम तस्य जात्याऽथ वृत्याऽपि च नापितस्य ।
स्वकवञ्जने निर्गतसंशयास्ते संप्राप्तलज्जा यवना बभूवुः ॥४८॥

शिवाजिनामा स च नापितस्तैः प्रवञ्चनोद्दीप्तमहाप्रकोपैः ।
अनेकशः काष्ठकशाप्रहारैः प्रताडितो वेत्तुमशेषवृत्तम् ॥४९॥

स पीडितोऽप्याहतिभिर्नितान्तं बिभेद नैषन्निजमौनमुद्राम् ।
आपत्सु भर्तुः खलु सेवकानां रहस्यसंगोपनमेव धर्मः ॥५०॥

तयात्मनो वञ्चनया तदानीं प्रतर्क्य शत्रोः कपटप्रयोगम् ।
स जौहरस्तत्क्षण एव सर्वान् प्रस्थातुमाज्ञापयदात्मनीनान् ॥५१॥

मार्गे मार्गयितुं शिवं निशि तदा दुर्गान्तरं प्रस्थितं
संक्रुद्धो निजवञ्चनेन समरे हन्तुं च तं वञ्चकम् ।
तत्कालं महतीं तुरङ्गमचमूमादाय पत्त्यन्वितां
जामाता स हि जौहरस्य बलिनः सेनापतेर्निर्ययौ ॥५२॥

**॥ इति श्रीशिवराज्योदये महाकाव्ये शत्रुवञ्चना नाम
३७ सर्गः समाप्तः ॥**

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये ३८ तमः सर्गः ॥

## बाजिविक्रमः

अथाध्वानमतिक्रम्य दीर्घं घोरं सुदुर्गमम् ।
कृतार्थतां शिवो मेने समुद्रमिव मारुतिः ॥१॥
प्राच्यामरुणिमानं च फुल्लाम्बुजसहोदरम् ।
आलोक्योद्गच्छदरुणप्रभवं विजहर्ष सः ॥२॥
निरीक्ष्य परितः सह्यं परीतं वनराजिभिः ।
अधित्यकाभिरात्मानं गोपयन्तं तुतोष सः ।३॥
ततः कलकलो भ्राम्यत्-खगानां वनवासिनाम् ।
भीतिजन्य इवाकस्मात् परितः शुश्रुवे वनम् ॥४॥
ससम्भ्रमं प्रधावन्ति वृन्दानीतस्ततस्तथा ।
कपीनां च मृगाणां च व्यलोक्यन्त समन्ततः ॥५॥
आक्रन्दमार्तं विद्धानां चित्रकाणां विजृम्भितम् ।
दूरादपि स शुश्राव तत्प्रतिध्वनिमेदुरम् ॥६॥
स तर्ककुशलो धीमान् सहसैवान्वमन्यत ।
लिङ्गैराकस्मिकैरेतैर्भयस्थानमुपागतम् ॥७॥
निजानुयात्रिकान् कांश्चित् स हि तत्कालमादिशत् ।
वृक्षाग्रेषु समारुह्य परितो दृश्यतामिति ॥८॥
अखण्डजागरक्लेशकषायितविलोचनैः ।
तैर्नातिनिकटे दृष्टमश्वानीकं प्रवेगवत् ॥९॥
अश्वानीकमिति ज्ञात्वा बाजिराजिविशारदः ।
शिवराजं प्रणम्याह स्वामिनिष्ठोचितं वचः ॥१०॥
स्वामिन् गवेषयन्तोऽस्मान् रुद्धदुर्गविनिर्गतान् ।
प्रधावन्तीत एवेमे संक्रुद्धा रिपुसैनिकाः ॥११॥
अस्मन्निर्गमनं तेषां विदितं चेत् सुनिश्चितम् ।
क्षुधार्तेवापतेदत्र समग्रारि-वरूथिनी ॥१२॥
निमेषलेशलक्षांशोऽप्यधुनाऽत्र प्रतीक्षितुम् ।
जानात्येव महाराजः समयो नावशिष्यते ॥१३॥
न प्रार्थनार्थं समयः कुतस्तत्पुनरुक्तये ।
तद् यद् ब्रवीति दासोऽयं तत् सर्वं प्रतिमान्यताम् ॥१४॥
प्रास्ताविकमपीदं मे नूनमक्षणभाषणम् ।
अज्ञस्य हि विशेषज्ञः स्वामी तत् क्षन्तुमर्हति ॥१५॥
त्वत्सान्निध्यातिलुब्धोऽपि प्रार्थये नतमस्तकः ।
इतो दूरं प्रयाहीति क्षणेऽस्मिन्नेव कुत्रचित् ॥१६॥

Scanned by CamScanner

यमाश्रयितुकामस्त्वमाप्रयाणक्षणादसि ।
असौ विशालदुर्गस्ते नातिदूरे व्यवस्थितः ॥१७॥
तमाक्रम्य प्रवेगेन ध्वंसयित्वा विरोधकान् ।
शतघ्नीध्वनिभिर्वार्तां मामावेदय चात्मनः ॥१८॥
तावद् विचूर्णयाम्येतानरातीनाततायिनः ।
उच्चैरापततो वेगात् पयोदानिव पर्वतः ॥१९॥
स्वामिनिष्ठैकशीलस्य वचस्तस्य निशम्य तत् ।
प्रसन्नोऽपि विषण्णोऽभूत् सुहृत्स्नेहमयः शिवः ॥२०॥
आपत्सु धर्मो भृत्यानां स्वामिसंरक्षणं यथा ।
तथैव भृत्यसंत्राणं स्वामिनोऽपि हि तत्त्वतः ॥२१॥
मदर्थमयमात्मानं संग्रामे होतुमिच्छति ।
कथमानृण्यमेतस्य प्राप्नुयामिह जन्मनि ॥२२॥
निष्कृतिः शक्यते कर्तुं त्यागानां विविधात्मनाम् ।
हौतात्म्यरूपत्यागस्य न सम्भवति सा क्वचित् ॥२३॥
अभिधेयं विधेयं वाऽवसरेऽस्मिन् कथं नु किम् ।
इत्यशक्तः स निर्णेतुं प्रेम्णा सुहृदमैक्षत ॥२४॥
मनसा भक्तिसान्द्रेण निध्यायञ्जगदीश्वरम् ।
व्याकुलः प्रार्थयामास मित्रकल्याणधीः शिवः ॥२५॥
"मृत्युञ्जय ! महाकाल ! घोरेऽस्मिन् राष्ट्रसंकटे ।
दैत्यसंहारसामर्थ्यं तवाधेहि सुहृत्सु मे ॥२६॥
निष्कामराष्ट्रसेवोत्थं यत् पुण्यं मयि किञ्चन ।
संक्रामयस्व तत् सर्वं सुहृत्स्वेतेषु मेऽधुना ।
शस्त्रेष्वापात्यमानेषु रिपुभिर्मत्सुहृद्गणे ।
साधुत्राणचणाऽसौ ते करुणा कवचायताम् ॥२८॥
अल्पसंख्या इमे वीरा असंख्येयाश्च ते द्विषः ।
सहस्रगुणमेतेषां प्रत्येकं वर्धतां बलम् ॥२९॥
स्वातन्त्र्यसमरस्यास्य मयि धूर्निहिता त्वया ।
तन्निर्वाहाय देहोऽयं रक्षणीयः कथञ्चन ॥३०॥
त्वदीयायैव कार्याय जिजीविषुरहं प्रभो !
कृच्छ्रादितः प्रयास्यामि न कलेवरलोभतः ॥३१॥
श्रद्दधे सर्वभूतानां हृद्देशे तिष्ठसीति हि ।
विदांकरोषि तन्नूनं भावना मम हृद्गताः ॥३२॥
क्षम्यतामपराधो मे करुणाघन सर्वथा ।
रणान्निर्गच्छतः कृच्छ्रे विहायैतान् सुहृज्जनान् ॥३४॥

Scanned by CamScanner

इत्यशब्दं हृदि ध्यात्वा बाष्पाविलविलोचनः ।
सुहृदं बाजिमालिङ्ग्य क्षणाद् वेगेन निर्ययौ ॥३४॥
षट्शतानां प्रवीराणां शिवमन्वगमंस्तदा ।
बाजिवागनुसारं हि त्रिशतं शिवसैनिकाः ॥३५॥
शेषैश्च नरशार्दूलैः शत्रुध्वंसविशारदैः ।
दुर्गमं गह्वराध्वानं रोद्धुं बाजिः प्रचक्रमे ॥३६॥
बृहत्तमाश्च ग्रावाणः शतशोऽथ सहस्रशः ।
सञ्चिताः सहसा सर्वैर्भेत्तुं मुण्डानि विद्विषाम् ॥३७॥
शाखाः करिकराकारा पादपानामनेकशः ।
विच्छिन्ना मुसलीकर्तुं द्विषन्निष्पेषणोचिताः ॥३८॥
यद् यदालक्षितं किञ्चिद् वन्यं संहारसाधनम् ।
तत् तत् सपदि तैर्वीरैः संहसा सञ्चितं तदा ॥३९॥
बाजिराह तदा सर्वान्निजादेशवशंवदान् ।
उच्चैरुद्दीपयंस्तेषां वीर्यं वायुरिवानलम् ॥४०॥
बान्धवाः जीवितेऽस्माकं पुण्यकालोऽयमागतः ।
यत् स्वातन्त्र्यमहादेवं त्रातुं युद्ध्यामहेऽधुना ॥४१॥
विच्छिन्ने दक्षिणे पाणौ पुनः सव्येन युध्यताम् ।
उभयोरपि विच्छेदे शिरोघातं च युध्यताम् ॥४२॥
रुग्णेऽथ दक्षिणे पादे सव्ये स्थित्वैव युध्यताम् ।
रुग्णयोः पदयोर्जान्वो समुत्थाय प्रयुध्यताम् ॥४३॥
युद्धमेतन्न योद्धव्यं बाहुभ्यामेव केवलम् ।
प्रत्येकमङ्गुली चापि यततामरिमर्दने ॥४४॥
पिपासा चेत्प्रबाधेत रिपोः पिबत शोणितम् ।
बुभुक्षायां प्रदीप्तायां मांसं खादत शात्रवम् ॥४५॥
किं ब्रवीम्यधुना प्राप्ताः शत्रवस्ते पुरस्सराः ।
प्राणेष्वपि प्रयातेषु युद्ध्यन्तां कुणपानि नः ॥४६॥
सहस्रं द्विषतामत्र प्रत्येकं घातयेम चेत् ।
त्रिशतं चापि भूयास्म लक्षत्रयमिता वयम् ॥४७॥
गणयित्वा शिरांस्येव गण्यास्ते पामराः नराः ।
वीराः परन्तु सङ्ग्रामे खण्डितैः रिपुमुण्डकैः ॥४८॥
तदल्पसंख्यतामूलं कातर्यं माऽस्तु नोऽधुना ।
शिवकार्यधुरीणानामशिवं तत् कथं स्पृशेत् ॥४९॥
विवेकविधुरो मृत्युर्ग्रसेतापि वपूंषि नः ।
ग्रसितुं न समर्थोऽसौ यशांसि तु हुतात्मनाम् ॥५०॥

Scanned by CamScanner

अस्माकं विद्धकायानां रुधिरैरभिषिञ्चितः ।
तीर्थीभवेदयं नूनं निगूढः कन्दरापथः ॥५१॥
आत्मानं विजुहूषूणामाहवे राष्ट्रहेतवे ।
अपि सिद्धदशारूढाः कलां नार्हन्ति षोडशीम् ॥५२॥
वर्षतीत्थं तदा तस्मिन् ज्वलद्वीररसायनम् ।
आक्रान्तं म्लेच्छमातङ्गकदम्बैस्तत्र गह्वरे ॥५३॥
स्वामिभक्तिमहाज्योतिर्भूतामल्पीयसीं चमूम् ।
अमूं निर्वापयन्तीव ववृधे रिपुवाहिनी ॥५४॥
पुरः प्रक्षिप्यमाणं हि प्रत्येकं चरणं रिपोः ।
निमिषे निमिषे च्छिन्नमदृश्यत रणाजिरे ॥५५॥
प्रसर्पतोऽग्रतो वेगाद् मस्तकं द्विष उच्चकैः ।
सपद्येव विनिष्कृत्तं न्यपतद् धरणीतले ॥५६॥
यो यः शस्त्रधरो बाहुरीषदुच्चैरदृश्यत ।
न्यपात्यत स्फुरत्खड्गाघातेन स स भूतले ॥५७॥
समूहशोऽग्रतः सर्तुं यतमाना द्विषद्गणाः ।
बृहच्छिलाघनाघातैर्विलुण्ठन्तोऽपतन्नधः ॥५८॥
उच्चैरारोढुमध्वानं नाशक्नोत् स द्विषद्गणः ।
प्रोच्छलन्नपि वेगेन प्रवाह इव पर्वतम् ॥५९॥
अलिपष्ठया तया चम्वा कुण्ठितारिवरूथिनी ।
बभासे दीपभासेव विनिरुद्धा निशीथिनी ॥६०॥
स प्रापदरिसंमर्दो वैक्लव्यं भूरि मर्दनैः ।
भार्गवस्य शराघातैः क्रौञ्चवानिव मार्दवम् ॥६१॥
क्षिप्ता म्लेच्छगणैर्वेगात् तस्मिन् वीरगणे लघौ ।
शस्त्राघाता वृथाऽभूवन्नलाता इव पल्वले ॥६२॥
अशक्ताः पुरतः सर्तुं प्रादेशान्तरमप्यमी ।
अवाच्यवादैरन्योन्यमनिन्दन्नरयो भृशम् ॥६३॥
प्रस्कन्द्यमानामात्मीयामवलोक्य वरूथिनीम् ।
म्लेच्छसेनाधुरीणानामन्तर्भीत्याऽतिजग्रसे ॥६४॥
असृग्लोहितसर्वाङ्गं विद्युद्दीप्रविलोचनम् ।
भ्राम्यत्खड्गयुगं बाजि कालाग्निं मेनिरेऽरयः ॥६५॥
उद्दीपयन्त्यः स्वान् वीरांस्तदुदीर्णा हि घोषणाः ।
धीराणामपि शत्रूणां हृदयानि व्यदारयन् ॥६६॥
सर्वात्मनाऽरिविध्वंसे बाजिर्व्यग्रोऽपि सन्ततम् ।
शतघ्नीध्वनिमेकं तं श्रोतुमैच्छत् क्षणे क्षणे ॥६७॥

तत्रार्पितावधानत्वात् सङ्ग्रामकुशलोऽपि सः ।
कुतस्त्येनापि बाणेन हन्त मर्मणि निहतः ॥६८॥
सहस्रव्रणनिस्तब्धसर्वगात्रः स वीर्यवान् ।
विद्धस्तेनेषुपातेन पातितो बत भूतले ॥६९॥
निपातमात्मनो दृष्ट्वा निर्धैर्या मा स्म भूच्चमूः ।
इति प्रोच्छुष्ककण्ठोऽपि जगर्ज रणघोषणाः ॥७०॥
तं तथाभूतमालोक्य केचित् तदनुयायिनः ।
उत्सृज्य शत्रुसंहारं परितस्तस्थुराकुलाः ॥७१॥
शेषास्तु बाजिसंदेशं स्मारं स्मारं पदे पदे ।
असंख्यारिसमाक्रान्ता अप्ययुध्यन्त सन्ततम् ॥७२॥
तेषु प्रत्येकमाहत्य शतानि शिवविद्विषाम् ।
विच्छिन्नसर्वगात्रोऽपि न विश्रमितुमैहत ॥७३॥
समुत्थातुमशक्तोऽपि स बाजिर्विलुठन् भुवि ।
भृशं प्रायततोत्थाय पुनः सङ्ग्रामकेलये ॥७४॥
उवाच क्षामकण्ठोऽसौ सुहृदः परितः स्थितान् ।
विलग्ननेत्रान् खिन्नवक्त्रांस्तदवस्थाविलोकनैः ॥७५॥
"एष आह्वयते मृत्युः परलोकाय मामितः ।
असमाप्य तु कर्तव्यं न त्यजेयं कलेवरम् ॥७६॥
स्वामिनः कुशलावेदी शतघ्नीध्वनिरुच्चकैः ।
यावत्कर्णपथं नेयान्न त्यजेयं कलेवरम् ॥७७॥
नैवेदानीमलं भयात् तव मृत्योऽखिलं बलम् ।
मम प्राणानितो हर्तुं स्वाम्यर्थं हि जिजीविषोः ॥७८॥
रुधिराविलग्नमेतन्मे कायमस्तुमिहागताः ।
गृध्रा गच्छत वृत्तान्तं ज्ञातुं मे स्वामिनो द्रुतम् ॥७९॥
स्वामिनः कुशलं श्रुत्वा स्वयं जह्यामिदं वपुः ।
युष्माकमेव तृप्त्यर्थं न मे प्रीतिः कलेवरे ॥८०॥
न हि शस्त्रव्रणैरेतैरल्पीयस्यपि मे व्यथा ।
ध्वनिप्रतीक्षया किन्तु सैवात्यन्तगरीयसी ॥८१॥
निश्वासा यात रे दूरं वायुवेगेन सत्वरम् ।
शिवराजशुभोदन्तं मामावहत बान्धवाः ॥८२॥
इत्थं प्रतिक्षणमसावतिविह्वलात्मा
विच्छिन्नमूर्तिरशृणोत् सहसा ध्वनिं तम् ।
कर्तव्यपूर्तिसुखमात्मनि तेन विन्दन्
शैवं पदं हि शिवमग्नमना जगाम ॥८३॥

॥ इति श्रीशिवराज्योदये महाकाव्ये बाजिहौतात्म्यं नाम
३८ तमः सर्गः समाप्तः ॥

तत्रापितावधानत्वात् सङ्ग्रामकुशलोऽपि सः ।
कुतस्त्येनापि बाणेन हन्त मर्मणि निर्हतः ॥६८॥
सहस्रव्रणनिस्तष्टसर्वगात्रः स वीर्यवान् ।
विद्धस्तेनेषुपातेन पातितो बत भूतले ॥६९॥
निपातमात्मनो दृष्ट्वा निर्धैर्या मा स्म भूच्चमूः ।
इति प्रोच्छुष्ककण्ठोऽपि जगर्ज रणघोषणाः ॥७०॥
तं तथाभूतमालोक्य केचित् तदनुयायिनः ।
उत्सृज्य शत्रुसंहारं परितस्तस्थुराकुलाः ॥७१॥
शेषास्तु बाजिसंदेशं स्मारं स्मारं पदे पदे ।
असंख्यारिसमाक्रान्ता अप्ययुध्यन्त सन्ततम् ॥७२॥
तेषु प्रत्येकमाहत्य शतानि शिवविद्विषाम् ।
विच्छिन्नसर्वगात्रोऽपि न विश्रमितुमैहत ॥७३॥
समुत्थातुमशक्तोऽपि स बाजिर्विलुठन् भुवि ।
भृशं प्रायततोत्थाय पुनः सङ्ग्रामकेलये ॥७४॥
उवाच क्षामकण्ठोऽसौ सुहृदः परितः स्थितान् ।
क्लिन्ननेत्रान् खिन्नवक्त्रांस्तदवस्थाविलोकनैः ॥७५॥
"एष आह्वयते मृत्युः परलोकाय मामितः ।
असमाप्य तु कर्तव्यं न त्यजेयं कलेवरम् ॥७६॥
स्वामिनः कुशलावेदी शतघ्नीध्वनिरुच्चकैः ।
यावत्कर्णपथं नेयान्न त्यजेयं कलेवरम् ॥७७॥
नैवेदानीमलं भूयात् तव मृत्योऽखिलं बलम् ।
मम प्राणानितो हर्तुं स्वाम्यर्थं हि जिजीविषोः ॥७८॥
रुधिराक्लिन्नमेतन्मे कायमस्तुमिहागताः ।
गृध्रा गच्छत वृत्तान्तं ज्ञातुं मे स्वामिनो द्रुतम् ॥७९॥
स्वामिनः कुशलं श्रुत्वा स्वयं जह्यामिदं वपुः ।
युष्माकमेव तृप्त्यर्थं न मे प्रीतिः कलेवरे ॥८०॥
न हि शस्त्रव्रणैरेतैरल्पीयस्यपि मे व्यथा ।
ध्वनिप्रतीक्षया किन्तु सैवात्यन्तगरीयसी ॥८१॥
निश्वासा यात रे दूरं वायुवेगेन सत्वरम् ।
शिवराजशुभोदन्तं मामावहत बान्धवाः ॥८२॥
इत्थं प्रतिक्षणमसावतिविह्वलात्मा
विच्छिन्नमूर्तिरशृणोत् सहसा ध्वनिं तम् ।
कर्तव्यपूर्तिसुखमात्मनि तेन विन्दन्
शैवं पदं हि शिवमग्नमना जगाम ॥८३॥

**॥ इति श्रीशिवराज्योदये महाकाव्ये बाजिहौतात्म्यं नाम ३८ तमः सर्गः समाप्तः ॥**

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये ३९ तमः सर्गः ॥

## ॥ जीवदानम् ॥

लब्धप्रवेशोऽथ विशालदुर्गे शीघ्रं पराजित्य हि सूर्यरावम् ।
प्रतीक्षमाणः स्वसुहृद्गणं तं ददर्श चारं पुरतः शिवाजिः ॥१॥
उदन्तजातं समरस्य तस्माद् आकर्ण्य हर्षाकुलमानसोऽपि ।
यशोऽवशेषं सुहृदं विदित्वा वज्राहतिं सोऽनुबभूव घोराम् ॥२॥
तस्मिन् क्षणे तस्य सुहृद्वरस्य सा मूर्तिरत्युत्कटभक्तिभाजः ।
दिव्यौजसा भूरि परिस्फुरन्ती शिवेन सास्रं ददृशेऽन्तरङ्गे ॥३॥
वाणी तदीया विशदाक्षरा च सुव्यक्तमन्तः श्रवणेन्द्रियेण ।
संश्रूयमाणाऽद्भुतभावरम्या न्यमज्जयन्मोहमहाम्बुधौ तम् ॥४॥
"स्वामिन्! मयात्यल्पबलेन चापि त्वद्भक्तिसंप्रेरितदिव्यशक्त्या ।
कल्पान्तवातेरितसागरोत्थकल्लोलकल्पा रिपवो निरुद्धाः ॥५॥
परन्तु हा हन्त! तनुर्ममेयं त्वदन्नपुष्टापि कृतघ्नभूता ।
त्वदीयकल्याणविबोधकं तं ध्वनिं ह्यनाकर्ण्य भुवं प्रपन्ना ॥६॥
प्राणा इमे प्राप्तविमूढभावाः भृशत्वरास्त्यक्तुमिमां तनूं च ।
निरोधिता भूरिपरिश्रमेण मयारिसंघातवदेव देव ॥७॥
इत्थं सुकार्ये महति त्वदीये जातः प्रमादः खलु यः कथञ्चित् ।
तत् प्रार्थये भूतलनम्रशीर्षः क्षमस्व तं देव ममापराधम् ॥८॥
इतीरयित्वा गिरमार्तनेत्रा तेजोमयी साद्भुतबाजिमूर्तिः ।
अर्चिष्मता दिव्यपथेन यान्ती शिवेन भक्त्या सुचिरं ववन्दे ॥९॥
बद्धाञ्जलिर्निर्गलदश्रुनेत्रः विलुप्तनैसर्गिकसुस्मितोऽसौ ।
मुहुः श्वसन् दीर्घतरं शिवाजिः सुहृद्गणैर्दूनतरैर्व्यलोकि ॥१०॥
विशालदुर्गे कतिचिद्दिनानि कृत्वा निवासं स यशोनिवासः ।
निजात्मजापद्भिरजस्रदूनां तां मातरं द्रष्टुमना बभूव ॥११॥
महत्तमापत्ति-नितान्तमग्न-स्वपुत्र-कल्याणनिमित्तमेव ।
निरन्तरं दैवतवृन्दपूजाव्यग्रामिमां राजगडे ददर्श ॥१२॥
प्राणप्रियं तं प्रणतोत्तमाङ्गं प्रमोदजन्याश्रुजलार्द्रनेत्रम् ।
ददर्श पुत्रं वनवासकृच्छ्रैः सा कर्षिताङ्गं रघुनन्दनाभम् ॥१३॥
निरस्तदुष्टारितमःप्रभावं यशःप्रभाव्यापितदिग्वितानम् ।
तृषातुराक्षणा सुतमीक्षमाणा दीपोत्सवं मूर्तमसौ ददर्श ॥१४॥
तद्दर्शनोत्फुल्लितचित्तवल्ली सा श्रुण्वती पुत्रनिवेदितास्ताः ।
सङ्ग्रामकेलीर्विजयप्रसन्नाः भाग्यं विजज्ञौ रघुनाथमातुः ॥१५॥

संप्रार्थयामास च देवमन्तः नितान्तभक्त्या दृढमेविसं तम् ।
प्रभो ! स्वभक्तापदमुद्धरन् ते शिवे कृपाच्छत्रमखण्डमस्तु ॥१६॥
तत्र स्थितो राजगडे स्वमातृप्रेमप्रसादापहृताखिलाधिः ।
स चिन्तयामास दिवाऽथ नक्तं स्वराज्यशत्रुघ्नमुपायजातम् ॥१७॥
दिल्लीपतेर्मातुल उन्मदात्मा शाहिस्तखानाभिध इद्धगर्वः ।
दिने दिने दीनजनान् विशुष्यन् शिवान्तकर्त्वैर्व्यथयाञ्चकार ॥१८॥
स चाकणाख्यं महता बलेन च्छलेन चैकं विजिगाय दुर्गम् ।
यद्रक्षणायाल्पतमैः प्रवीरैः नियुध्यमानैश्चकितोऽरिसंघः ॥१९॥
विजापुरेशेन निमन्त्रितोऽसौ शिवाधिराज्यस्य विमर्दनाय ।
दुर्गं परिण्डाख्यममुष्य चैव जित्वाऽकरोत् तन्मनसः प्रकम्पम् ॥२०॥
तस्सान्त्वनार्थं प्रहितोऽग्रदूतः शिवाजिना वीतवया डबीरः ।
स किन्तु दुर्गद्वयलाभमत्तः तत्सामवाक्यानि तिरश्चकार ॥२१॥
तस्योच्चकैर्दक्षिण-दिग्जिगीषाम् उच्छेत्तुकामो रणनीतिविज्ञः ।
पर्णालदुर्गे सततप्रवृत्तं सङ्ग्राममाच्छेत्तुमियेष वीरः ॥२२॥
प्रागेव संदेशहरोऽग्रदूतः स्वराज्यमुद्राङ्कितराजपत्रम् ।
आदाय मूर्ध्ना च शिवं प्रणम्य पर्णालदुर्गं प्रति संप्रतस्थे ॥२३॥
दुर्गोत्तमं तं रिपवे समर्प्य राजाज्ञया निर्मदजोहराय ।
प्रत्यागतस्त्र्यम्बकभास्करोऽसौ नातिप्रसन्नः शिवपादमूलम् ॥२४॥
प्राप्तस्तदानीं गिरिगर्भगाही कश्चिच्चरो वृत्तनिवेदनाय ।
निर्मक्षिकं वीक्ष्य समन्ततोऽसौ जगाद शत्रोर्नवचेष्टितानि ॥२५॥
"स्वामिन्निदानीं शरदादिकाले प्रस्थानपङ्के सुतरापगे च ।
प्लवङ्गवृन्दैरपि दुर्विलङ्घ्यं सह्याद्रिमुल्लङ्घितुमुद्यतोऽरिः ॥२६॥
प्रोत्साहितः कोङ्कणविक्रमाय मत्तेन दिल्लीपतिमातुलेन ।
अनेकवीरानुगतः प्रयाति चमूपतिः कार्तलबाभिधानः ॥२७॥
व्याघ्रीव धीरा प्रथिता च राजव्याघ्रीति नाम्ना महिला बलाढ्या ।
अरण्यमार्गे तमनुप्रयाति रक्षोगणं शूर्पणखेव नव्या ॥२८॥
अरातिसेना निबिडे च तुङ्गारण्येऽधुनाऽसंख्य-गजाश्वतुङ्गा ।
कृच्छ्रेण याति प्रतिपादमुच्चैः पथा वहन्ती महतीव सिन्धुः ॥२९॥
न पानयोग्यानि जलानि तत्र स्थली निवासानुचिताऽखिलाऽपि ।
वराह-शार्दूल-वृकोदराश्च कुर्वन्ति पीडां रिपुसैनिकानाम् ॥३०॥
वृत्तं यथावृत्तमिदं समग्रं निवेदितं स्वामिपदाब्जमूले ।
कालोचितं निर्णयमत्र कर्तुं कोऽन्यो भवत्तो नरदेव ! शक्तः ॥३१॥
प्रयातमात्रे हि चरेऽतिशीघ्रं निमन्त्रितास्तत्र तदा शिवेन ।
तान्हाजि-नेताजि-पिलाजि-मुख्याः सङ्ग्रामलीलारसिकाः सखायः ॥३२

स्वयं च सङ्ग्राममहोत्सवार्थं विधृत्य लौहं कवचं किरीटम् ।
तुरङ्गमारुह्य च वीरवर्यैः अन्वागतो योद्धुमना बभूव ॥३३॥
नृसिंहसङ्घः शिवनायकोऽसौ सहचप्रविष्टारिमतङ्गवृन्दम् ।
विध्वंसितुं शस्त्रनखाग्रपातैः ययौ गरुत्मत्समतीव्रवेगः ॥३४॥
प्रविश्य ते सत्वरमेव तुङ्गारण्यं निलीनास्तरुगुल्मपार्श्वे ।
रिपुप्रवेशं परिवीक्षमाणा निःशब्दसञ्चारमधिष्ठिताश्च ॥३५॥
दुराक्रमाध्वाक्रमणातिखिन्नास्त औत्तराहा यवनप्रवीराः ।
कथञ्चिदुग्रं तदरण्यमेत्य विश्रान्तिसौख्यं क्षणमन्वभूवन् ॥३६॥
क्षणेऽपरस्मिंस्तरुगुल्मलीनः चिरं युयुत्सुः स नृसिंहसङ्घः ।
पपात तस्मिन् रिपुसैन्यवृन्दे कार्पासराशाविव दीप्तवह्निः ॥३७॥
तेषां प्रहारैः प्रहरार्धकाले म्लेच्छप्रवीरैः प्रहृतासुभिश्च ।
सारण्यभूमिः सहसैव जाता शृगालजातेः खलु भोगभूमिः ॥३८॥
शूलैः कृपाणैरिषुभिश्च भल्लैः महाश्मभिश्चोन्नतवृक्षखण्डैः ।
अखण्डमुच्चैः परिखण्ड्यमाना सा म्लेच्छसेना नितरां ननाश ॥३९॥
तदात्मपक्षक्षयमीक्षमाणोऽप्यसौ हठात् कार्तलबो युयुत्सुः ।
प्रोत्साहयन् वीरवरान् स्वसैन्ये जगर्ज दीन्दीनिति शुष्ककण्ठः ॥४०॥
वीक्ष्यात्मपक्षक्षयमेव राजव्याघ्री ह्यसौ प्रोषितधीरभावा ।
निरोद्धकामा निजसैन्यनाशं सेनापतिं कार्तलबं जगाद ॥४१॥
सेनापते ! नूनमसि प्रवीरः समग्रसङ्ग्रामजयी सदैव ।
परन्तु वीरैरपि युद्धकाले युक्तं न हातुं सहसा विवेकः ॥४२॥
जयस्य लाभाय विहाय सौख्यं कुर्वन्ति वीराः समरे प्रयाणम् ।
स एव जायेत सुदुर्लभश्चेत् श्रेयो हि मन्ये समरात् प्रयाणम् ॥४३॥
प्रदीप्तदावानलमध्यतोऽपि शक्यं प्रयातुं सहसा कथञ्चित् ।
शिवाजिसैन्याक्रमणात् परन्तु कदापि कश्चिन्न बहिः प्रयातः ॥४४॥
तस्याफझुल्लस्य बलोद्धतस्य निःशेषसंहारमकाण्डपातम् ।
शिवाजिसैन्येन कृतं गताब्दे जगद् विजानाति समग्रमेतद् ॥४५॥
न कातरत्वं मयि लेशमात्रं नैसर्गिकं यत् महिलाजनस्य ।
सङ्ग्रामलीलारसिकाऽस्मि राजव्याघ्री न नाम्नाऽपि तु कर्मणैव ॥४६॥
नैकेषु घोरेष्वपि सङ्गरेषु निसर्गसिद्धो मम धीरभावः ।
जानीहि नैव स्खलितः कथञ्चित् दिल्लीन्द्रलक्ष्म्या इव केतुदण्डः ॥४७॥
पुंवत्प्रगल्भाऽस्मि रणाङ्गणेषु वीरैरजय्याऽपि च खड्गयुद्धे ।
ख्यातप्रभावं शिवमप्यमुं च काले निरोत्स्ये न परन्त्विदानीम् ॥४८॥
कालो ह्ययं नः प्रतिकूलगामी निरोधिताः स्मो गिरिगर्भभागे ।
त्रातुं महत् सैन्यमिदं विपन्नं श्रेयस्करी स्याच्छरणप्रपत्तिः ॥४९॥

Scanned by CamScanner

असौ शरण्यः शरणागतानां सुक्षात्रधर्मप्रणयी शिवाजिः ।
आकर्णसंकृष्टधनुर्गुणोऽपि न क्षत्रियो हन्ति पदप्रपन्नम् ॥५०॥
शृण्वन्निदं स्त्रीवचनं सहेलं सोऽपश्यदाराग्निजवीरसङ्घान् ।
विखण्डिताङ्गान् प्रपलायमानान् तृषात्मरक्तान्यपि लेलिहानान् ॥५१॥
शिवाजिसैन्येन जयोन्मदेन ह्यनुद्रुतान् खण्डितधैर्यबन्धान् ।
पदे पदे दुर्धरखड्गपातैः निपात्यमानान् प्रतिकारशून्यान् ॥५२॥
त्रायस्व सेनाधिपतेऽधुनाऽस्मान् केनाप्युपायेन विनाशकाले ।
शिवाजिरूपेण निहन्तुमेति साक्षान्महाकाल उदग्रखड्गः ॥५३॥
इत्यार्तशब्दं वचनं स्वसैन्यधुरन्धराणां बलिनां निशम्य ।
स तत्क्षणं निर्गलिताभिमानः शिवं प्रति स्वं प्रजिघाय दूतम् ॥५४॥
द्रागेव दूतः स च दीनमुद्रः शिवाजिमभ्येत्य हयाधिरूढम् ।
बद्धाञ्जलिः संप्रणिपत्य मूर्ध्ना निहन्यमानेषु दयां ययाचे ॥५५॥
वयं महाराज ! कृतापराधाः वनं प्रविष्टा भवतो यदेतत् ।
कृतापराधेष्वपि दुर्जनेषु न साधवो निष्ठुरतां भजन्ते ॥५६॥
विना जलं मीनवदेव सर्वे हा हा वयं निर्गतजीविताः स्मः ।
दिष्ट्या भवान् दृष्टिपथं प्रपन्नः तृषार्दितानां करुणापयोदः ॥५७॥
दया हि धर्मोऽखिलहिन्दुजातेः अनादिकालाद्भुवने प्रसिद्धः ।
नूनं भवद्रूपधरोऽत्र लोके स एव साक्षात् पुरतः स्थितो नः ॥५८॥
दयामयोऽसौ जगदेकनाथः तस्यावतारो हि भवान् मतोऽत्र ।
अभ्यर्थना तद्भवतः पुरस्तात् कथं न्वियं निष्फलतां भजेत ? ॥५९॥
न स्वर्णदानं न च रत्नदानं न धेनुदानं न च धान्यदानम् ।
न ज्ञानदानं न च राज्यदानं जीवप्रदानस्य तुलां बिभर्ति ॥६०॥
सङ्ग्रामशौर्येण हि निस्तुलेन दिग्गाहिनी सा भवतः सुकीर्तिः ।
प्रदानशौर्येण हि जीवितानां राजन् ! पुनः शाश्वततां भजेत ॥६१॥
शाहिस्तखानेन मदोद्धतेन प्रचोदिताः स्मो वयमत्र देशे ।
फलं परप्रत्ययनेयतायाः पर्याप्तमस्माभिरिहोपभुक्तम् ॥६२॥
दयानिधे भूरि तृषाकुलानां त्राणाय नस्ते करुणैव शक्ता ।
सा चेन्निरस्ता भवता क्षणेऽस्मिन् हा हन्त सर्वेऽपि वयं मृताः स्मः ॥६३
इत्थं वचांसि शरणागतिसूचकानि श्रुत्वारिदूतगदितानि सगद्गदानि ।
निष्कोषितासिरपि शत्रुविमर्दनाय कारुण्यसान्द्रहृदयः शिवराज आह ॥

तोयं पिबन्तु तृषिताः सरितो यथेच्छं
गच्छन्तु निर्भयतया स्वगृहाणि सर्वे ।
कृच्छ्रार्दितेषु हि रिपुष्वपि शस्त्रपातं
धर्मप्रिया वयमिमे न कदापि कुर्मः ॥६५॥

सद्धर्मरक्षणकृतेऽस्मि गृहीतखड्गः
तत्पालनं परतरः खलु मे स्वधर्मः ।
ये किन्तु धर्मरिपवः स्वजना अपि स्युः
नूनं मता मम महारिपवस्त एव ॥६६॥

अत्राक्रमद्भिरहितं विहितं भवद्भिः
यन्मे तदस्ति खलु दुर्धरदण्डनार्हम् ।
आज्ञापये तदखिलं निजवस्तुजातं
मुक्त्वेह गच्छत यथेच्छमितोऽन्यदेशम् ॥६७॥

युद्धं समाप्तमधुनेति शिवस्य वाणीं
निर्मथ्यमानरिपुसैनिकहर्षहेतुम् ।
प्रोद्घोषयन्त उपसैन्यगणान् निरीयुः
वार्ताहराः सपदि सर्वत एव सर्वे ॥६८॥

युद्धोन्मदैरपि समग्रनृवीरवर्यैः
उल्लङ्घिता न हि कथञ्चन सा शिवाज्ञा ।
उच्छृङ्खलोऽपि नितरां स महाम्बुराशिः ।
वेलां मनागपि कदाचन नोद्विहन्ति ॥६९॥

तदनुविहतशेषा म्लेच्छयोधाः समस्ताः
गज-तुरग-सुवर्णाद्यं निजं वस्तुजातम् ।
दृढतरमभिमानं चापि तत्रैव हित्वा
झटिति झटिति तुङ्गारण्यतः संप्रयाताः ॥७०॥

उदकमतिपिबन्तस्तेऽल्पनद्यास्तृषार्ताः
अपरिमितमुदश्च प्राणलाभेन तेन ।
पथि मुदितमनस्का बाढमन्योन्यमूचुः
शिव इव भुवि वीरो नैव चान्यो दयालुः ॥७१॥

**॥ इति श्री शिवराज्योदये महाकाव्ये जीवदानं नाम**

**३९ तमः सर्गः समाप्तः ॥**

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये ४० तमः सर्गः ॥

## सूर्यराव-मर्दनम्

इत्थं कातंलवं वीरं पराजित्य पराक्रमी ।
आचकाङ्क्ष शिवो जेतुं रिपून् कोङ्कणसंस्थितान् ॥१॥

तुङ्गारण्यमरातीनां रक्षितुं पुनराक्रमात् ।
वीराग्रगण्यो नेताजिनियुक्तस्तत्र दुर्जयः ॥२॥

त्वङ्गत्तुरङ्गमारूढः स्फुरत्खड्गभुजार्गलः ।
पृष्ठारोपितकूर्मत्वक् तरस्वी प्रययौ शिवः ॥३॥

तान्हाजिश्च पिलाजिश्च तथा त्र्यम्बकभास्करः ।
वीरास्तमनुगच्छन्तोऽह्वृष्यन् वीरधुरन्धरम् ॥४॥

दुरुल्लङ्घ्यमरातीनां सह्यमुल्लङ्घ्य लीलया ।
फलाढ्यपनसोद्गन्धं ते कोङ्कणमुपागताः ॥५॥

तत्र दाल्भेश्वरं देवं समुद्रतटवासिनम् ।
भक्त्या परमयानर्च शिवभक्तिपरः शिवः ॥६॥

शिवेनोन्नादितानां हि घण्टानां तत्र मन्दिरे ।
प्रतिदध्वान सर्वत्र कोङ्कणेषु महाध्वनिः ॥७॥

चकम्पिरेऽखिलास्तत्र देवविद्रोहिणः खलाः ।
भृशं मुमुदिरे चान्ये साधवो देवपूजकाः ॥८॥

पलायामासिरे स्वं स्वं पदमुत्सृज्य दुर्मदाः ।
विजापुरीयसाम्राज्याधारभूताधिकारिणः ॥९॥

दृप्तराजन्यसंहारव्रतमुत्तीर्य भार्गवः ।
यत् पुण्यमाश्रयत् क्षेत्रं सह्यसागरमध्यगम् ॥१०॥

वासिष्ठीतीरसंस्थं तत् तीर्थं शिव उपागतः ।
स्वादर्शभूतं तं देवं भक्त्यार्चयितुमुत्सुकः ॥११॥

स काल-काम-मध्यस्थो देवः परशुभूषणः ।
तुतोष पूजकं प्राप्य शिवं स्वसमविक्रमम् ॥१२॥

भूयसीर्दक्षिणाः प्राप्य तत्रत्या वैदिका द्विजाः ।
प्रहृष्टा ऊचुरन्योन्यं कर्णोऽसावद्य वीक्षितः ॥१३॥

ततो विजित्य सहसा नगरं संगमेश्वरम् ।
तान्हाजिश्च पिलाजिश्च नियुक्तौ तत्र रक्षकौ ॥१४॥

Scanned by CamScanner

देवरूखाभिधं ग्रामं ततः स प्रययौ द्रुतम् ।
अनुकूलयितुं सूर्यरावं सुर्वेकुलोद्भवम् ॥१५॥
तस्यापकारमखिलं क्षणं विस्मृत्य दुःसहम् ।
सान्त्वप्रयोगमारेभे तद्वशीकरणोचितम् ॥१६॥
शिवसामर्थ्यमालोच्य वर्धमानं दिने दिने ।
स ययाचे सुरक्षार्थमात्मनः क्रीतपुत्रताम् ॥१७॥
अथाङ्ग्लानां हि नीचत्वं संस्मरंस्तदहर्निशम् ।
पर्णालदुर्गेऽस्त्रस्फोटैः शत्रुसाहाय्यकारिणम् ॥१८॥
अत्युग्रतमदण्डोऽसौ राष्ट्रस्वातन्त्र्यविद्विषाम् ।
आङ्ग्लान् दण्डयितुं दण्डयान् ययौ राजपुरं प्रति ॥१९॥
लोलुभा वणिजस्तत्र नानादेशसमागताः ।
धनराशिमधिष्ठाय तस्थुः पन्नगसन्निभाः ॥२०॥
गरुत्मद्वृन्ददेश्येन शिवसैन्येन धर्षिताः ।
वल्मीककल्पेष्वलयन् निलयेष्वखिलाः खलाः ॥२१॥
शिवाज्ञयाऽत्यजन् सर्वे ममत्वं वित्तसञ्चये ।
वेला हि खलु वीराज्ञा लोकस्याम्बुनिधेरिव ॥२२॥
अनाहूता अपि प्राप्ता गोरुण्डा शिवसम्मुखम् ।
पुण्यक्षेत्रमिवोत्तप्ताः पापप्रक्षालनेच्छवः ॥२३॥
घोरापराधदण्डार्हान् स्वसमक्षमवेक्ष्य तान् ।
सन्दुधुक्षे चिरं दान्तः शिवक्रोधहुताशनः ॥२४॥
स बभाण महातेजाः ज्वलदक्षरया गिरा ।
धक्ष्यन्निवाहितानाङ्ग्लान् स्वातन्त्र्यद्रोहकारिणः ॥२५॥
बध्यन्तामखिला आङ्ग्ला दुर्मदा श्वापदा इव ।
कारालये च रुध्यन्तामस्पृष्टरवितेजसि ॥२६॥
आचूलमूलमेतेषां द्रागगारं निपात्यताम् ।
संगृह्यतां धनं सर्वं तस्कराणां दुरात्मनाम् ॥२७॥
तदादेशमनुसृत्य गोरुण्डा दण्डमाप्नुवन् ।
यथाकालं फलन्त्येव पापानि खलु पाप्मनाम् ॥२८॥
ग्रामाणि कोङ्कणस्थानि ततोऽन्यानि बहूनि च ।
स जित्वा क्रमशो वीरः स्वराज्यं समवर्धयत् ॥२९॥
सोऽयं शिवजयोदन्तो वार्ताहरनिवेदितः ।
दिने दिनेऽन्तरदहद् विजापुरनराधिपम् ॥३०॥

अपारयन्ती संश्रोतुमिमा वार्ता अरुन्तुदाः ।
सम्राण्माता च सा वृद्धा मक्कामेव विनिर्गता ॥३१॥
विजापुरमहीशोऽसौ कार्याकार्यविमूढधीः ।
निस्सहायमिवात्मानं मेने मर्दितबान्धवः ॥३२॥
अपरिच्छिन्नसाहाय्यो नाफझुल्लो न फाझलः ।
शशाक यं पराजेतुं कस्तमन्यो विजेष्यते ॥३३॥
अपश्यन् वीरमपरं समर्थं शिवमर्दने ।
सस्मार सूर्यरावं तं सुर्वेवंश्यं स्वकिङ्करम् ॥३४॥
तमादिदेश राजाऽसौ पत्रेणात्ममनोगतम् ।
अनन्यगतिकानां हि यः कोऽपि शरणास्पदम् ॥३५॥
कोङ्कणेषु समायातो योऽधुना गिरिमूषकः ।
निरुध्यतां सपद्येव सोऽस्मत्साम्राज्यतस्करः ॥३६॥
इति तत्पत्रसन्देशं प्राप्य दुर्दास्यमोहितः ।
सूर्यरावः स दुर्बुद्धिः शिवद्रोहपरोऽभवत् ॥३७॥
कृतघोरापराधोऽपि यः शिवेन वशीकृतः ।
हा हन्त पत्रमात्रेण सोऽप्यरीणां वशं गतः ॥३८॥
दुर्दास्यहतबुद्धीनां स्वातन्त्र्यं न सुखावहम् ।
विषयाकृष्टचित्तानां यथा श्रीहरिकीर्तनम् ॥३९॥
सहसा सूर्यरावोऽसौ निशीथे सेनयान्वितः ।
सङ्गमेश्वरमापेदे शिवराज्यविपत्तये ॥४०॥
महावीरः स तानाजिः ग्रीष्मसूर्यप्रतापवान् ।
उत्तस्थौ सूर्यरावस्य हन्तुं कौशिकचेष्टितम् ॥४१॥
विध्वस्ता प्रहरेणैव सूर्यरावस्य वाहिनी ।
प्रखरैः खड्गशूलानां प्रहारैर्वज्रदुर्धरैः ॥४२॥
दृष्टं रणाङ्गणं प्रातः सर्वतश्छिन्नमुण्डकम् ।
विकीर्णपाणिचरणं रुधिरक्लिन्नरेणुकम् ॥४३॥
शृङ्गारपुरमायातः सूर्यरावः पराहतः ।
विच्छिन्नशृङ्गस्तुङ्गाद्रौ कान्तारमिव गण्डकः ॥४४॥
तमन्वगादनुपदं शिवप्रतिनिधिर्द्रुतम् ।
पराभवाविलं तस्य मनः शोधयितुं पुनः ॥४५॥
पालीभूपं पराजित्य जसवन्ताभिधं तदा ।
सूर्यराव-प्रतीक्षार्थं शिवः कालमयापयत् ॥४७॥

Scanned by CamScanner

दुर्भागधयविहतप्रज्ञोऽसौ दास्यमोहितः ।
शिवाय नात्मनो मेने शिवस्य किल दर्शनम् ॥४८॥

तेन कालविलम्बेन ज्ञात्वा तत्प्रतिकूलताम् ।
तत्याज सहसा क्रुद्धः शिवोऽपि स्वानुकूलताम् ॥४९॥

ससैन्यः संप्रतस्थेऽसौ प्रक्षोभाविललोचनः ।
कर्तुं विहतशृङ्गारं शृङ्गारपुरनायकम् ॥५०॥

सेनासञ्चारसम्भूतं धूलीपटलमम्बरे ।
आरादवेक्ष्य निर्यातः सूर्यरावो वनान्तरे ॥५१॥

तं हन्तुकामः स्वातन्त्र्यद्रोहिणं तद्गृहं गतः ।
खड्गपाणिर्ज्वलन्नेत्रः क्रोधदष्टाधरः शिवः ॥५२॥

निर्जने सदने तत्र ददृशेऽतीवसुन्दरम् ।
राजतं राजपट्टाङ्कं राजसिंहासनं महत् ॥५३॥

दृष्ट्वा सिंहासनं तस्य नीचस्थ च तदुच्चकैः ।
तीव्रलत्ताप्रहारेण शिवोऽधस्तादपातयत् ॥५४॥

शिवपदविहतं पपात भूमौ
विशकलिताङ्गमदश्च दास्यपीठम् ।
वपुरिव शकटासुरस्य तस्य
हरिचरणाभिहतं विभिन्नगात्रम् ॥५५॥

**॥ इति श्रीशिवराज्योदये महाकाव्ये सूर्यरावमर्दनम् नाम**
**४० तमः सर्गः समाप्तः ॥**

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये ४१ तमः सर्गः ॥

## शास्ताखानविमर्दनम्

स एव कोङ्कणं जित्वा स्वराज्यरिपुमर्दनः ।
प्रत्याजगाम विजयी शिवो राजगडं प्रति ॥१॥
सम्प्राप्ते शिशिरे काले विगलत्-तरुपल्लवे ।
रजोधूसरिताकाशे शुष्कशीर्णतृणाङ्कुरे ॥२॥
असुखस्पर्शनस्पर्शे सुखस्पर्शाग्नितेजसि ।
चन्द्रप्रायस्फुरत्सूर्ये हिमप्रायजलाशये ॥३॥
त्वरायित-प्रदोषे च विलम्बितदिनोदये ।
युगायितत्रियामे च क्षणायित-दिने तथा ॥४॥
घननीहारसञ्चार-मलिनीभूतचन्दिरे
शीतलानिलसम्पर्क-निस्सत्त्वीकृतभास्करे ॥५॥
प्रज्वलद्वह्निसान्निध्यसंपुञ्जीभूतनिर्धने ।
विचित्रौर्णिकसद्वस्त्राच्छन्नगात्रमहाधने ॥६॥
कोष्णशय्या-सुखासक्ति-प्रशान्ताखिललालसे ।
प्रातः कवोष्णकूपाम्भःस्नानोत्सुक-सुधार्मिके ॥७॥
प्रफुल्लकुन्दकुसुमे परिम्लानाम्बुजाकरे ।
निष्फलाखिलमाकन्दे सुफलोदुम्बरद्रुमे ॥८॥
प्रातः कुञ्झटिकाच्छन्न-तुङ्गपर्वतशेखरे ।
सायं गोचरणोद्धूतरजो-लुप्तमहावने ॥९॥
चिरं भानुकरस्पर्शसौख्यसुप्रियदक्षिणे ।
तुषारानिल-संस्पर्शक्लेश-नातिप्रियोत्तरे ॥१०॥
स राजगडवास्तव्यः शिवः स्वे सदने स्थितः ।
सुहृद्भिर्मन्त्रयामास शास्ताखानविमर्दनम् ॥११॥
तानुवाच सुहृद्वर्यान् निजादेशवशंवदान् ।
दुस्साहसमयं किञ्चित् कार्यं सुचिरचिन्तितम् ॥१२॥
योऽयं दिल्लीपतेरत्र मातुलोऽतुलदुर्मदः ।
महाराष्ट्रे समायातस्तमिच्छामि निषूदितुम् ॥१३॥
चिरेण तेन दुष्टेन जनताऽत्र प्रपीडिता ।
कष्टं जीवति हा हा धिक् सौनिकायत्त-गौरिव ॥१४॥
क्षत्रियाणां परो धर्मो ह्यापन्नपरिपालनम् ।
स चेन्न पाल्यते सम्यग् धिगस्तु हतजीवितम् ॥१५॥

Scanned by CamScanner

प्रमत्तम्लेच्छनिवहैर्धर्षितानां गृहे गृहे
कुलाङ्गनानामाक्रन्दा कथयन्तीव मामिह ॥१६॥
गृहीतकरवालोऽहमाखेटिक इव स्वयम् ।
प्रविश्य निलये तस्य ऋक्षवत् तं विदारये ॥१७॥
महासाहसिकस्यैवं ज्ञात्वा तस्य मनीषितम् ।
व्यामूढभावमापन्ना धीरा अपि सुहृद्वराः ॥१८॥
सुदुर्घटमिदं कर्म कथङ्कारं विधीयताम् ।
इति चिन्ताकुलाः सर्वे तूष्णींभावं प्रपेदिरे ॥१९॥
तेषु कश्चिद् विलम्बेन मौनमुद्रां प्रभेदयन् ।
मन्दं मन्दं मनाग् भीतः कथञ्चिद् वच आददे ॥२०॥
"राजन् ! वीरवरस्यैदं तव साहसकाङ्क्षितम् ।
सुदुर्घटमिति ब्रूयात् को नु त्वद्विक्रमं स्मरन् ॥२१॥
त्वयात्यल्पबलेनापि चतुरङ्गबलान्वितः ।
विनाशितोऽफझुल्लोऽसौ यथा वृत्रो बिडौजसा ॥२२॥
पर्णालदुर्गे ग्रस्तस्त्वं जौहरेण दुरात्मना ।
ततोऽपि बहिरायातो राहुवक्त्रादिवार्यमा ॥२३॥
त्वया निसर्गधीरेण देव ! सांन्नाहुकेन हि ।
यद् यदाचरितं कर्म तत् तदन्यस्य दुष्करम् ॥२४॥
परन्त्विदानीं यद् देव कर्तुमिच्छसि साहसम् ।
सर्वथा दुष्करं मन्ये जानन्नपि बलं तव ॥२५॥
सपादलक्षसंख्येन सैन्येनातिबलीयसा ।
संरक्ष्यते दिवानक्तं हन्तव्यः स रिपुस्तव ॥२६॥
अनीक्षिता न गच्छन्ति यत्र ते मशका अपि ।
कथं नु त्वादृशः शस्त्री प्रविशेत् तत्र सद्मनि ॥२७॥
दुरात्मनोऽन्तःकरणे सद्बोधोऽपि समाविशेत् ।
गृहे तु शास्ताखानस्य प्रवेशस्तव दुर्घटः ॥२८॥
राहोरपि शिरो भूमौ पतेच्चन्द्रकराहतम् ।
त्वच्चन्द्रहासाघातेन कथं नु रिपुमस्तकम् ॥२९॥
मेघोदबिन्दवोऽपीयुर्भुवं भित्वा रसातलम् ।
व्यूहमुल्लङ्घ्य तत्सद्म कथं नु तव सैनिकाः ॥३०॥
स्फुलिङ्गोऽपि हि नेत्रान्तः प्रविशेदकृतव्यथः ।
गृहीतकारवालस्त्वं द्विषतोऽन्तर्गृहे कथम् ॥३१॥
पिपीलकोऽपि प्रसरेद् गूढं श्रवसि हस्तिनः ।
अत्यन्तचपलोऽपि त्वं कथं नु रिपुसद्मनि ॥३२॥

Scanned by CamScanner

रक्षिणो जागरूकास्ते घोरशस्त्राः सहस्रशः ।
गृध्रदृष्ट्या निरीक्षन्ते चराचरविचेष्टितम् ॥३३॥
प्रसर्पन् गन्धवाहोऽपि शिबिरान्तरितस्ततः ।
रक्षकैः कुत एतीति स गन्धेन परीक्ष्यते ॥३४॥
एवं सेनानिवेशं तं दुष्प्रवेशतमं रिपोः ।
प्रविश्य राजन्नेकाकी कथं शत्रुं हनिष्यसि ॥३५॥
तत् तस्य भाषितं श्रुत्वा सुहृदः संशयात्मनः ।
बलान्मौनमुपाश्रित्य शिवः सस्मितमैक्षत ॥३६॥
सखाय इङ्गितज्ञास्ते साकूतं वीक्ष्य तत् स्मितम् ।
निरस्तभयसन्देहा अहसन्नुच्चकैर्मुदा ॥३७॥
कश्चिदन्योऽब्रवीद् तत्र संशीतिस्त्वयि नोचिता ।
कार्यसिद्धिः सरीसर्ति यस्य ते वचसोऽग्रतः ॥३८॥
अविनिश्चित्य साफल्यं कर्तव्यस्य स्वकर्मणः ।
वृथा न वाचमादत्ते कर्मयोगी भवादृशः ॥३९॥
मर्त्यलोके हृत्संकल्प्यं स्वर्गलोकेऽपि दुर्घटम् ।
यद् ब्रूते तत् करोत्येव कर्मयोगी भवादृशः ॥४०॥
भाग्यवन्तो वयं नूनं पामरा वनवासिनः ।
चिन्तामणिरिव प्राप्तो यैरिह त्वादृगग्रणीः ॥४१॥
आदिदिक्षसि यद्यन्नः करणीयं सुदुष्करम् ।
तत् तदेवावगच्छ त्वं कृतमित्येव तत्क्षणे ॥४२॥
तवाभीप्सितमित्येव सफलं कर्म तादृकम् ।
यत्ना हि पामराणां नः प्रायो यान्ति निमित्तताम् ॥४३॥
कृष्णस्यैव महाशक्त्या स गोवर्धन उद्धृतः ।
तोषाय किन्तु गोपानां तत्तलस्पर्शडम्बरः ॥४४॥
त्वया संकल्पितं कार्यं तव शक्त्यैव सेत्स्यति ।
सन्तोषः परमस्माकं त्वत्साहाय्यमुपेयुषाम् ॥४५॥
इति तद्भाषितं शृण्वन् नितान्तानतमस्तकः ।
निर्विण्णः स्तवनेनेव ततो निर्यातुमुत्थितः ॥४६॥
सुहृदः पारिषद्याश्च समुत्थितमवेक्ष्य तम् ।
सह तेनैव तत्कालं प्रतिबिम्बवदुत्थिताः ॥४७॥
तस्यामेव निशीथिन्यां चराः कपटकोविदाः ।
रिपुरन्ध्राणि विज्ञातुं संप्रचेरुः शिवाज्ञया ॥४८॥
शूरा नियुद्धनिष्णाताश्चतुःशतमितास्तदा ।
दुरूहं साहसं कर्तुं संगृहीताः सुहृद्वराः ॥४९॥

Scanned by CamScanner

शुद्धाष्टम्यर्धरात्रे हि चैत्रमासस्य निश्चितम् ।
सहसाक्रम्य दुष्टस्य शास्ताखानस्य मर्दनम् ॥५०॥
रमझानोपवासेन निशि भुक्त्वाऽऽमिषं भृशम् ।
गाढनिद्रावमग्नेषु यवनेष्वखिलेष्वपि ॥५१॥
खड्गचर्मधरो धीरोऽनुयातो वीरसैनिकैः ।
महावीरः प्रतस्थेऽसावुत्खातुं लोककण्टकम् ॥५२॥
स्थले स्थले निरुद्धास्ते यद्यप्यरिगणैर्निशि ।
न शशाक परिज्ञातुं कोऽप्यमून् कूटकोविदान् ॥५३॥
प्राविशन् क्रमशः सर्वे सहसा तन्महालयम् ।
शास्ताखानः स यत्रासीत् सुखनिद्रावशं गतः ॥५४॥
नानाविधविलासानामुपभोगैरखण्डितम् ।
परिश्रान्ता यवन्यश्च यत्रासन् स्वप्नमोहिताः ॥५५॥
आरक्षिणश्च यत्रत्या भूरिभोजनतुन्दिलाः ।
निरस्तभीतिसन्देहाः स्वप्नस्वर्ग इवारमन् ॥५६॥
प्रातराशार्थमन्नानि पचितुं पाककोविदाः ।
सूदाः केचन यत्रासन् व्यापृताः स्वस्वकर्मसु ॥५७॥
यो यो दृष्टिपथं प्राप्तः सुप्तो जागरितोऽथवा ।
कृतान्तकवलीभूतः खड्गाघाताहतः स सः ॥५८॥
इष्टिकापिहितं द्वारं विनिर्भिद्यान्तरं द्रुतम् ।
प्राविशन् सदनान्तस्ते यत्रासीन्निद्रितो रिपुः ॥५९
तत्रत्यो यवनः कश्चिद् विनिद्रः सहसोत्थितः ।
भिया दुद्राव वेगेन शास्ताखानस्य कोष्ठकम् ॥६०॥
स तमाह महाभीतिग्रस्त-वाक्शक्तिसञ्चरः ।
सदनान्तः समायाताः केऽपि शस्त्रधरा इति ॥६१॥
सुखस्वप्ननिमग्नोऽसौ बोधितोऽप्यमुना भृशम् ।
शय्यां मृद्वीममुक्त्वैव चुक्रोध परिबोधिने ॥६२॥
गच्छ गच्छ महामूढ ! दुःस्वप्नेनासि बाधितः ।
मा स्म भञ्जीः सुखस्वापं चिरजागरितस्य मे ॥६३॥
यूयमारक्षिणः सर्वे प्रकृत्यातीव घस्मराः ।
रमझानोपवासेन नक्तं खादथ भूरिशः ॥६४॥
अत्याहारेण कुप्यन्ति वातपित्तादयो भृशम् ।
येषां ते निशि पश्यन्ति स्वप्नानशुभसूचकान् ॥६५॥
इति ब्रुवति सक्रोधं तस्मिन्निद्रासुखालसे ।
प्रविष्टस्तत्र वेगेन लसत्खड्गधरः शिवः ॥६६॥

व्याविद्धाः यवनाः सर्वे यवन्यश्च भयार्दिताः ।
चक्रन्दुरुच्चकैर्घोरं दृष्ट्वा तन्मृत्युताण्डवम् ॥६७॥

भीत्यातिकम्पमानाभिर्धावन्तीभिरितस्ततः ।
वात्याभिरिव दासीभिर्दीपाः निर्वापिताः क्षणात् ॥६८॥

तत्र गाढतमोमग्ने सदने भीतिसंकुले ।
विद्युल्लता अभासन्त भ्रमत्खड्गलतामयाः ॥६९॥

निजान्यभेदमज्ञात्वा यो यः पुर उपागतः ।
ताभिः कृतान्तजिह्वाभिः स स द्राक् कवलीकृतः ॥७०॥

फत्तेखानाभिधः पुत्रः शास्ताखानस्य दुर्भगः ।
नियुध्यमानः पित्रर्थे तत्कालं पञ्चतामगात् ॥७१॥

अवध्या अपि शूराणां धार्मिकाणां विशेषतः ।
अकस्मान्निर्हताः काश्चिच्छास्ताखानस्य योषितः ॥७२॥

योषितश्चतुराः काश्चित् तद्रक्षणपरायणाः ।
निन्युरन्तःप्रकोष्ठं तं गूढं जवनिकावृतम् ॥७३॥

स्वखड्गाघातवध्यं तं दुष्टारातिं गवेषयन् ।
शिवो विवेश तत्रैव क्रोधोद्दीप्तविलोचनः ॥७४॥

पलायमानमालोक्य तं नीचमतिकातरम् ।
सण्डीनलीलयोत्प्लुत्य शिवः खड्गमपातयत् ॥७५॥

आसन्नमृत्युकल्पोऽपि दुर्भाग्येन स रक्षितः ।
कुतो भाग्यविहीनस्य मरणं शिवखड्गतः ॥७६॥

खड्गाघातेन विच्छिन्न-सव्यपाण्यङ्गुलीत्रयः ।
शास्ताखानो विदुद्राव कथञ्चन जिजीविषुः ॥७७॥

मत्वा निषूदितः शत्रुरिति शीघ्रं बहिर्ययौ ।
भयार्तजनसम्मर्दात् शिवः प्रागरुणोदयात् ॥७८॥

तेऽप्याहतावशिष्टाश्च कृतकृत्याः सुहृज्जनाः ।
यथागतं बहिर्जग्मुरविज्ञाता अरातिभिः ॥७९॥

इति रिपुमतिलीलयैव दुष्टं
परिपीड्य स्वबलेन भूरिसैन्यम् ।
तद्वधमवगत्य दूतवाक्यात्
कृतकृत्योऽपि शिवो न तोषमाप ॥८०॥

**॥ इति श्रीशिवराज्योदये महाकाव्ये शास्ताखानविमर्दनाख्यः**
**एकचत्वारिंशत्तमः सर्गः समाप्तः ॥**

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये ४२ तमः सर्गः ॥
## ॥ सुरत-दहनम् ॥

अथापराम्भोनिधितीरशोभा महापुरी सूरतनामधेया ।
अगण्यरत्नोपचयप्रकाशा सिन्धूत्थिता श्रीरिव राजते स्म ॥१॥
यां स्वर्णरत्नर्धिविशेषरम्या स्रोतस्वती सा तपती प्रसिद्धा ।
विलोलकल्लोलमयाक्षिपातैः समीपतः संततमीक्षते स्म ॥२॥
प्रत्यग्रदूर्वाभ-हरिन्मणीनां पलाशपुष्पच्छवि-विद्रुमाणाम् ।
कर्पूरखण्डद्युतिमौक्तिकानां यत्र प्रभा नेत्रसुखं वितेनुः ॥३॥
यस्यां विपण्यामनिशं धनाढ्याः सुवर्णवस्त्रोत्तमरत्नभूषाः ।
सवित्तकोषं स्म परिभ्रमन्ति क्रेतुं स्ववाञ्छोचितरत्नजातम् ॥४॥
यत्रापणेषु भ्रमतां जनानां मरीच-भङ्गा-जतुकादिगन्धाः ।
केषाञ्चिदुद्वेगमथापरेषां प्रसन्नतां काञ्चन तन्वते स्म ॥५॥
अनेकदेश्या जनता हि यत्र विचित्रवेषा विविधाङ्गवर्णा ।
परस्परं वित्तपरोद्यमेषु प्रादर्शयत् कृत्रिममात्मभावम् ॥६॥
अन्योन्यभाषाऽनवबोधभीतेः सम्मिश्रभाषाव्यवहारवन्तः ।
वणिग्जनाः क्रेतृगणैरवोचन् प्राधान्यतो यत्र च हावभावैः ॥७॥
आङ्ग्लास्तुरुष्का अरबास्तथान्ये पाश्चात्यदेश्या धनराशिलुब्धाः ।
महालयेषूरुदारभोगा यस्यां भुजङ्गा इव रत्नवन्तः ॥८॥
यत्राङ्ग्लदेश्या अतिगौरवर्णा नार्यः प्रसन्नाननसुस्मितास्ताः ।
हतत्रपा यान्ति पथा विशङ्कं स्वभर्तृहस्तग्रथितस्वहस्ताः ॥९॥
म्लेच्छाङ्गना यद्यपि हृद्यरूपाः लोकावलोकादतिलज्जमानाः ।
यत्र क्वचिद् यान्ति मनाक्स्खलन्त्य आशीर्षपादं पिहितस्वदेहाः ॥१०॥
वाणिज्यलब्धं विपुलं स्ववित्तम् आरेक्तुकामा विविधोपभोगैः ।
यस्यामधन्या धनिनो युवानो वाराङ्गनासद्मसु निन्युरायुः ॥११॥
सुरूपवत्योऽपहृताः कुमार्यो भार्यास्तथा ब्राह्मणगुर्जराणाम् ।
यतोऽन्यदेशं प्रति वाहिता हा म्लेच्छैर्धनान्धैर्बत विक्रयार्थम् ॥१२॥
विशीर्णचैला कृशदेहबन्धाः भारश्रमस्विन्नसमस्तगात्राः ।
ते क्रीतदासा विपणीषु यत्र पर्यक्षिपन् कातरदृष्टिपातान् ॥१३॥
समामिलन् यत्र च यात्रिकास्ते मोहम्मदीया विविधप्रदेश्याः ।
प्रयातुकामा उडुपैश्च नौभिः मक्काभिधानं निजधर्मपीठम् ॥१४॥
प्रभूत-हस्त्यश्व-पदाति-सन्यो निरस्तसर्वारितयाऽपभीतिः ।
दिल्लीपतेः शासनतः शशास यत्राधिकारी स इनायताख्यः ॥१५॥

तद्वृद्धिकीर्ति बहुशो निशम्य शाहिस्तखानापहृताखिलर्द्धिः ।
द्विरेफकोषान्मधुवत् ततो हि वित्तापहारं शिव आचकाङ्क्ष ॥१६॥

अन्याय्यमार्गैरुपचीयमानं पापोपभोगैरपचीयमानम् ।
सत्कर्महेतोर्जनकण्टकानां धनं स मेने हरणीयमेव ॥१७॥

दिल्लीपतेरेव हि शासनेन विशोषितं यत् सकलं स्वराज्यम् ।
उच्छोषणं तद्रिपुराजपुर्या मेने शिवाजिः खलु धर्म्यमेव ॥१८॥

वर्षर्तवर्षे नितरां प्रशान्ते ताराङ्गणे चाथ शरत्प्रसन्ने ।
सुदूरदर्शी सुयशोभिलाषी शिवः स्वचाराधिपनैक्षतान्तः ॥१९॥

मनीषितं कल्पितुमप्यशक्यं तत् स्वामिनश्चेतसि सन्निधाय ।
अनीक्षितः केनचिदप्यकस्माद् बहिर्जिनामा स बहिर्जगाम ॥२०॥

उल्लङ्घ्य शीघ्रं सरितो गिरींश्च निरीक्ष्य मार्गे रिपुचेष्टितानि ।
मनागविश्रम्य सुखस्थलेऽपि तां सूरताख्यां स पुरीं प्रपेदे ॥२१॥

कर्णाटकीं कुत्रचिदान्ध्रदेश्यां तुर्कीं कदाचित् क्वचिदारबीं वा ।
उर्दूं क्वचित् पारसिकीं च वाणीं स व्याहरत् तत्र विचित्रवेशः ॥२२॥

मार्दङ्गिको वा यमपट्टिको वा क्वचित् परिव्राडथ लिङ्गधारी ।
कुराणपाठी भवितव्यवादी भूत्वा स बभ्राम दिवा च नक्तम् ॥२३॥

भूयः स भूत्वा बत भारवाही कोषान्तिकाद् वित्तवतां चचार ।
चिक्षेप चक्षुः क्वचिदन्धरूपी निगूढकोषेषु हिरण्मयेषु ॥२४॥

स श्रोतुकामोऽरिरहस्यजातं बभूव धूर्तः क्वचिदेडमूकः ।
क्वचित्तु विभ्रान्त इव प्रकामं निनिन्द नीचान् द्रविणान्धमूढान् ॥२५

तत्रैकमासं नगरे विशाले कृत्वा निगूढभ्रमणं प्रकामम् ।
निरीक्ष्य मार्गं वनपर्वतान्तः स सत्वरं रायगडं प्रपेदे ॥२६॥

समीक्षितं यद् यददृष्टपूर्वम् आकर्णितं चाश्रुतपूर्वभूतम् ।
बहिर्जिणा तत्र पुरे समृद्धे निवेदितं तत् सकल शिवाय ॥२७॥

कुबेरकोषाधिकवित्तकोषान् दिल्लीपतेस्तद्वणिजां तथैव ।
संरक्ष्यमाणानबलारिसैन्यैर्ज्ञात्वा शिवः प्रीततरो बभूव ॥२८॥

तदैव चादेशयदात्मनीनान् तुरङ्गसेनाप्रमुखान् बलाढ्यान् ।
श्रीत्र्यम्बकेशं प्रति तीर्थयात्रां कर्तुं प्रयास्याम्यहमित्यकस्मात् ॥२९॥

आदेशमन्वेव चतुःसहस्रं तुरङ्गसैन्यं द्विगुणं सशस्त्रम् ।
शिवानुगं त्र्यम्बकदर्शनार्थं द्रागुत्तराशाभिमुखं प्रतस्थे ॥३०॥

दिल्लीन्द्रसेनासहितस्तदानीं समीपवर्ती जसवन्तसिंहः ।
तदन्तिकाद् धावददोऽश्वसैन्यं न मूढधीर्ज्ञातुमहो शशाक ॥३१॥

तदृद्धिकीर्तिं बहुशो निशम्य शाहिस्तखानापहृताखिलर्द्धिः ।
द्विरेफकोषान्मधुवत् ततो हि वित्तापहारं शिव आचकाङ्क्ष ॥१६॥
अन्याय्यमार्गैरुपचीयमानं पापोपभोगैरपचीयमानम् ।
सत्कर्महेतोर्जनकण्टकानां धनं स मेने हरणीयमेव ॥१७॥
दिल्लीपतेरेव हि शासनेन विशोषितं यत् सकलं स्वराज्यम् ।
उच्छोषणं तद्द्विपुराजपुर्या मेने शिवाजिः खलु धर्म्यमेव ॥१८॥
वर्षर्तवर्षे नितरां प्रशान्ते ताराङ्गणे चाथ शरत्प्रसन्ने ।
सुदूरदर्शी सुयशोभिलाषी शिवः स्वचाराधिपनैक्षतान्तः ॥१९॥
मनीषितं कल्पितुमप्यशक्यं तत् स्वामिनश्चेतसि सन्निधाय ।
अनीक्षितः केनचिदप्यकस्माद् बहिर्जिनामा स बहिर्जगाम ॥२०॥
उल्लङ्घ्य शीघ्रं सरितो गिरींश्च निरीक्ष्य मार्गे रिपुचेष्टितानि ।
मनागविश्रम्य सुखस्थलेऽपि तां सूरताख्यां स पुरीं प्रपेदे ॥२१॥
कर्णाटकीं कुत्रचिदान्ध्रदेश्यां तुर्कीं कदाचित् क्वचिदारबीं वा ।
उर्दुं क्वचित् पारसिकीं च वाणीं स व्याहरत् तत्र विचित्रवेशः ॥२२॥
मार्दङ्गिको वा यमपट्टिको वा क्वचित् परिव्राडथ लिङ्गधारी ।
कुराणपाठी भवितव्यवादी भूत्वा स बभ्राम दिवा च नक्तम् ॥२३॥
भूयः स भूत्वा बत भारवाही कोषान्तिकाद् वित्तवतां चचार ।
चिक्षेप चक्षुः क्वचिदन्धरूपी निगूढकोषेषु हिरण्मयेषु ॥२४॥
स श्रोतुकामोऽरिरहस्यजातं बभूव धूर्तः क्वचिदेडमूकः ।
क्वचित्तु विभ्रान्त इव प्रकामं निनिन्द नीचान् द्रविणान्धमूढान् ॥२५
तत्रैकमासं नगरे विशाले कृत्वा निगूढभ्रमणं प्रकामम् ।
निरीक्ष्य मार्गं वनपर्वतान्तः स सत्वरं रायगडं प्रपेदे ॥२६॥
समीक्षितं यद् यददृष्टपूर्वम् आकर्णितं चाश्रुतपूर्वभूतम् ।
बहिर्जिणा तत्र पुरे समृद्धे निवेदितं तत् सकलं शिवाय ॥२७॥
कुबेरकोषाधिकवित्तकोषान् दिल्लीपतेस्तद्वणिजां तथैव ।
संरक्ष्यमाणानबलारिसैन्यैर्ज्ञात्वा शिवः प्रीततरो बभूव ॥२८॥
तदैव चादेशयदात्मनीनान् तुरङ्गसेनाप्रमुखान् बलाढ्यान् ।
श्रीत्र्यम्बकेशं प्रति तीर्थयात्रां कर्तुं प्रयास्याम्यहमित्यकस्मात् ॥२९॥
आदेशमन्वेव चतुःसहस्रं तुरङ्गसैन्यं द्विगुणं सशस्त्रम् ।
शिवानुगं त्र्यम्बकदर्शनार्थं द्रागुत्तराशाभिमुखं प्रतस्थे ॥३०॥
दिल्लीन्द्रसेनासहितस्तदानीं समीपवर्ती जसवन्तसिंहः ।
तदन्तिकाद् धावददोऽश्वसैन्यं न मूढधीर्ज्ञातुमहो शशाक ॥३१॥

द्वित्रैरहोभिस्तदनीकमागाद् गोदावरीजन्मभुवं पवित्राम् ।
ज्योतिर्मयं यत्र भुवं पुनाति त्रियम्बकाख्यं परमेशलिङ्गम् ॥३२॥
तीर्थे कुशावर्तसमाह्वये च भक्त्या नितान्तं परयाऽवगाह्य ।
सबिल्वपत्रोदकपुष्पहस्ताः प्रापूजयन् देवममी प्रवीराः ॥३३॥
घण्टानिनादैर्जयगर्जनाभिः शम्भो महादेव हरेति घोषैः ।
पुरातनं पावनमन्दिरं तद् आनन्दसन्दोहमयं बभूव ॥३४॥
तत् प्राक्तनं तीर्थपदं वगाह्य भक्तः प्रकृत्यैव जिजातनूजः ।
श्रीत्र्यम्बकार्चाविधिमग्नचेताः देहात्मभावं सहसोत्ससर्ज ॥३५॥
समन्त्रघोषं जगदीशलिङ्गे फुल्लारविन्दानि सहस्रशश्च ।
समर्पयन्नूर्जितभावबन्धः शिरोऽरविन्दार्पणधीर्बभूव ॥३६॥
पूजावसाने सहसादिदेश सेनागणानग्रत एव यातुम् ।
संप्रेरिता किन्तु जनेषु वार्ता युद्धाय यद् देवगिरीं प्रयामः ॥३७॥
सा किंवदन्ती प्रसृताऽसमन्ताद् ह्रदेऽश्मघातादिव चोर्मिमाला ।
श्रुत्वैव यां चारगणैरनूक्तां तत्राधिकारी नितरां चकम्पे ॥३८॥
दिने वनान्तःकृतगूढवासं झञ्झाप्रवेगेन निशि प्रधावत् ।
तद् वीरसैन्यं खलु पञ्चमेऽह्नि संप्राप्तमिष्टस्थलसन्निधाने ॥३९॥
तत्रातिभीतां जनतामवेक्ष्य प्रसारिता विश्वसनीयवार्ता ।
औरङ्गजेबस्य निदेशतो यत् सौराष्ट्रमभ्येति हि वाहिनीयम् ॥४०॥
अथापराह्न्यवगत्य तथ्यं शिवाजिसेनेयमुपस्थितेति ।
वित्तापहारं परिभाव्य भीता वणिग्गणाश्चुक्रुशुरार्तचित्ताः ॥४१॥
तदैव वार्ता प्रसृता समन्ताद् आश्चर्यभूता खलभीतिहेतुः ।
यन्म्लेच्छराज्यान्तक एकवीरः शिवाजिरप्यत्र समागतोऽस्ति ॥४२॥
असौ महाश्चर्यमयी च वार्ता श्रुता यदा तन्नगराधिपेन ।
अशक्यतां तत्र दृढं विमृश्य स उच्चकैर्मन्दमतिर्जहास ॥४३॥
जगाद चामूनतिभीतिमूढान् वार्ताहरांस्तान् वणिजो धनाढ्यान् ।
"अलं भियाऽलं खलु संशयित्वा कथं कुतोऽसौ गिरिमूषकोऽत्र ? ॥४४
मूढाः स सह्याद्रिरितोऽतिदूरे मध्येऽस्मदीयं प्रसृतं च राज्यम् ।
स्थले स्थले ते शतशः स्पशा नः कथं ससैन्यः स शिवाजिरेयात् ॥४५॥
तथापि चेदागत एव सोऽत्र कथंचिदात्यन्तिकसंभ्रमेण ।
इनायतोऽहं खलु नाफ़ज़ुल्लः शाहिस्तखानश्च तथा प्रमूढः ॥४६॥
इत्यात्मगर्वेण बहु ब्रुवाणे तस्मिन्नधन्ये मदमोहमग्ने ।
समामिलन् सर्वत एव भीताः ससम्भ्रमं ते यवना धनाढ्याः ॥४७॥

Scanned by CamScanner

तानन्वगच्छन्नपरेऽपि केचिद् वित्तापहारे नितरां विशङ्काः

नार्यश्च हा हेति विलापवत्यः सहार्भका भर्तृगवेषणोत्काः ॥४८॥

क्षणाच्च सर्वं नगरं विशालं भयद्रवल्लोककदम्बकं तत् ।

बभूव वात्याहत-सर्ववृक्ष-विकीर्णपर्णाकुल-काननाभम् ॥४९॥

विवेश तस्मिन्नगरे तदानीं शिवाजिसंदेशहरोऽग्रदूतः ।

अश्वाधिरूढः स बभूव वीरो लोकस्य नूनं कुतुकैकपात्रम् ॥५०॥

इनायतस्याग्रत एव शीघ्रं स किङ्करः पत्रकरः प्रगल्भः ।

समागतः प्राह कठोरवाचा शिवस्य संदेशमलङ्घनीयम् ॥५१॥

"दिल्लीन्द्रसैन्यप्रखरानलेन वर्षत्रयं नः सकलं स्वराज्यम् ।

निःशेषमुच्छोषितमित्यतोऽहं तद्राज्यसंशोषणधीरुपेतः ॥५२॥

येऽप्यत्र केचिद् धनकोशवन्तो वणिग्जनाः श्रेष्ठिवरास्तथान्ये ।

उच्चाधिकाराश्च भवादृशा ये ते स्वं धनं नः स्वयमर्पयन्तु ॥५३॥

दिल्लीन्द्रसैन्येन निपीडितानां गोपालकानां च कृषीवलानाम् ।

आपत्तिमाहन्तुमभूतपूर्वां सर्वं धनं मे विनियोजनीयम् ॥५४॥

ये धर्मकार्येऽत्र धनं स्वकीयं समर्पयेयुः स्वयमेव शिष्टाः ।

ते पुण्यभाजो नियतं भवेयुः त्यागेन पुण्यं मुनयो वदन्ति ॥५५॥

ये किन्तु लोभान्धधियः प्रमूढा नैवार्पयेयुः स्वयमात्मकोशान् ।

मत्क्रोधपात्रं न हि तान् सुरक्षेद् दिल्लीश्वरोऽसौ ससमग्रसेनः ॥५६॥

तं वाचिकं लेखगतं च सर्वं संदेशमाकर्ण्य पुनः पठित्वा ।

निर्वीर्यसैन्यं स्वपुरं विजानन् इनायतोऽसौ नितरां चकम्पे ॥५७॥

तथापि संदेशहरं स्वमेकं स प्रेषयामास शिवान्तिके च ।

प्रयुक्तगर्वोद्धतवाचिकं यं बन्दीचकारैकपदे शिवाजिः ॥५८॥

क्षणेऽपरस्मिन्नदिशत् समस्तान् सेनाधुरीणान् स हि लोहिताक्षः ।

दहन्निवात्युग्रवचःप्रसारस्फुरत्प्रकोपानलतः पुरीं ताम् ॥५९॥

भिन्तार्गलाश्छिन्त च वप्रभित्तीः सर्वत्रिदण्डं नगरे प्रयात ।

विध्वंसयध्वं धनिनां गृहाणि कोशस्थितं लुण्टत वित्तजातम् ॥६०॥

श्रुत्वा तमादेशममी प्रवीराः दुर्दान्तशत्रु-क्षपणातिदक्षाः ।

निमेषमात्राद् धृतखड्ग-शूल-भल्लाग्निदण्डाः प्रययुः सघोषम् ॥६१॥

तां वित्तगुर्वीं गुरुसद्मचार्वीम् ऋद्धापणां रुद्धसमस्तमार्गाम् ।

पुरीं प्रविष्टा शिववाहिनी सा पूरोद्धता पर्वतवाहिनीव ॥६२॥

न तत्र गेहं धनिनः किलासीत् न यद् विभग्नं न हि वा प्रदग्धम् ।

न वित्तवांस्त्यागपराङ्मुखश्च बन्दीकृतो यो न हि तैः प्रवीरैः ॥६३॥

विलोल-वह्नि-प्रसर्पदभ्रंकष-धूम्रलेखाः ।
दहद्गृहोद्भूत- दूरस्थखेटस्थित-गोपबालैर्विलोक्य वह्नेर्गरिमान्वमायि ॥६४॥
अस्तं गते भास्वति सुप्रकाशा ज्वाला अदग्धानि विलेलिहानाः ।
नक्तं पयोधौ प्रतिबिम्बितास्तास्तलस्थरत्नान्यदिशन् प्रकाशम् ॥६५॥
रात्रौ प्रवृद्धानल-दीप्तकान्तिच्छायामयी सा तपती नदी च ।
घनान्धकारे निकषोपलाभे सुवर्णरेखेव तदा रराज ॥६६॥
प्रोद्दीप्ततुङ्गालयतः स्फुरन्त्यो ज्वालाश्च काषायरुचो महत्यः ।
म्लेच्छाधिराज्ये प्रतिरोप्यमाणा रेजुः स्वराज्यध्वजसन्निभास्ताः ॥६७
सुवर्णकोशाः सदनान्तरुच्चैर्वह्निप्रदाहेन नितान्ततप्ताः ।
समन्वविन्दन्नचिरात् समेत्य शिवान्तिकं तेहि चिराय शान्तिम् ॥६८॥
अथातिभीतो नगराधिकारी दुर्गे दिवाभीत इव प्रलीनः ।
विचिन्तयामास भृशं सुहृद्भिः शिवाजिमाहन्तुमनाः प्रयुक्त्या ॥६९॥
नियुक्तसंदेशहराग्रदौत्ये मनीषितं साधयितुं स्वकीयम् ।
स प्रेषयामास युवानमेकं महाबलिष्ठं च निगूढशस्त्रम् ॥७०॥
स आगतः सत्वरमिद्धकोपोऽप्यात्तस्मितो म्लेच्छयुवा सुवेशः ।
पुरोपकण्ठोपवने वसन्तं शिवाजिमालोकयितुं समक्षम् ॥७१॥
समीक्षितस्तेन विशालवृक्षच्छायावितानाततमण्डपान्तः ।
उच्चासने खड्गधरावृतोऽसौ विराजमानः प्रथितः शिवाजिः ॥७२॥
माणिक्य-मुक्तामणि-हीरकाणां प्रवाल-कार्तस्वर-राजतानाम् ।
महाचयास्तं परितश्च दृष्टाः प्रतिक्षणं संपरिवर्धमानाः ॥७३॥
देशान्तराभ्यागत-चित्र-पात्र-सुवस्त्र-शस्त्रास्त्र-महानिकायाः ।
सञ्चीयमानाः क्षणशः समन्ताद् विलोकितास्तेन कषायिताक्ष्णा ॥७४॥
निरीक्षितास्तत्र सहस्रशश्च बन्दीकृतास्ते वणिजो धनाढ्याः ।
अदित्सवो मूर्धनि ताड्यमानाः प्रदित्सवो द्राक् परिमुच्यमानाः ॥७५॥
न धार्मिकः कश्चन किन्तु दृष्टो मोहम्मदीयो न तथैशवीयः ।
नालोकि बन्दीकृतलोकवृन्दे काप्यङ्गना यौवनलोभनीया ॥७६॥
दृष्टानि तेनोच्चकितेक्षणेन धर्मप्रियाणां प्रियपुस्तकानि ।
प्रत्यर्पणार्थं कमनीयवस्त्रैः संवेष्ट्यमानानि महादरेण ॥७७॥
स संपरीतः शिवसैनिकानां गणेन शीघ्रं प्रययावभीकः ।
शिवाग्रतोऽभ्येत्य नतोत्तमाङ्गः संदेशवाचं विससर्ज धीरम् ॥७८॥
संदेशमाकर्ण्य पुराधिपस्य भयाकुलस्यापि मदोद्धतं च ।
प्रसन्नगम्भीरसमुद्रचेताः शिवाजिरुच्चैः प्रहसन्नुवाच ॥७९॥

Scanned by CamScanner

खद्योतकस्तर्जयतेऽद्य सूर्यं दुर्डुण्डुभो भर्त्सयते भुजङ्गम् ।
घूकोऽथवाज्ञापयते खगेन्द्रम् इनायतो मामनुशास्ति कार्यम् ॥८०॥

आकर्ण्य वाणीं परिहासगर्भां शिवस्य वाचंयमपण्डितस्य ।
प्रहासमग्नेषु सुहृद्गणेषु स कृष्टगूढच्छुरिकश्चुकूर्द ॥८१॥

तदैव लक्षांशनिमेषमात्रात् तडित्प्रदीप्ताः शतखड्गधाराः ।
शिवाजि-घातोद्धृत-शस्त्रहस्तं वपुस्तदीयं शतधा व्यभिन्दन् ॥८२॥

तन्मांसखण्डा रुधिरप्रदिग्धा उच्चैरकस्मादभिविप्रकीर्णाः ।
नभश्चरैर्गृध्रगणैः क्षुधार्तैर् नखाग्रकोटीषु धृता अयत्नम् ॥८३॥

तच्छिन्नगात्रोच्छलदुष्णरक्त-प्रवर्ष-संक्लिन्न-सुधौतचैलः ।
बालार्करश्मिच्छुरितात्मकान्तेः शिवो हिमाद्रेः सुषमां जहार ॥८४॥

कूटप्रयोगं तमरिप्रयुक्तं विज्ञाय सर्वे शिवसैनिकास्ते ।
स्फुलिङ्गवृष्टि-क्षुभितोग्रसर्प-कदम्बकल्पाः परितोऽन्वसर्पन् ॥८५॥

यो यः पुरस्तादरिपक्षपाती निरीक्षितः कश्चन सूरतस्थः ।
स स प्रहारैरसिपट्टिशानां कृतान्तसद्मातिथितां प्रजिघ्ये ॥८६॥

क्रोधान्धभूतैरखिलैरमीभिः बन्दीकृतास्ते वणिजश्च नैके ।
उल्लङ्घ्य चालङ्घ्यतमां शिवाज्ञां हतास्तदानीं पशुघातमेव ॥८७॥

संहारसत्रं तदवेक्ष्य घोरं सर्वं निजाज्ञाविपरीतभूतम् ।
संवर्त-पाथोनिधि-धीरगर्जा-गम्भीरनादं शिव उज्जगर्ज ॥८८॥

अलं प्रमादेन खलु प्रहृत्य क्रोधं निजं संहरत प्रवृद्धम् ।
महामदाभ्याहतसद्विवेका न जातु लोके विजयं लभन्ते ॥८९॥

न सौनिका यूयमरे क्रुधान्धाः सङ्ग्रामशूराः खलु सैनिकाः स्थ ।
भीतेष्वशस्त्रेष्वबलेषु शस्त्रं न सैनिकाः सौनिकवत् क्षिपन्ति ॥९०॥

इत्याज्ञया स्वामिन आकुलस्य निगीर्य कोपानलमात्मनैव ।
वीराः प्रकोपान्धधियोऽप्यरुन्धन् संहारकाण्डं तदकाण्ड एव ॥९१॥

एवं दिनत्रयमनारतमासमन्ताद् दग्ध्वा समृद्धसदनां नगरीमरातेः ।
दग्धव्य-शेषरहितः स महाहुताशः क्रोधाग्निना सह शिवस्य चिरेण शान्तः ॥

निर्दग्ध-तुङ्ग-कमनीय-गृहोत्तमाङ्गा
व्याकीर्ण-रम्यतरु-गुल्म-सुकेशपाशा ।
सा पूरभूत् पितृवनानल-लीढकाया
प्रेताङ्गनेव नितरामशुभावलोका ॥९३॥

निस्सारितं कुटिल-नीति-विधि-प्रवीणैः
देशान्तरागत-वणिग्-गण-यात्रिकैस्तु ।

Scanned by CamScanner

संकल्पितं सकलमप्यशिवं हृदिस्थं
लीलायितं तदवलोक्य शिवस्य रौद्रम् ॥९४॥

तदनु चरगणोक्तं वृत्तमाकर्ण्य गूढम्
अगणितपृतनो यत् कोऽपि माहाबताख्यः ।
त्वरिततगतिरुपेतो देहलीशाज्ञयेति
सपदि सनिधि दूरं निर्ययौ श्रीशिवाजिः ॥९५॥

**इति श्रीशिवराज्योदये महाकाव्ये सूरतदहनं नाम**
**४२ तमः सर्गः समाप्तः ॥**

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये ४३ तमः सर्गः ॥

# शहाजिनिधनम्

एवमौरङ्गजेबस्य त्रिपुरस्येव दुर्मतेः ।
समुद्रतटसंस्थां तां ददाह नगरीं शिवः ॥१॥

धनलक्ष्मीस्तु तत्रत्या कदर्यगृहकुण्ठिता ।
शिवसेनासहायेन दीनोद्धाराय निर्ययौ ॥२॥

सुवर्णमोहिनी लक्ष्मीरसौ वस्त्रावगुण्ठिता ।
शिवं तमनुगच्छन्ती सलज्जेव शिवा बभौ ॥३॥

स नगान्नगमाक्रामन् सभास्वद्रत्नसन्निधिः ।
ययौ तडित्वदारूढः पुरन्दर इवापरः ॥४॥

तं रिपुन्दममायान्तं रिपुलक्ष्मीपुरस्सरम् ।
प्रजाभ्यनन्दत् सानन्दं धनञ्जयमिवापरम् ॥५॥

स राजगडमागच्छद् मातृदर्शनलालसः ।
शुश्राव सहसा वाक्यं दूतोक्तं पविपातवत् ॥६॥

हा हा हन्त दिवं यातः स्वामिन् स्वामी महत्तरः ।
दुःखशोकार्णवे मग्ना जनता भग्ननौरिव ॥७॥

वृत्तान्तमग्रे स प्राह विलपन् बाष्पगद्गदम् ।
तुल्यावस्थं शिवं पश्यन्नस्तंगतजयोन्मुदम् ॥८॥

" मृगयारसिकः स्वामिन् प्रकृत्यैव स ते गुरुः ।
स्वच्छन्दं मृगयारण्यं ययावल्पपरिच्छदः ॥९॥

अनुधावन् प्रवेगन वध्यवेध्यं तुरङ्गमः ।
दृढगुल्म-महाजाल-बद्धपादोऽपतद् भुवि ॥१०॥

पृष्ठाधिरूढो हा हन्त हन्त हन्त स विक्रमी ।
प्रपतन् भुवि कायेन प्राणैस्तु दिवि निर्ययौ ॥११॥

वैमात्रेयेण ते स्वामिन् सपद्यभ्यागतेन च ।
एकोजिना हि धर्मोक्ता अन्त्या विदधिरे क्रियाः" ॥१२॥

इति वार्ताहरे तस्मिन् भाषमाणे सगद्गदम् ।
आजग्मुरपरे केचिद् बाष्पाविलविलोचनाः ॥१३॥

ते पादयोर्निपत्योचुराक्रोशन्तो मुहुर्मुहुः ।
वर्धयन्तो महाशोकं शिवस्य पितृमृत्युजम् ॥१४॥

"देव ! त्रायस्व नः सर्वानधुना दीनबान्धवान् ।
पतिव्रता जिजादेवी सतीधर्मं चिकीर्षति" ॥१५॥
इत्याकर्ण्यैव तद् वाक्यं शिवाजिर्मातृभक्तिमान् ।
दीप्तस्फुलिङ्गसंस्पर्शं कर्णयोरन्वभूदसौ ॥१६॥
संवर्तानिल-निष्कम्पकुलाचल इवाचलः ।
विचचाल तदा चित्ते शिवो धीरधुरन्धरः ॥१७॥
यो गोवर्धनवद् राष्ट्रं लीलयोच्चैरधारयत् ।
स नात्मानं समुद्धर्तुमशक्नोच्छोकविह्वलः ॥१८॥
वज्राघात-पतद्वीररघु-सन्निभमाकुलम् ।
शिवं समन्ततः सर्वे बान्धवाः समधारयन् ॥१९॥
विभ्रान्तो गुरुशोकेन स विपर्यस्तकुन्तलः ।
धरातलमवासीनो नभस्तलमुदैक्षत ॥२०॥
तन्नेत्रयुगलं तस्य सदा दीप्तानलप्रभम् ।
संक्लिन्नलोचनैर्लोकैरलोकि जलपूरितम् ॥२१॥
"हा मातर्" इति चाक्रन्दो मूर्च्छयन् वृक्षवल्लरीः ।
बालस्य शम्भुराजस्य शुश्रुवे सहसा मुहुः ॥२२॥
तेनोद्भिन्न-महाशोक-समाधिरचिरादसौ ।
आक्रन्दाभिमुखं वेगादगादत्यन्तविह्वलः ॥२३॥
निसर्गधीरगमनोऽप्यसौ भूयः परिस्खलन् ।
जगाम सदनं मातुः शोकपूरातिपूरितम् ॥२४॥
दृक् तस्य मातृभक्तस्य ह्यनन्यालोकनोत्सुका ।
शोकार्तजनसम्मर्दे जिजामेकामलोकयत् ॥२५॥
वीक्षिता जननी तेन सद्यःस्नानार्द्रकुन्तला ।
कुसुम्भ्रबभ्रुवसना सर्वसौभाग्यमण्डना ॥२६॥
परीताऽपि हि पर्यश्रुलोचनैः पारिवारिकैः ।
अनश्रुलोचना वह्निप्रवेशे कृतनिश्चया ॥२७॥
निरुध्यमाना शिशुना क्रन्दता मुहुरुच्चकैः ।
पुरस्तथापि गच्छन्ती छिन्नवात्सल्यबन्धना ॥२८॥
भर्तृचिन्तननिर्मग्न-सर्वज्ञानेन्द्रियक्रिया ।
अनीक्षमाणा चात्माभमात्मजं पुरतः स्थितम् ॥२९॥
कार्याकार्यविमूढोऽसौ सुप्रत्युत्पन्नधीरपि ।
पपात पदयोर्मातुः शोकविध्वस्तचेतनः ॥३०॥

प्रवृद्धबाष्पसंरुद्धकण्ठोऽसाववदत् स्फुटम् ।
विनिर्वर्तयितुं घोरान्मातरं वज्रनिश्चयात् ॥३१॥
"देवभूयं गते तातेऽध्यवसायस्तवोचितः ।
विनोभाभ्यां युवाभ्यां तु मया किं नु विधीयताम् ॥३२॥
त्वदाशीर्वचनैरेव मयि शक्तिरवर्धत ।
तैर्विनाऽतः परं मातः कुतः शक्तिः कुतो जयः ? ॥३३॥
वीरकर्माणि सर्वाणि त्वदादेशेन चक्रिरे ।
किं न तैस्तव सन्तोषो यन्मां त्यक्तुं त्वमुद्यता ॥३४॥
साधीयसी त्वं साधुभ्यो गुरुभ्यश्च गरीयसी ।
अपि स्वर्गाच्च मोक्षाच्च मातस्त्वं श्रेयसी मम ॥३५॥
न ोदितस्वराज्यस्य त्वं हि मङ्गलदेवता ।
स्वराज्यमन्दिरे ह्यस्मिन् किं नु पूज्यं त्वया विना" ॥३६॥
इत्थमार्तस्वरं दूने शिवे संप्रार्थनापरे ।
तथैवानूचुरन्येऽपि व्याकुलाः पारिवारिकाः ॥३७॥
शृण्वती चापि सा तस्थौ चिरमामिलितेक्षणा ।
मौनमुद्राममुञ्चन्ती चिन्तयन्ती व्रतोचितम् ॥३८॥
वैधव्यजीवनं नूनं तुषज्वलनसेवनम् ।
इति मत्वाऽत्यजद् वह्नि-प्रवेशे सा स्वनिश्चयम् ॥३९॥
विश्वश्रेष्ठस्य पुत्रस्यानुरोधात् त्यक्तनिश्चयाम् ।
निन्युरन्तर्जिजादेवीं महिला महितव्रताम् ॥४०॥
कृतस्नानां परित्यक्तसर्वसौभाग्यमण्डनाम् ।
तामवदन्त सर्वेऽपि पुण्यमूर्तिं महासतीम् ॥४१॥
शिवोऽपि विहितस्नानः परीतः खिन्नबान्धवैः ।
तस्थौ नितान्तगम्भीरो घनीभूत इवार्णवः ॥४२॥
वैदुष्यं गुणगृह्यत्वं शूरत्वं नीतिकौशलम् ।
स्मारं स्मारं पितुर्भूयः स नितान्तमदूयत ॥४३॥
उवाच च सुहृद्वर्गं समदुःखं स्वपार्श्वगम् ।
पितुरात्मनि वात्सल्यं संस्मरन् परमोत्कटम् ॥४४॥
हतो मयाफझुल्लोऽसौ यदा दुर्दान्तविक्रमः ।
तातेनात्यन्ततुष्टेन विक्रमो मेऽभिनन्दितः ॥४५॥
यदा मयातिधैर्येण शास्ताखानः स शासितः ।
तातेनात्यन्ततुष्टेन धीरता मे प्रशंसिता ॥४६॥

दुर्गमा दुर्जया दुर्गा जिता शत्रोर्यदा यदा ।
तातेनात्यन्ततुष्टेन विजयो मेऽभिनन्दितः ॥४७॥
यद् यत् किञ्चिद् मया कर्म कृतमत्यन्तदुष्करम् ।
तातेनात्यन्ततुष्टेन तत् तद् भूरि प्रशंसितम् ॥४८॥
जीवानामसहायानामापत्तापनिवारणम् ।
पितृरूपं कृपाच्छत्रं नूनं भगवता कृतम् ॥४९॥
पितृदेव-कृपाच्छत्रं यस्य मूर्ध्नि विराजते ।
स हि छत्रपतिर्नूनं नाभिषिक्तो महीपतिः ॥५०॥
सत्पुत्राणां महाकर्म-परिक्लेश-व्यथाभुजाम् ।
मातुः पितुश्च सन्तोषः परमं पारितोषिकम् ॥५१॥
अतः परं करिष्यामि महाकार्याणि यान्यपि ।
निष्फलानीव तानि स्युः सन्तोषेण विना पितुः ॥५२॥
जीवितं धारयन्तीं तां मातरं ह्यात्मनः कृते ।
दर्शं दर्शं शिवो धीरः स्थिरसत्त्व इवाभवत् ॥५३॥
धर्माधिकारिवचनैर्हि दिवङ्गतस्य
शान्त्यै पितुः स्वविभवोचितवित्तजातम् ।
श्रद्धामयेन मनसा द्विजसाच्चकार
वेदोक्त-धर्मविधि-निष्ठ-मतिः शिवाजिः ॥५४॥

**॥ इति श्रीशिवराज्योदये महाकाव्ये शहाजिनिधनं नाम ४३ तमः सर्गः समाप्तः ॥**

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये ४४ तमः सर्गः ॥

## खवासखानमर्दनम्

अथातितीव्रवेगस्य कालस्येव प्रभावतः ।
मन्दीबभूव तीव्रोऽपि पितृशोकः शिवस्य हि ॥१॥
पुनः प्रकृतिमापन्नो विजयिष्णुः स आत्मनः ।
प्रावृडन्ते महातेजा अभ्रमुक्त इवार्यमा ॥२॥
आज्ञप्तस्तेन नेताजिरसौ वीरगणाग्रणीः ।
गच्छ दिल्लीपते राज्यं छिन्धि भिन्धि जवादिति ॥३॥
नौसेनाधिपतिं तद्वत् समाज्ञापितवानसौ ।
शात्रवीया महानावो द्रुतं लुण्ठ दहाथ वा ॥४॥
स्वयं च तुरगानीकसमेतो द्राग् विनिर्ययौ ।
समृद्धं नगरं जेतुं शत्रोरहमदाभिधम् ॥५॥
विजापुरनरेशस्य तथा दिल्लीपतेरपि ।
धनलक्ष्मीं जहारासौ स्थाने स्थाने दिने दिने ॥६॥
ततो विजापुरेशेन निरोद्धुं शिवविक्रमम् ।
इख्लासखान इत्याख्यः प्रहितो वाहिनीपतिः ॥७॥
स हि कोङ्कणमायातः सावन्तेन समन्वितः ।
धर्षितः शिवसैन्येन पराभूतः पराययौ ॥८॥
ततश्चाझीजखानाख्यः प्रजिघ्ये पृतनापतिः ।
उत्तिष्ठमानं निर्जेतुं शिवाजिं बलवत्तरम् ॥९॥
यथा सवेगं निर्यातः शिवाजिं ग्रसितुं स तम् ।
कृतान्तेन तथैवासौ सहसा कवलीकृतः ॥१०॥
इत्थं शिवप्रतापेन तप्यमानो दिवानिशम् ।
विव्यथे नितरामन्तर्विजापुरमहीपतिः ॥११॥
स कदाचित् सभामध्ये परीतः सचिवादिभिः ।
चिन्तयामास विक्रान्तं शिवमाक्रमितुं पुनः ॥१२॥
तदाज्ञया तदानिन्ये तत्र ताम्बूलभाजनम् ।
यदवेक्ष्य महाश्चर्यं पस्पर्श सकलानमून् ॥१३॥
निजगाद च राजासौ कृत्रिमोत्साहतुन्दिलः ।
निरुत्साहहतान् सर्वान् प्रोत्साहयितुमुत्सुकः ॥१४॥
“ब्रूत युष्मासु साम्राज्याधारभूतेषु कः खलु ।
ताम्बूलमिदमादातुं धैर्यशाली समीहते ॥१५॥

Scanned by CamScanner

बाह्वोर्महावीर्यं शिवाजिदमनक्षमम् ।
यस्य बाह्वोर्महावीर्यं शिवाजिदमनक्षमम् ।
स्वयमुत्थाय गृह्णातु स ताम्बूलमिदं मम " ॥१६॥
शिवाजिनामश्रवणादतिभीतिसमाहता ।
आसीन्मूर्च्छितसंज्ञेवाधोमुखी साखिला सभा ॥१७॥
प्रस्विन्नाखिलगात्रास्ते सभ्या उद्भ्रान्तलोचनाः ।
परस्परमवैक्षन्त ह्यासन्नमरणा इव ॥१८॥
पाषाणमूर्तिकल्पेषु तेषु स्तब्धेषु कश्चन ।
वीरमानो समुत्तस्थौ दुर्भाग्येन प्रचोदितः ॥१९॥
पश्यन्नुदग्रदर्पोऽसाववहेलनयाखिलान् ।
प्रणम्य भूपतिं भक्त्या ताम्बूलं तदुदग्रहीत् ॥२०॥
तमुद्गृहीतताम्बूलं व्यूढोरस्कं महाभुजम् ।
सभा सभाजयामास जयोद्घोषैः कथञ्चन ॥२१॥
विजापुरमहीशोऽसौ व्याघ्रवीरमवेक्ष्य तम् ।
" खवासखान ! धन्योऽसि मान्योऽसी " त्याह हर्षितः ॥२२॥
सिंहासनात् समुत्थाय गाढमाश्लिष्य सादरम् ।
स्वीयं खड्गं ददौ तस्मै दीप्तरत्नमयत्सरुम् ॥२३॥
राजोपहारमासाद्य स महानन्दतुन्दिलः ।
" जय जीव महीपाल ! सदैवे " ति जगर्ज ह ॥२४॥
प्रतिपन्नप्रसादोऽसौ राजा वीरानचोदयत् ।
खवासखाननेतृत्वे जेतुं गच्छत तं शिवम् ॥२५॥
राजाज्ञापत्रमादाय द्रुतं दूतो विनिर्ययौ ।
बाजिं घोरपडेवंश्यं मुधोळाधिपतिं प्रति ॥२६॥
स हि भोसलवंशस्य हृदि शत्रुत्वमुद्वहन् ।
शिरसोदवहद्म्लेच्छराजाज्ञां गर्भदासवत् ॥२७॥
वैमात्रेयः शिवस्यापि स एकोर्जितविमूढधीः ।
शिवाधिपत्यमुच्छेत्तुं म्लेच्छसेनानुगोऽभवत् ॥२८॥
खवासखानः सेनानीरविलम्बं विनिर्ययौ ।
चतुरङ्गमहासेनः सह्यमुल्लङ्घ्य कोङ्कणम् ॥२९॥
सहस्रचारचक्षुष्मान् जागरूको निरन्तरम् ।
विजज्ञावविलम्बेन वृत्तान्तं सकलं शिवः ॥३०॥
स च तत्कालमादाय दुर्धरामश्ववाहिनीम् ।
मुधोळाधिपतिं बाजिं हन्तुकामो विनिर्ययौ ॥३१॥
तदश्वखुरसम्पातैरुच्चैरुत्थापितं महत् ।
रजः साश्चर्यमालोकि सुखासीनेन बाजिना ॥३२॥

तेन प्रवर्धमानेन रजःस्तोमेन मेघवत् ।
निगीर्य सवितुस्तेजस्तमस्काण्डं प्रसारितम् ॥३३॥
निमेषमात्रादुद्दामतुरङ्गमखुरध्वनिः ।
शुश्रुवे प्रलयाम्भोदोद्गच्छत्स्फूर्जथुभीषणः ॥३४॥
स्फुरत्तडिल्लतादीप्रां भवानीं परिवर्तयन् ।
ददृशे च शिवः क्रुद्धः कुर्वन् कल्पान्ततांडवम् ॥३५॥
द्विषत्पुरमहाद्वारमुद्घाट्य विहितं हठात् ।
प्रासादान्तः शिवो वेगात् प्राविशद् वज्रणाभवत् ॥३६॥
तत्र भोसलवंशस्य स्वातन्त्र्यस्य च वैरिणम् ।
उन्मत्तं बाजिमालोक्य दीप्तक्रोधोऽब्रवीदसौ ॥३७॥
"रे रे दुर्दास्यनरकभोगासक्त ! नराधम !
स्वातन्त्र्यशत्रो ! रक्तं ते भवानी मे पिपासति ॥३८॥
याभ्यां तव कराभ्यां मे निर्बद्धो निगडैः पिता ।
तावुच्छेद्याद्य तस्याहं पूरयिष्ये मनोरथम् ॥३९॥
यया च जिह्वया नीच ! भर्त्सितो मे पिता त्वया ।
तामामूलं समुत्पाट्य चिकीर्ष्ये पितृतर्पणम् ॥४०॥
म्लेच्छराज-पदस्पर्श-लम्पटं तव मस्तकम् ।
विच्छिद्य मातृभूदेव्याः कल्पयामि बलिं खलु ॥४१॥
नासौ विजापुराधीशो न च दिल्लीश्वरस्तथा ।
मत्खड्गवेध्यतंभूतं त्वां रक्षिष्यति कथञ्चन" ॥४२॥
इति गर्जन् महाक्रोधोद्धृतभास्वरखड्गधृत् ।
प्रडीनोड्डीनसंडीनैः शत्रुमाक्रामदात्मनः ॥४३॥
असावपि मदोन्मत्तो बाजिराजिविशारदः ।
सहसात्तमहाखड्गः प्रतीकाराय तत्वरे ॥४४॥
सैनिका बाजिपक्षीया आत्तशस्त्रा इतस्ततः ।
शिवानुयायिनो वीरान् रोद्धुं बाढं प्रयेतिरे ॥४५॥
प्रावर्तत क्षणात् तत्र संगरः सदनाजिरे ।
खण्डितारि-कबन्धास्र-स्राव-पङ्किल-भूतलः ॥४६॥
अचिरेणैव शार्दूलचपलैः शिवसैनिकैः ।
वृकवृन्दवदुत्सन्ना शात्रवीया हि सैनिकाः ॥४७॥
स च बाजिः शिवं हन्तुं भृशमैच्छन्महाबलः ।
मतङ्गज इवोन्मत्तः कण्ठीरवकिशोरकम् ॥४८॥
तदीयान् खड्गनिर्घातान् कुण्ठयंश्चर्मवर्मणि ।
श्मश्रुलं रोषदष्टोष्टं शिवश्चिच्छेद तच्छिरः ॥४९॥

Scanned by CamScanner

तौ तस्य पापिनो हस्तौ तां च जिह्वां विगर्हिताम् ।
इच्छन्नपि च विच्छेत्तुं न चिच्छेद स संयमी ॥५०॥
वाहिनी निष्प्रतीकारा शिवस्य जयशालिनी ।
सर्वान् घोरपडेवंश्यांश्चकर्त कदलीसुखम् ॥५१॥
तत् पापसदनं तस्य सद्म स्वातन्त्र्यवैरिणः ।
दग्ध्वैव परितः शान्तः शिवक्रोधहुताशनः ॥५२॥
ततः खवासखानं तं सह्यगह्वरगाहिनम् ।
संमर्दितुं शिवोऽकाङ्क्षत् गरुत्मानिव जिह्मगम् ॥५३॥
उल्लङ्घ्य दुर्गमाध्वानमतूर्यध्वानमाययौ ।
खवासखानसेनायाः शिबिरान्तिकमेव सः ॥५४॥
प्राहिणोच्चाविलम्बेन संदेशहरमात्मनः ।
भविष्यन् वज्रनिर्घोषस्तेजस्तोममिवाग्रतः ॥५५॥
स च प्रतिनिधिश्चैनं द्विषन्तं वीरमानिनम् ।
प्राब्रवीद् वाचिकं सर्वं वाचा तर्जनगर्भया ॥५६॥
" खवासखान ! मन्ये त्वं मृत्योरसि वशंगतः ।
ससैन्यं यदिहाभ्येतो युयुत्सुः सह्यगह्वरम् ॥५७॥
इहाफझुल्ल आयातस्त्वत्तोऽतिबलवत्तरः ।
किं न जानासि वृत्तान्तं तस्य ब्रह्माण्डविश्रुतम् ॥५८॥
विकरालां विजानीहि सह्याद्रिशिखरावलीम् ।
म्लेच्छक्षयप्रवृद्धस्य मृत्योर्हि रदनावलीम् ॥५९॥
अत्र स्फुरति सर्वत्र मत्सेनाखड्गरूपिणी ।
म्लेच्छरक्ततृषार्तेव कृतान्तरसना खलु ॥६०॥
जीवन्तोऽत्र प्रवर्तन्ते ये केचिद् धर्मशत्रवः ।
प्राणास्तेषां निवर्तन्ते न तु देहाः कथञ्चन ॥६१॥
त्वत्साहाय्यकरो योऽसौ बाजिर्द्यः स मया हतः ।
मदृतेऽस्मिन् महारण्ये शरण्यस्तव नापरः ॥६२॥
यथागतं निवर्तस्व सदेहमतिसत्वरम् ।
अन्यथा श्वः प्रभाते स्यात् परिणामोऽतिदारुणः " ॥६३॥
इति वाचिकमाकर्ण्य तथा लेख्यं विलोक्य च ।
सोपहासं स तं दूतं वीरम्मन्योऽभणत् क्रुधा ॥६४॥
" ब्रूहि रे मदमूढं स्वस्वामिनं मम वाचिकम् ।
खवासखानं माऽजित्वा मा स्म गर्वं वृथा कृथाः ॥६५॥
नैवायमफझुल्लोऽहं फाझलो जौहरोऽथवा ।
शाहिस्ताखान इख्लासखानो वाऽति विमूढधीः ॥६६॥

कालेनतावता योऽयं राजद्रोहस्त्वया कृतः ।
फलं तस्यापराधस्य मत्खड्गस्ते प्रदित्सति" ॥६७॥

स च प्रतिनिधिः शीघ्रं शिवान्तिकमुपागतः ।
न्यवेदयद् यथाभूतं सकलं रिपुवाचिकम् ॥६८॥

तत्कालमादिशत् सर्वान् सेना धुर्यान् रणोत्सुकान् ।
न चिरादरिपक्षस्योन्मथनं क्रियतामिति ॥६९॥

तदान्धतमसे शत्रोः सेनाभृशमपीड्यत ।
समन्ततः परिक्षिप्तैस्तीव्रबाणैर्महाश्मभिः ॥७०॥

शतघ्नीसुषिरोद्गीर्णा भीषणा वह्निगोलकाः ।
अरुजन् म्लेच्छसेनायां गजानश्वान् क्रमेलकान् ॥७१॥

अविषह्यं तमाघातं शिवास्त्राणां सुदुर्धरम् ।
झञ्झाहताभ्रमालेव म्लेच्छसेना बभूव सा ॥७२॥

ताड्यमाना खण्ड्यमाना विग्ना द्विषदनीकिनी ।
शार्दूलवृन्दसंत्रस्ता हरिणालीव साऽभवत् ॥७३॥

हतेषु सैन्यधुर्येषु विरुग्णा म्लेच्छसैनिकाः ।
खवासखाननेतृत्वे विजापुरदिशं ययुः ॥७४॥

अनुद्रुता जयोन्मत्तैः प्रबलैः शिवसैनिकैः ।
मम्रिरे कूपगर्तेषु पतितास्ते सहस्रशः ॥७५॥

इति शिवबलहतसमस्तदर्पः ।
परिरुग्णं स्वशरीरमेव रक्षन् ।
पथि पथि परितः प्रपीड्यमानः
स्वपुरं प्रापदसौ खवासखानः ॥७६॥

**॥ इति श्रीशिवराज्योदये महाकाव्ये खवासखानमर्दनं नाम**
**४४ तमः सर्गः समाप्तः ॥**

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये ४५ तमः सर्गः ॥

## सिन्धुदुर्गनिर्माणम्

इत्थं पराजित्य मदोद्धतं तं खवासखानं निजराज्यशत्रुम् ।
सावन्तवंश्यं रिपुपक्षवश्यं विजेतुकामः प्रययौ शिवाजिः ॥१॥
स भीरुराकर्ण्य शिवाभियानम् आत्मानमालोक्य च निस्सहायम् ।
अनाथनाथं प्रणतैकबन्धुं शिवं शरण्यं शरणं प्रपन्नः ॥२॥
स्वराज्यसीमस्थमरातिदुर्गं सुदुर्जयं मर्दनपूर्वसंज्ञम् ।
स मर्दितारातिरजस्रजेता जिगाय वेगादभिपत्य वीरः ॥३॥
पाश्चात्यदेश्यो जनकण्टकोऽसौ गोमन्तकस्थः खलु धर्मशत्रुः ।
शिवं विदित्वा प्रतिकूलभावं संतोषयामास महोपहारैः ॥४॥
ततोऽचिरेणाम्बुधितीरसंस्थे सह्याद्रिशृङ्गे विचरन् स वीरः ।
विशालकूर्मप्रतिमं जलान्तर् लघ्वन्तरीपं सहसा ददर्श ॥५॥
कौतूहली स प्लवशुक्तिकान्तर् महार्हमुक्ताफलसन्निकाशः ।
तरंस्तरङ्गेष्वतिचञ्चलेषु सुहृद्गणैर्द्वीपमदः प्रपेदे ॥६॥
रत्नाकरोसौ नररत्नरत्नं द्वीपस्थितं श्रीशिवमीक्षमाणः ।
चलत्तरङ्गोच्छलदच्छफेनव्याजेन सौख्यस्मितमुज्जगार ॥७॥
समुद्रगम्भीरमनाः शिवाजिः समुद्रमध्ये नितरां प्रसन्नः ।
पप्रच्छ कैवर्तकमात्मनीनं "किमत्र पानीयझरोऽस्ति कश्चित्" ॥८॥
तदैव तत्पर्णपुटे हि गङ्गाजलप्रसन्नं जलमादधानः ।
कैवर्तकोऽसाववनम्रशीर्षः पिबेदमित्याह च सानुरोधम् ॥९॥
पीयूषतुल्यं लवणाब्धिमध्ये पानीयमापीय नितान्ततृप्तः ।
तदन्तरीपं परितो ददर्श साकूतमन्दस्मितफुल्लनेत्रः ॥१०॥
जगाद चाद्यैव शुभे मुहूर्ते संपूजये द्वीपमिदं मनोज्ञम् ।
अत्रैव कुर्यामविलम्बमेव समुद्रयुद्धोचितसिन्धुदुर्गम् ॥११॥
तट-स्थित-ग्रामटिका-निवासी द्विजोऽत्र कश्चिद्द्रुतमभ्युपैतु ।
तद्गर्जितैर्मङ्गलवेदमन्त्रैः प्रपूजये द्वीपमिदं प्रकामम् ॥१२॥
ततो दशग्रन्थविशेषचञ्चुं द्विजं समानेतुमुदारशीलम् ।
ग्रामे विलोलत्पनसाम्ररम्ये शिवाज्ञया कश्चन किङ्करोऽगात् ॥१३॥
ते ब्राह्मणा म्लेच्छमहीशकोपाद् अजस्रभीता अमुमुक्तवन्तः ।
शिवाजिनिष्ठान् यवनाधिकारी ज्ञात्वैव विप्रानभिघातयेन्नः ॥१४॥

राजा शिवाजिः शिव एव साक्षाद् गोब्राह्मणानामभयप्रदाता ।
श्रद्दध्महे बाढमिति प्रसिद्धं परन्तु नो मुञ्चति भीतिरस्मान् ॥१५॥
तद् ब्रूहि राजानममुं प्रवीरम् आयुर्यशःकीर्तिकरा वरा नः ।
तन्मङ्गलार्थं प्रखरव्रतस्थाः गृहस्थिता मन्त्रजपं हि कुर्मः ॥१६॥
भयाकुलत्वं तदवेत्य तेषां स्वराज्यसीमास्थितसद्द्विजानाम् ।
निरुद्धसंकल्पतया बभूव विदूनचेता नितरां शिवाजिः ॥१७॥
तमब्रवीद् दूतमसौ हि मानी गत्वा द्विजांस्तान् वद भूय एवम् ।
"भयंकराणां यवनाधिपानां भयाय भूयादिह मेऽब्धिदुर्गः" ॥१८॥
तदा तदादेशमलङ्घनीयं पुनश्च संप्रार्थ्य भयाकुलास्ते ।
शिवं प्रपन्ना द्विजवृन्दबन्धुं कथञ्चिदास्ये धृतसंप्रसादाः ॥१९॥
प्रणम्य तान् वेदविदां वरिष्ठान् स्वकर्मनिष्ठान् स जगाद वीरः ।
भिन्दन्निवोच्चैश्चिरसंप्रवृद्धं सर्वाग्रजान्तःस्थितभीतिगण्डम् ॥२०॥
संकल्पितं मे परिपूरयध्वं द्राग् भूमिपूजोचितवेदमन्त्रैः ।
ततः परं पश्चिमसिन्धुतीरे सद्ब्राह्मणा वीतभया वसेयुः ॥२१॥
पूजावसाने नितरां प्रसन्नाद् वदान्यधुर्यात् समवाप्य वित्तम् ।
ते ब्राह्मणा ऊचुरुदारवाचा शुभाशिषस्तं श्रुतिमन्त्रपूर्णाः ॥२२॥
अल्पेन कालेन च शिल्पधुर्यैः तत्रान्तरीपे दृढभित्तिबन्धः ।
संवर्धयन् पश्चिमतीरशोभां विनिर्मितो नूतनसिन्धुदुर्गः ॥२३॥
ततः प्रतस्थे स पुरो विजेता विजापुरेशस्य पुराणि जेतुम् ।
अन्वीयमानो विजयप्रसन्नैः स्वसैनिकैर्दुर्धरशस्त्रपातैः ॥२४॥
जित्वा खुदावन्तपुरं समृद्धं तथा पुरीं तां हुबळीसमाख्याम् ।
ततः पुरं वेङ्गुरलाभिधानं स लोकहेतोर्धनमुच्चिकाय ॥२५॥
सङ्ग्रामनौकाः शतशश्च तस्य महाशतघ्नीशतरौद्ररूपाः ।
काषायवर्णध्वजदर्शनीया विलोक्य भीता हृदि शत्रुसंघाः ॥२६॥
ता युद्धनौका मकरप्रचण्डाः परिभ्रमन्त्यो मकरालये च ।
स्वराज्यशत्रून् जलचारिणस्तान् जित्वाऽहरन् भूरिधनं समन्तात् ॥
सहस्यमासेऽथ सहस्ररश्मिर्नक्रग्रासहेतुं धनदानकालम् ।
विज्ञाय मौहूर्तिकवाक्यतः सा जिजाऽचिकीर्षच्च सुवर्णदानम् ॥२८
मातुर्मनीषामवगत्य सद्यः स मातृदेवश्च वदान्यवर्यः ।
तस्मिन् दिने पावन-पर्वकाले प्रोद्घोषयन्मातृतुलाप्रदानम् ॥२९॥



Scanned by CamScanner

तपस्विनो दार्शनिकाः श्रुतिज्ञाः पौराणिकाः शास्त्रविदश्च सन्तः ।
सहस्रशस्तत्र पवित्रतीर्थे समामिलन् पुण्यसमुच्चयाय ॥३०॥

स्वर्भानुगीर्णेऽथ सहस्रभानौ प्रोद्गीयमाने श्रुतिसूक्तपाठे ।
प्रयाचमानेऽखिलभिक्षुवर्गे तूर्यस्वने मूर्च्छति चासमन्तात् ॥३१॥

स्वबाहुवीर्यार्जितपुण्यकीर्तेः परप्रतापोज्ज्वलदिव्यमूर्तेः ।
वीराधिवीरस्य शिवस्य माता जिजा तुलापात्रगता बभूव ॥३२॥

गरीयसी या सुरलोकतोऽपि मता च भूमेरपि या मुनीन्द्रैः ।
तां मातरं तन्मयभक्तिसान्द्रः सन्तोलयामास शिवः सुवर्णैः ॥३३॥

प्रमत्तनिर्दालनसुक्षमाभ्यां सदङ्घ्रिसंक्षालनसुव्रताभ्याम् ।
शिवो निजाभ्यां बहुशो भुजाभ्यां तुलैकपात्रे निदधौ सुवर्णम् ॥

तुलास्थितं काञ्चनपूर्णभाण्डं शनैश्च पस्पर्श धरामधस्तात् ।
तदैव पस्पर्श नभस्तलं च तत् पश्यतः साधुजनस्य हर्षः ॥३५॥

दिगन्तमातङ्गगणेन चापि मुहुर्मुहुः श्रोत्रपुटेन पीतम् ।
हर्षातिरेकोन्मदलोकवृन्दैरुद्गीर्णमुच्चैः स्तवनं शिवस्य ॥३६॥

जराभिभूतः पितृदेवकल्पः यः सोनपन्तः प्रथितो डबीरः ।
तमप्यसौ तुल्यसुवर्णदानसम्मानपात्रं विदधौ शिवाजिः ॥१७॥

सुवर्णसंप्राप्ति-निकामतृप्ताः सद्ब्राह्मणास्तत्र सहस्रशस्ते ।
जगुः सुवर्णै रचितानि भूयः स्तोत्राणि नव्यानि तदा शिवस्य ॥३८

इति प्रतिदिनं तथा प्रतिदिशं प्रसर्पन् भृशं
पराक्रमसमीरणः प्रजवनः शिवस्योद्धतम् ।
समस्तरिपुवर्गमाहतबलं बलात् कम्पयन्
यशःपरिमलं ततान परितः सदाह्लादनम् ॥३९॥

**॥ इति श्रीशिवराज्योदये महाकाव्ये सिन्धुदुर्गनिर्माणं नाम ४५ तमः सर्गः समाप्तः ॥**

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये ४६ तमः सर्गः ॥

## जयसिंहाभियानम्

इत्थं दिगन्तेषु सुविश्रुतं तत् क्षणे क्षणे च प्रतिवर्धमानम् ।
यशः शिवस्योज्ज्वलदीप्तिशालि दिल्लीश्वरं चेतसि निर्ददाह ॥१॥
तं जाग्रतं तद्विजयस्य वार्ताः स्वप्नाश्रितं तद्रणवीर्यगाथाः ।
प्रपीडयामासुरजस्रमुच्चैः दिल्लीशमस्तंगतराजभोगम् ॥२॥
दिवा स नाहाररसं विजज्ञौ नक्तं च निद्राविधुरो बभूव ।
साम्राज्यसिंहासनमप्यमुष्य जज्ञे तदा कण्टकतल्पकल्पम् ॥३॥
स संपरीतो निजमन्त्रिवर्यैः सेनाधुरीणैः समरप्रवीणैः ।
अनन्तचिन्ताचयभूरिभाराक्रान्तं शिरो ह्युच्चलयन् कथञ्चित् ॥४
प्रजागरक्लेशजडं स्वचक्षुरुन्मेषयन् रोषकषायकान्ति ।
विहाय वीरान् रणलब्धवर्णान् पश्यन् मुहुस्तं जयसिंहमाह ॥५॥
"राजन् ! महावीरवरोरुकीर्ते ! जानासि मन्येऽखिलवृत्तजातम् ।
त्वद्बाहुसंरक्षितमस्मदीयं दिने दिने नश्यति राज्यमेतद् ॥६॥
विवाह-संबधितया प्रवीर वंशावुभौ वामतिसन्निकृष्टौ ।
तदस्मदीयं सकलं हि राज्यं सदात्मनीनं भवता विभाव्यम् ॥७॥
पितामहस्याऽथ पितुस्तवाऽपि स्वसाऽस्मदीयैः क्रमशः समूढा ।
अदूरसम्बन्धितयाऽत एव विश्वासपात्रं त्वदृते न मेऽन्यः ॥८॥
आबाल्यतः संगरसक्तचेताः रणे रणे दर्शितसुप्रतापः ।
अनन्यसाधारणदीप्तिशाली स्वं सूर्यवंशं त्वमलंकरोषि ॥९॥
कौटुम्बिकेऽस्मत्कलहे च वीर तवैव साहाय्यमवाप्य कामम् ।
लब्धं मया दुर्लभमत्र लोके राष्ट्रस्य सम्राज्पदमस्य नूनम् ॥१०॥
तद् दक्षिणस्यां दिशि वर्धमानम् अरुन्तुदं कृच्छ्रमभूतपूर्वम् ।
सुलीलया वारयितुं समर्थौ बाहू तवैवेति दृढं मतं मे ॥११॥
गृहाण वित्तं तदनन्तपारं बलं तथा षड्विधमप्रमेयम् ।
अन्यच्च सर्वं यदपेक्षितं ते परं तथा शिवं तं हि पराजयस्व ॥१२॥
राजाधिराजस्य महामनीषाः सदैव सर्वाः परिपूरिता मे ।
अल्पीयसीयं तु परं जिगीषा नाद्यापि पूर्तिं भजते कथञ्चित् ॥१३॥
मनुष्यमूर्तेर्जगदीश्वरस्य दिल्लीश्वरस्यात्मनि हार्दमेतत् ।
दृढं च विश्वासमवेत्य बाढं प्रहर्षमन्तर्जयसिंह आप ॥१४॥
स उत्थितस्तत्क्षणमेव वीरो भक्त्या नृपं तं बहुशः प्रणम्य ।
जगाद "राजेश्वर! विश्ववन्द्य! जानीहि पूर्णामचिरान्निजेच्छाम् ॥
आबाल्यतः सर्वमिदं निजायुः प्रतिक्षणं यत्कृत एव नीतम् ।
अल्पीयसीं तस्य महीश्वरस्य न मादृशः किं फलयेन्मनीषाम् ॥१६

महेशभक्तः खलु जन्मतोऽस्मि भवान् महीशः प्रथितोरुतेजाः ।
ब्रवीमि भावं मम हृद्गतं ते मतो महीशः खलु मे महेशः ॥१७॥
अथात्मनो जन्मदिनोत्सवेऽसावौरङ्गजेबोऽर्पितभूरिवित्तः ।
सर्वान् स्वसेनागणभागमुख्यान् आदिष्टवान् श्रीजयसिंहसेवाम् ॥१८॥
म्लेच्छा बलाढ्या रणकर्ममल्ला अनेकदेश्याः स्वगणानुयाताः ।
तथैव केचिद् बलिनश्च राजस्थानस्थितास्तं जयसिंहमाप्ताः ॥१९॥
तमन्वगच्छन्नृपतेरभीष्टो दिलेरखानाभिध उग्रवीर्यः ।
मनूचिनामा च महाशतघ्नीप्रयोगविज्ञः किल गौरकायः ॥२०॥
वरूथिनी साऽगणितार्थकोषा ह्यसंख्यपत्त्यश्वगजालिगुर्वी ।
स्थले स्थले संगतसैन्यसङ्घैः प्रवर्धमानाऽभिययाववाचीम् ॥२१॥
सरित्तटस्थेषु पवित्रतीर्थेष्वनन्यभक्त्या स महेशभक्तः ।
विजेतुकामो निजराजशत्रुं महावितानान् विविधान् व्यतानीत् ॥२२॥
ऋत्विग्वचोभिः किल कोटिचण्डीयागं महान्तं स समाजुहाव ।
आनर्च चैकादशकोटिलिङ्गान्युग्रस्य शम्भोर्विजयाभिलाषी ॥२३॥
तां कालरात्रीं बगलामुखीं च देवीं विधातुं स निजानुकूलाम् ।
विप्रानविश्रान्तजपप्रयोगे न्ययोजयद् दुष्करतन्त्रविज्ञान् ॥२४॥
स्थितिं गतिं चापि नवग्रहाणां परीक्ष्य दैवज्ञगणैः प्रदिष्टाम् ।
दुष्टग्रहाणां परिशान्तिहेतोः भूयः स चक्रे धनधान्यदानम् ॥२५॥
प्रस्थानमासादथ राजधान्याः विलङ्घ्य विन्ध्यं त्रिभिरेव मासैः ।
स नर्मदारोधसि कम्रशैले षडङ्गसेनाधिपतिः प्रपेदे ॥२६॥
ये दाक्षिणात्याः शिवशस्त्रघातैः पराहताः सन्ततमेव युद्धे ।
तानात्मशत्रोरखिलानरातीन् धीरो वशीकर्तुमसौ प्रयेते ॥२७॥
सम्प्रेषितास्तेन समन्ततः स्वे सौहार्दसन्देशहराः शिवारीन् ।
निदाघशुष्कान् मरुधन्वकूपान् महार्णवेनेव जलार्द्रमेघाः ॥२८॥
ततश्च ब्रह्माणपुरस्थितं तं समन्ततः प्रापुरुदग्रचम्वः ।
यथोच्छलन्त्यः सरितो नदन्त्यो महानदं वार्षिकवर्षजन्याः ॥२९॥
सपदि सकलवृत्तं संकलय्य प्रयत्नात् ।
दिशि दिशि विचरन्तो धीरचाराः शिवस्य ॥
त्वरितमुपगतास्तं पक्षिणो यद्वदेव ।
हृतकणिशकणास्ते सायमावासवृक्षम् ॥३०॥

**॥ इति श्रीशिवराज्योदये महाकाव्ये "जयसिंहाभियानम्" नाम ४६ तमः सर्गः समाप्तः ॥**

Scanned by CamScanner

# ॥ श्रीशिवराज्योदये महाकाव्ये ४७ तमः सर्गः ॥

## धनसञ्चयः

अथ मातृतुलादानं समाप्य विधिपूर्वकम् ।
वसन् राजगडे धीरः शिवः स्पशमवैक्षत ॥१॥
दूरप्रवासखिन्नोऽपि ह्यविश्रम्य स किङ्करः ।
शिवराजं प्रणम्याह यथादृष्टं यथाश्रुतम् ॥२॥
"अशीत्यधिकपञ्चानां सहस्राणां बलं प्रभो ! ।
दक्षिणाभिमुखं याति जयसिंह-धुरन्धरम् ॥३॥
सहस्रशो विराजन्ते गो-गजोष्ट्र-तुरङ्गमाः ।
महासेनानदे तस्मिन् प्रस्तरा इव दुस्तराः ॥४॥
स च सेनापतिर्वीरो लब्धवर्णो रणे रणे ।
स्वराज्यमिदमस्माकं सर्वशक्त्या जिघांसति ॥५॥
द्विषन्तो दाक्षिणात्याश्च येऽस्माकं सन्ति केचन ।
सर्वे तस्य वशं याताः मान्त्रिकस्येव पन्नगाः ॥६॥
नर्मदातीरसंस्थाऽसावरातीनां वरूथिनी ।
प्रसर्पेदचिरादत्र मकरीव क्षुधातुरा ॥७॥
तदलं बहु भाषित्वा कार्यविज्ञस्य ते पुरः ।
कुर्यादेव महाराजो यथाकालं यथोचितम्" ॥८॥
इत्युक्त्वा निर्गते तस्मिन् दूते वृत्तनिवेदके ।
सुहृद्भिर्मन्त्रयामास शिवः संग्रामपण्डितैः ॥९॥
तत्रोवाच सुहृत् कश्चित् देहवानिव विक्रमः ।
राजन्नाभूतपूर्वेयमापदाक्रमणाभिधा ॥१०॥
यद्यादिशसि मामद्य प्रतीकारमरातिषु ।
रेवातीरमितो गत्वा मथ्नामि रिपुवाहिनीम् ॥११॥
अन्योऽब्रवीत् सहायत्वं कर्तुमिच्छन्ति ये रिपोः ।
दाक्षिणात्यानरीनेतान् पीडयामि स्थले स्थले ॥१२॥
अकुतोभयतामेवं सुहृदामवगत्य सः ।
प्रजहर्ष महावीरः शिवः प्रकृतिनिर्भयः ॥१३॥

Scanned by CamScanner

तानुवाच सुहृद्वर्यान् रिपुनिर्दमनोत्सुकान् ।
चिरचिन्तितमन्तःस्थं स्वसंकल्पमकल्पितम् ॥१४॥
प्रस्थिताप्यस्मदुत्सादं कर्तुमेषारिवाहिनी ।
प्रतिकूलप्रवाहस्था नौरिवैषा चिरं चलेत् ॥१५॥
तावदस्य स्वराज्यस्य प्रभावविभवावहाम् ।
धनश्रियं जिहीर्षामि पश्चिमाब्धितटाश्रिताम् ॥१६॥
नूनं धनापहारेण दौर्बल्यं यान्ति शत्रवः ।
सहसा न च वर्धन्ते छिन्नमूला इव द्रुमाः ॥१७॥
राष्ट्रस्योत्थातुकामस्य सत्त्वसंवर्धनक्षमम् ।
धनमेव विजानीत सञ्जीवनमहौषधम् ॥१८॥
न वाजिनो न मातङ्गा न च दुर्गा धनं विना ।
जानीत जातु लभ्यन्ते रक्षणाय जयाय वा ॥१९॥
धनिकैः शत्रुराज्यस्थैरनीत्या सञ्चितं धनम् ।
येन केन प्रकारेण हर्तव्यं तज्जिगीषुणा ॥२०॥
रिपुकोषापहारेऽपि पीडनीया न सर्वथा ।
बाला वृद्धाः स्त्रियो दीना धर्मनिष्ठाश्च सज्जनाः ॥२१॥
मन्दिराणि पवित्राणि नानाधर्मानुयायिनाम् ।
तथाश्रमा मठाः पुण्या नोच्छेतव्याः कथञ्चन ॥२२॥
धर्मसंस्थापनार्थाय संग्रामोऽयं प्रवर्तितः ।
संसारसूत्रधारेण स्वयं हि परमात्मना ॥२३॥
निमित्तभूताः स्मः सर्वे वयमीश्वरकिङ्कराः ।
तत्कार्याय धनं प्राप्यं नात्मनो भोगहेतवे ॥२४॥
पश्चिमाम्बुधितीरस्थे द्वीपे स्वादुजलाशये ।
निर्मापितो मया नूत्नः सिन्धुदुर्गोऽरिभीषणः ॥२५॥
बृहत्यो युद्धनौकाश्च नवीनास्तत्र निर्मिताः ।
प्रवाह्यन्ते महाधीरैर्नौकानयनकोविदैः ॥२६॥
निर्विण्णमिव चेतो मे स्थलयुद्धैरखण्डितैः ।
कञ्चित् कालं विनोदार्थं चिकीर्षे जलसंगरम् ॥२७॥
विज्ञाय नवसंकल्पं शिवराजस्य तं तदा ।
प्रसन्नाः सुहृदः सर्वेऽप्यभिन्नहृदया अमी ॥२८॥

तानादिश्य सुहृद्वर्यान् कर्तव्यं समयोचितम् ।
सिन्धुदुर्गं प्रतस्थेऽसौ रिपुश्रीहरणोत्सुकः ॥२९॥
युद्धनौकाऽन्यनौकाभिः ससर्प तदधिष्ठिता ।
कल्लोलान् पर्वतोत्तुङ्गान् विध्वंसन्ती क्षणे क्षणे ॥३०॥
छिन्नोर्मिमालासम्भूतबुद्बुदच्छद्मनाम्बुधिः ।
शिवं प्रदर्शयामास मुक्ताविभवमात्मनः ॥३१॥
स्फुरद्बुद्बुद-नक्षत्रमाला-मध्यगतस्तदा ।
सागराम्बरसञ्चारी शिवोऽराजत चन्द्रवत् ॥३२॥
यामिन्यामल्पशेषायां युद्धनौकाचमूरसौ ।
वसुपूर्वपुरं प्रापद् वसुपूर्णाखिलालयम् ॥४३॥
शिवाभियानमाकर्ण्य तदाकस्मिकमञ्जसा ।
धनलक्ष्मीरनुप्राप्ता प्रियं तं पुरुषोत्तमम् ॥३४॥
शिवराजाङ्घ्रिसंस्पर्शैः प्राप्तुमात्मपवित्रताम् ।
समारुरोह सा नावं दत्तहस्तेव सैनिकैः ॥३५॥
असावमूमनुप्राप्य सा चामुं पुरुषोत्तमम् ।
मुमुदेऽन्योन्यसम्प्राप्त्या चिरात् प्रणयिनाविव ॥३६॥
ततः प्रतस्थे सेनाऽसौ सत्वरं तरणीस्थिता ।
भक्त्या पूजयितुं शम्भोर्ज्योतिर्लिङ्गं सनातनम् ॥३७॥
गोकर्णक्षेत्रमागत्य शैलसागरसुन्दरम् ।
शिवस्य शिवभक्तस्य गाढभक्तिरदीप्यत ॥३८॥
निसर्गपूतशीलोऽपि तीर्थस्नानापपांसुकः ।
समस्तलोकपूज्योऽपि शिवः शिवमपूपुजत् ॥४ ॥
जञ्जपूकः प्रकृत्यैव शिवः परमभक्तिमान् ।
चक्रे मन्त्रजपं ध्यायन् रुद्राक्षमणिमालया ॥
भस्मचर्चितभालोऽसौ रुद्राक्षावलिभूषितः ।
रेजे पाशुपतास्त्रार्थं प्रतपन्निव भारतः ॥४१॥
आदायकरयोर्दीप्तं स नीराजनभाजनम् ।
उच्चैर्जगौ शिवार्तिक्यं भावार्द्रनयनाम्बुजः ॥४२॥

* * *

Scanned by CamScanner

# श्रीगणेशार्तिक्यम्

" जय जय देव गणेश । जय जय जय परमेश ॥ धृ० ॥

गौरीशंकरनन्दन । चरणानतसुरमुनिगण ।
सचराचरसंरक्षण । भक्तवृन्दहृदयेश ॥ जय जय० ॥

ॐकारस्तव मूर्तिः । वेदान्तस्तव दीप्तिः ।
त्वं परमा चिच्छक्तिः ॥ मङ्गलमयसन्देश ॥ जय जय०॥

त्वं सम्पत्सुखकर्ता । सकलविघ्नपरिहर्ता ।
ऋद्धिसिद्धिमतिदाता । पाहि पाहि विश्वेश ॥ जय जय०॥

* * *

# श्रीशिवार्तिक्यम्

जय जय शिव हर शङ्कर । जय विश्वेश्वर हे
ज्योतिर्लिङ्गसुगोचर । गौरीहृदयाधीश्वर ।
गंगाधर जय हे । जय विश्वेश्वर हे ॥ धृ०॥

शवभस्माङ्कितशरीर । नीलकण्ठ शशिशेखर ।
त्रिनयन फणिकङ्कणधर । त्रिभुवनसुन्दर हे ।
जय विश्वेश्वर हे ॥ धृ०॥

त्रिपुरान्तक मदनान्तक यज्ञान्तक जय हे ।
दक्षान्तक दैत्यान्तक दुरितान्तक जय हे ।
अतिभीषणताण्डवकर भूतेश्वर जय हे ।
जय विश्वेश्वर हे ॥ धृ०॥

कलिकिल्बिषसंलग्नम् । संसारार्णवमग्नम् ।
लोकमिमं बहुविघ्नम् । त्राहि सदाशिव हे ।
पाहि महेश्वर हे । मृत्युञ्जय जय हे ॥
जय विश्वेश्वर हे ॥ धृ० ॥

○ ○ ○

Scanned by CamScanner

शिवध्यानसमाधिस्थं तं व्युत्थापयितुं तदा ।
नाशक्नुवन्नविश्रान्तं नदन्त्यो घनघण्टिकाः ।४३।

आत्मन्यात्मन आलोक्य शिवभावं सनातनम् ।
शरीरभावमापन्नः स चिरेण कथञ्चन ॥४४॥

राष्ट्रस्वातन्त्र्यसङ्ग्राम-दीक्षितोऽपि जिजात्मजः ।
शम्भुपूजाव्रती नैच्छद् यातुं गोकर्णमन्दिरात् ॥४५॥

प्रेरितोऽन्तःस्थया भूयः स हि कर्तव्यसंविदा ।
तत् सन्मनोहरं क्षेत्रं जहौ भावार्द्रलोचनः ॥४६॥

निवर्त्य नौदलं सर्वं सिन्धुदुर्गदिशं प्रति ।
पुरं स कारवाराख्यं प्रययौ स्थलवर्त्मना ॥४७॥

शेरखानाभिधस्तत्राधिकारी सहसागतम् ।
सचमूकं शिवं ज्ञात्वा स्वेदक्लिन्नाङ्गकोऽभवत् ॥४८॥

गोरुण्डा वणिजो धूर्ताः काषायध्वजभासुरम् ।
आरान्नौकादलं दृष्ट्वा भिया भूरि चकम्पिरे ॥४९॥

दूतवाक्येन विज्ञाय शिवराजस्य काङ्क्षितम् ।
ते तस्मै स्वर्ण-रत्नाढ्यं प्रसादोपायनं ददुः ॥५०॥

इत्थं स्वराज्यरिपुभिश्चिरसञ्चितं तत्-
कोशस्थितं रजतकाञ्चनरत्नजातम् ।
संगृह्य दीनजनताहितसौख्यहेतोः ।
वीरः शिवः सपदि राजगडं प्रपेदे ॥५१॥

॥ इति श्रीशिवराज्योदये महाकाव्ये धनसञ्चयो नाम
४७ तमः सर्गः समाप्तः ॥

Scanned by CamScanner

## ॥ श्रीशिवराज्योदये महाकाव्ये ४८ तमः सर्गः ॥

## पुरन्दरयुद्धम्

अथो शिवं राजगडालयस्थं स्वराज्यसंरक्षणचिन्तनार्तम् ।
अभ्यागतो दुर्गमदूरमार्गप्रवाससुश्रान्ततरश्चरो हि ॥१॥
प्रणम्य भक्त्या नरवर्यपूज्यं स्वस्वामिनं तं निजभक्तिकेन्द्रम् ।
तदाज्ञयाऽभाषत भाषणोत्को वार्ताहरोऽसौ नवयुद्धवार्ताम् ॥२॥
"भो देव ! दिल्लीपतिसैन्यभारः प्रभूतमातङ्गहयोष्ट्रसारः ।
विजेतुमुच्चैर्यतते प्रचण्डं पुरन्दरं दुर्गपुरन्दरं नः ॥३॥
तन्नायकः कश्चन दीर्घकूर्चः दिलेरखानाभिध उच्चकायः ।
यथा समीपे सगणः समेतस्तथैव वीरैरभिपीडितो नः ॥४॥
तथाप्यभीतः स हि वीरमानी प्रभूतसेनानुगतो युयुत्सुः ।
प्रचण्डशक्त्या यतते विजेतुं पुरंदरं वज्रगडं च दुर्गम् ॥५॥
दिने दिने तद्बलवर्धनार्थं महाशतघ्नीशतशक्तिमत्यः ।
आयान्ति सेनाः परितो रिपूणाम् उद्धूनयन्त्यो रजसां वितानम्॥६
सर्वाधिकारी जयसिंहनामा कुर्वन् मुहुर्यज्ञविधीननेकान् ।
जुहोति नूनं गिरिसंस्थितानि ग्रामाणि सर्वाणि कृषीवलानाम् ॥७॥
दिलेरखानस्य बलाढ्यसेना पुरन्दरे वह्निरसं वमन्ती ।
निर्दाल्यतेऽस्माकमसौ प्रवीरैरनारतं प्रस्तरवर्षणेन ॥८॥
अरातिसैन्यैः परितः परीते दुर्गेऽपि यद् बन्धुसहायहेतोः ।
देव ! त्वया प्रेषितमस्त्रजातं तन्नूनमासीदभयप्रदानम् ॥९॥
दिने दिनेऽराति-महाशतघ्नी—प्रक्षेपितैर्दुर्धरवह्निगोलैः ।
निर्दाह्यमाना अपि नः प्रवीराः सर्वात्मना घ्नन्ति रिपूननेकान् ॥१०॥
दिनेषु भूयः परितो हि दुर्गं भ्रमन्ति गृध्राः नरमांसलुब्धाः ।
तमिस्रघोरासु निशासु नित्यं क्रन्दन्ति वल्गन्ति च ते शृगालाः ॥११॥
असंख्यपत्त्यश्वविदीर्णदेह—परिस्रवच्छोणितरूपिणी सा ।
सरिन्नवा तस्य पुरन्दरस्य दुर्लङ्घनीया परिखेव जाता ॥१२॥
इत्थं हतेष्वप्यमितेषु वीरेष्वसौ दिलेरः समरप्रसक्तः ।
दृढाभिघातैर्नितरामनेकैः हठेन तं वज्रगडं जिगाय ॥१३॥
ततो विजेतुं स पुरन्दरं तं सुदुर्जयं दुर्गमतीव मत्तः ।
अवर्षदुच्चैर्निजकोपवह्नि-स्फुलिङ्गवर्षामिव दाहकास्त्रैः ॥१४॥

Scanned by CamScanner

अधित्यकां तस्य पुरन्दरस्य जित्वा स्ववीर्यातिशयेन नूनम् ।
उद्युध्यतेऽसौ दृढनिश्चयेन प्रोन्मूलनार्थं भगवद्ध्वजस्य ॥१५॥
क्षणे च तस्मिन् सहसा प्रविष्टः सङ्ग्रामवार्ताहरणे नियुक्तः ।
चरोऽपरोऽन्तःस्थमपारदुःखम् आवेदयन्नश्रुजलैर्गलद्भिः ॥१६॥
सगद्गदाक्रन्दनमार्तवाचा विदूनचेताः स जगाद दूतः ।
स्वामिन् ! रणे वीरवरः पपात बाणप्रहारेण मुरारबाजिः ॥१७॥
स शत्रुसङ्घेन नियुध्यमानः सहस्रशः शस्त्रभृतो जघान ।
विलोक्य तस्याद्भुतमाजिवीर्यं । दिलेरखानश्चकितो जगाद ॥१८॥
सहस्रशो वीर ! मया प्रवीरा रणेषु दृष्टाः समरप्रवीणाः ।
वीर्यातिरेकस्त्वयि वीरवर्य यथा न चान्यत्र तथा व्यलोकि ॥१९॥
नूनं प्रसन्नोऽस्मि तवावलोक्य सङ्ग्रामकौशल्यमपारधैर्यम् ।
हित्वा शिवाजिं धनशक्तिहीनं सेवस्व दिल्लीपतिमद्वितीयम् ॥२०
न तादृशः कश्चन भूतलेऽस्मिन् सम्मानकर्ता बहुवित्तदाता ।
त्वां खड्गलीलानिपुणं सुवीरं स मानयेद् मद्वचसा नितान्तम् ॥२१
इति ब्रुवाणे रिपुसैन्यधुर्ये प्रलोभिनीं वाचमुदग्रदर्पे ।
स मर्मणीव प्रहृतः प्रवीरः चक्रे क्रुधा सङ्गरताण्डवानि ॥२२॥
तमात्तखड्गद्वयमेकवीरं प्रोन्मत्तसिंहध्वनिमुद्गिरन्तम् ।
निघ्नन्तमुद्दण्डरिपूनसंख्यान् न कोऽपि रोद्धुं प्रबभूव शत्रुः ॥२३॥
गजाधिरूढः स दिलेरखानः शरान् किरन् सर्वत एव तीव्रान् ।
नियुद्धसुव्यग्रममुं कथञ्चिद् बाणेन हृन्मर्मणि निर्जघान ॥२४॥
हतेऽपि सेनाधिपतौ मुरारौ आस्माकवीराः खलु वज्रधैर्याः ।
अल्पाल्पसंख्या रिपुभिर्ह्यसंख्यैः बाढं विगृह्णन्ति दिवाऽथ नक्तम् ॥
अस्माकमेकोऽपि हि सैनिकानां यावत् प्रभो जीवति धैर्यसारः ।
तावद् विगृह्णीत समग्रशक्त्या सहस्रसंख्यैरपि सोऽरिवीरैः ॥२६॥
जेतुं महाराष्ट्रमिदं समग्रं नूनं प्रवृत्तं रिपुसैन्यमेतत् ।
कृतं तदत्यल्पबलेन किन्तु हतप्रभावं हि पुरन्दरेण ॥२७॥
वदन्ति केचित् रिपुसैनिकास्ते यदेकदुर्गस्य जये स्वशक्तिः ।
विनश्यतीत्थं सकलं विजेतुं राष्ट्रं कथं तत् प्रभवेद् बलं नः ॥२८॥
वृत्तान्तमेवं सकलं निशाम्यन् निसर्गगम्भीरमनाः शिवाजिः ।
अतुल्यशौर्यस्य सुहृद्वरस्य मृत्युं स मेने स्वभुजापघातम् ॥२९॥
निगीर्य सन्मित्रविनाशदुःखम् असह्यमत्यन्तविवेकयोगात् ।
स मन्त्रिवर्यैर्नृपनीतिविज्ञैः सम्मन्त्रयामास विमर्शशीलः ॥३०॥

Scanned by CamScanner

स मर्मविज्ञो जनमानसानां निगूढगाही च रहस्यवेदी ।
युवाऽपि वृद्धान् निजमन्त्रिवर्यान् नीतिप्रयोगोचितमाह वाक्यम् ॥
सर्वाधिकारी जयसिंहनामा निःस्वाभिमानोऽपि चिरस्य दास्यात् ।
यज्ञैरनेकैः स परन्तु मन्ये धर्मैकनिष्ठां सुदृढां व्यनक्ति ॥३२॥
स्वधर्मनिष्ठोऽपि निजं य आयुः म्लेच्छस्य दास्ये नयतीह देशे ।
नूनं निकृष्टः स हि कल्पनीयः शकृत्समुद्भूतजघन्यकीटात् ॥३३॥
तथापि चेच्चेतसि देशभक्तिः तस्य स्फुरत्यल्पतमा नरस्य ।
नूनं वशीकर्तुमसौ कथञ्चित् शक्योऽस्मदीये खलु पुण्यकार्ये ॥३४॥
रिपुप्रदिष्टो जयसिंह एष श्रीरामचन्द्रान्वयसम्भवोऽस्ति ।
उद्बोधितश्चेन्मधुरोपदेशैः वशंगतः स्यादिति कल्पना मे ॥३५॥
विजापुरेशो रिपुरस्मदीयो रिपोस्तथाऽस्यापि स शत्रुरेव ।
अस्माभिरत्यल्पबलैः प्रयुक्त्या परस्परं तौ प्रतियोधनीयौ ॥३६॥
समानशत्रुद्वययुद्धकृच्छ्रे शत्रुर्बलिष्ठो बलिनाऽपरेण ।
संयोधनीयो निजदौर्हृदेन जिगीषुणा हीनबलेन युक्त्या ॥३७॥
मत्वेति पत्राणि मया स्वदूतैः विजापुरेशं प्रति वाहितानि ।
निसर्गशत्रुः स हि नः परन्तु न स्तोकमप्येति मदानुकूल्यम् ॥३८॥
कृच्छ्रेऽस्मदीये स विजापुरेशो यः पीडितोऽस्माभिरजस्रमेव ।
नितान्तविद्वेषितयाऽद्य भूयाद् नूनं न साहाय्यकरः कथञ्चित् ॥३९॥
कुर्यां प्रयत्नस्तदनेन सन्धिं दुर्गप्रदानेन बलीयसाऽहम् ।
आपद्यशक्यप्रतिकारितायां श्रेयस्करी वैतसवृत्तिरेव ॥४०॥
विवेकपूर्णं तदिदं शिवस्य मतं समीचीनमवेत्य सम्यक् ।
विमृश्य भूयश्च निजानुकूल्यं प्रदर्शयामासुरमी अमात्याः ॥४१॥
तदनु झटिति विप्रो राजनीतिप्रवीणः
वलिनपलितकायः सत्तपोज्ञानवृद्धः ।
हृदि शिववचनं सद्भावगर्भं दधानः
लघु लघु जयसिंहं द्रष्टुकामः प्रतस्थे ॥४२॥

**॥ इति श्रीशिवराज्योदये महाकाव्ये पुरन्दरयुद्धं नाम**
**४८ तमः सर्गः समाप्तः ॥**

Scanned by CamScanner